श्रीकृष्णविलासम्

श्रीसुकुमारविरचितम्

Critically edited by

DR. K. JAYAMMAL, M.A., Ph.D.

Published by

HIGGINBOTHAMS LIMITED.

814, Anna Road, Madras—600 002

All Rights Reserved

First Edition 1982

Price Rs. 17-50

PRINTED IN INDIA

By T. V. Ramani at Ramani Brothers (Printers)
No. 4, C. P. Ramaswamy Iyer, Street, Madras-600 018
and Published by Higginbothams Limited,
814, Anna Road, Madras-600 002

FOREWORD

The Kṛṣṇavilāsa of Sukumāra is the most popular Sanskrit Mahākāvya of Kerala and has attracted the attention of students and scholars alike by its lucid and chaste diction, sweet and apt imagery and rich and rewarding aesthetic value. The first few cantos of the work formed a part in the regular curriculum of Sanskrit studies in Kerala for centuries, though it was almost unknown elsewhere in India. The text is incomplete and breaks off towards the end of the twelfth canto; even the available portion has not yet been printed in full. This is the first attempt at a critical edition of this important Sanskrit Mahākāvya, using 15 representative manuscripts, all the available commentaries and important editions of the earlier portions. This was prepared under my direct supervision in the Sanskrit Department of the Madras University during 1975-79 and formed the the major part of Mrs. Jayammal's doctoral thesis for which she was awarded the degree of Ph D. by the Madras University in 1979. I have great pleasure in writing a foreword to this excellent book. I hope that Sukumāra's Kṛṣṇavilāsa will receive all-India popularity among Sanskritists which it richly deserves.

I am very happy to note that the Higginbothams have come forward to publish this fine poem.

DR. K. KUNJUNNI RAJA

PREFACE

Śrī Kṛṣṇavilāsa of Sukumāra is a fine specimen of a Sanskrit Mahākāvya and deals with the popular story of Kṛṣṇa. It is the most popular Sanskrit Mahākāvya of Kerala. The text ends abruptly in the twelfth canto while describing Kṛṣṇa's return from Heaven after Pārijātaharaṇa. There has been no critical edition of the text; there is not even a complete edition.

The present critical edition of the Kṛṣṇavilāsa formed the main part of my doctoral thesis in the University of Madras, prepared under the supervision of Dr. K. K. Raja during 1975—1979. The critical edition is based on fifteen representative Manuscripts, the available commentaries and important editions. The manuscript material has been fully described, their inter-relation discussed and the stemma codicum prepared. Variant readings have been noted in the foot-notes. Some interpolated verses occurring only in a few manuscripts have been added as an appendix. An alphabetical index of the verses has been added at the end.

I am gratefully indebted to Dr. K. K. Raja for his guidance and supervision in the preparation of the thesis and the help in seeing the proof.

My thanks are also due to Dr. M. Narasimhachary for his suggestions. I thank the authorities of the University of Madras for granting me permission to publish the thesis. My thanks are also due to the University Grants Commission for having given me a Junior Research Fellowship from 1976—1979.

My sincere thanks are also due to the publishers, Higginbothams Ltd., and the Printers, Ramani Brothers, for bringing out the book in this form.

K. JAYAMMAL

CONTENTS

			Page
Introduction			
Critical Apparatus			
Text			
Canto	I	—	१
„	II	—	१३
„	III	—	२५
„	IV	—	४०
„	V	—	५३
„	VI	—	६९
„	VII	—	८१
„	VIII	—	९२
„	IX	—	११८
„	X	—	१३८
„	XI	—	१५८
„	XII	—	१७९
Appendix—Interpolations			
Index of Verses			

INTRODUCTION

The present critical edition of Sukumāra's *Kṛṣṇavilāsa* is based on 15 representative manuscripts, the available commentaries and editions of the earlier portions.

The *Kṛṣṇavilāsa* is an incomplete Mahākāvya dealing with the story of Kṛṣṇa, generally following the tenth book of the *Bhāgavata Purāṇa*, and has been very popular throughout Kerala for centuries. It is believed that its author Sukumāra was a Kerala poet. Popular tradition identifies him with Prabhākara of Kuttulli Brahmin family in Kerala who is said to be identical with the great Mīmāṃsā teacher of that name. All the available manuscripts of the work refer to the author only as Sukumāra ; the commentators also refer to him as Sukumāra. The identification of the author with the Mīmāṃsā exponent Prabhākara is impossible, since the Mīmāṃsā writer flourished in the seventh century A.D., and the poem, obviously based on the *Bhāgavata*, cannot be earlier than the tenth century.

The late Ullur S. Parameswara Iyer suggested that the author of the poem might have been a Tamil scholar of the Cola country and that he may be identified with Bhaṭṭasukumāra, author of a drama called *Raghuvīracarita*, who lived in the Cola country in the 12th century. In the light of strong opposition from Kerala scholars, Ullur did not press his theory in his later work on the history of Kerala literature. Though there is no evidence for the identification of Sukumāra with Bhaṭṭasukumāra, the possibility of the poet being a writer from the Cola country is still there. On the other hand the reference to the Kaverī, the Cola country and the Lord of Śrīraṅgam need not mean that the poet belonged to that area ; it can be explained as indicating the poet's devotion to the Lord of Śrīraṅgam and his admiration for the beautiful land.

The exclusive popularity of the work in Kerala is in favour of accepting its author Sukumāra as a native of Kerala.

Regarding the date of Sukumāra one definite limit is given by the reference to a line of the *Kṛṣṇavilāsa* in the *Prakrīyāsarvasva* of Melpputtūr Nārāyaṇa Bhaṭṭa : (1623 A.D.)

अपानयतीत्यपान इत्यादौ वा नयतिर्धात्वन्तरमिति योगशास्त्रे ।
तेनाक्रूरमानयामासेति श्रीकृष्णविलासोक्तिः सिद्धा ॥

(p. 1215, Paper ms. with Prof. K. K. Raja ; *Kṛṣṇavilāsa,* VIII. 32.)

Sukumāra seems to have influenced Śaṅkara, who wrote the Mahākāvya *Kṛṣṇavijaya* under the patronage of King Kerala Varman of Kolattunad (first half of the 15th century).

Compare :

अहार्षीद् विकृतिं तस्या वपुषः पुरुषोत्तमः ।
अवर्धयत तां तस्या मानसे मीनकेतनः ॥

Kṛṣṇavijaya, VII. 144.

With :

अहार्षीदरविन्दाक्षस्तस्या वपुषि विक्रियाम् ।
उदपादि पुनस्तेन हृदि सा मन्मथोद्भवा ॥

Kṛṣṇavilāsa, VIII. 128.

The Malayalam poem *Kṛṣṇāgātha* by Ceruśśeri under the patronage of King Udayavarman of Kolattunad (15th Century) also contains influence of the *Kṛṣṇavilāsa* :

mānini tannuṭe meni nivarnnappoḷ
māranu villu vaḷaññu cemme.

(when the girl's body became straight, the bow of Cupid became bent—(ready to discharge arrows).

From the above it is clear that Sukumāra must have flourished after the tenth century and before the fifteenth century A.D. There is nothing improbable in the suggestion of Ullur S. Parameswara Iyer that Sukumāra may be assigned to the beginning of the

thirteenth century, especially since Agastya Paṇḍita at the end of the thirteenth century seems to have imitated the *Kṛṣṇavilāsa* in his *Bālabhārata*. Both the works omit the episodes of Tṛṇāvarta, Vatsāsuravadha, Vyomāsuravadha, Mucukunda vṛttānta, Pradyumnajanma and Śatadhanvavadha; both works end with the episode of Pārijātaharaṇa.

The main source of the *Kṛṣṇavilāsa* is the *Bhāgavatapurāṇa*. Earth's approach to Brahma, Narāyaṇa's promise, Kaṃsa hearing the prophecy, birth of Kṛṣṇa, his childhood adventures like the killing of Pūtanā and Śakaṭa, subjugation of Kāliya, the lifting up of Govardhana hill, the love affairs with the Gopīs; Akrūra's mission, the death of Kaṃsa, studentship of Kṛṣṇa and Rāma under Sāndīpani, the recovery of the preceptor's son from the abode of Yama, Jarāsandha's defeat, Balarāma's marriage with Revatī, Rukmiṇī's message to Kṛṣṇa through a brahmin, her elopement with Kṛṣṇa and their marriage, Kṛṣṇa's marriage with Satyā and Satyabhāma, Naraka's destruction, Kṛṣṇa's visit to Heaven and the ceasure of Pārijāta. The episode of Tṛṇāvarta is not described, but referred to later by Sukumāra (*nāham asmi tṛṇāvarto* VI. 34). The episode of Rukmiṇī sending a brahmin messenger to Kṛṣṇa and Kṛṣṇa's subdueing the seven bulls of Nagnajit occur in the *Bhāgavata* and *Kṛṣṇavilāsa*, but not in the *Viṣṇupurāṇa* or the *Harivaṃśa*.

Being a Mahākāvya, the *Kṛṣṇa vilāsa* does not have the laxity of the Purāṇas. Many of the incidents of the *Bhāgavata* are left out or only referred to. Incidents which have little to do with Kṛṣṇa are also omitted—Balarāma's dragging the Yamunā off her course and the killing of Dhenuka. The episode of Kālayavana is also omitted. He has introduced descriptions of cities like Dvārakā and Mathurā, the sun-set, sun-rise, sea, forest, battle and marriage festivals. The offering of the chief hunter's daughter in marriage to Kṛṣṇa and his tactful reply is an interesting innovation by Sukumāra. Sukumāra has also lavished his skill in depicting the episode of Kṛṣṇa stealing butter. He describes at length the gorgeous scenery of Mount Mēru (Canto I), the forest in its natural splendour and majesty (Cantos IV and V), the delightful vignettes of nature in its varied and seasonal moods (Canto VII) and the landscapes (Canto XII).

Sukumāra was an ardent admirer of Kālidāsa and was influenced by him in style, metre, phrases and the general handling of the story. The picturesque portrayal of Mount Meru, the scene in Canto V where River Yamunā appears before Kṛṣṇa in a dream and the beautiful aerial description in Canto XII are clear imitations of Kālidāsa.

Sukumāra's style is simple, unaffected and is true to his name. He generally follows the Vaidarbhī style of Kālidāsa but it is generally simpler and even more lucid. At times Sukumāra seems to give importance to alliteration much more than Kālidāsa. His figures of speech are natural, never artificial or forced and he does not indulge in involved construction.

As a result of the great popularity of the poem many of the later poets of Kerala considered it as a model. Influence of Sukumāra is seen not only in Śaṅkara's *Kṛṣṇavijaya* and Narāyaṇa Bhaṭṭa's *Nārāyaṇīya* but also in Mānaveda's *Kṛṣṇagīti* and Malayalam works like the *Kṛṣṇagātha* and the Maṇipravala text *Kṛṣṇacaritam*.

CRITICAL APPARATUS

The present critical edition of the Kṛṣṇavilāsa is based on the following manuscripts.

A1. 69302 of Adyar Library. Palm-leaf. Size 15½″ x 1″ Folios. 21; lines 5 per folio. Grantha script. Incomplete. Extends only upto 44th verse in third canto. Old, worm-eaten and injured. Name of the copyist : Subramani.

A2. 69293 of Adyar Library. Palm-leaf. Size 12¼″ x 1¼″ The Codex contains Kṛṣṇavilāsa text and Kṛṣṇavilāsa vyākhyā. Folios 1-12. Lines 8 per folio. Grantha script. Incomplete. Breaks off at the end of verse 54 of canto II. Old, worm-eaten and injured. Name of the copyist : Kṛṣṇa.

A3. 70255 of Adyar Library. Palm-leaf. Size 6·7″ x 1·6″ Folios 9. Lines 9 per folio. Malayalam script. Incomplete. Breaks off at the end of 63rd verse in Canto I. Old, worm-eaten and badly injured.

M1. R. No. 4480 of Government Oriental Manuscripts Library, Madras. Paper: 108 pages: 20 lines per page. Size 10 5/8″ x 9½″ Devanāgari script. Dated 14-2-1925. Transcribed in 1924-25 from a manuscript of the Raja of Chirakkal, Malabar district. Incomplete. Contains only cantos 8 to 12. Condition : good.

M2. R. No. 3439 of Government Oriental Manuscripts Library, Madras; paper. 285 pages; 20 lines per page. Size 10 5/8" x 9 3/8". Devanāgari script; Transcribed in 1920-21 from a manuscript of Godavarma, Raja of Cranganore, Cochin State. Incomplete, Contains cantos 1 to 7 only with Govinda's Bālapāṭhyā commentary. Condition : good.

M3. R. No. 85 Government Oriental Manuscripts Library, Madras. Palm-leaf. Size 9¾" x 7/8". The codex contains

(a) Samāsa kusumāvali ; (b) Kṛṣṇavilāsa vyākhyā vilāsinī ; (c) Kṛṣṇavilāsa (text only) folios : 76a to 81. 11 lines per folio. Grantha script. Incomplete. Contains only the first canto. Condition : good.

M4. D. 11833 of Government Oriental Manuscripts Library, Madras. Palm-leaf. Size 9 5/8" x 1½". The codex contains Kṛṣṇavilasa. Folios 1 to 42. and Kumārasambhava. 9 lines per folio. No. of granthas 736. Malayālam script. Incomplete. Contains only the first six cantos. Condition : good.

M5. D. 11834 of Government Oriental Manuscripts Library, Madras. Palm-leaf. Size 10 1/8" x 1 7/8". Folios 83. Malayalam script. Incomplete. Contains only the first four cantos. Old and slightly injured.

N. In possession of Dr. M. Narasimhachary, Reader in Sanskrit, University of Madras, Madras. Palm-leaf, The codex contains Rāmodanta and a small track on medicine and grammar apart from the Kṛṣṇavilāsa. Kṛṣṇavilāsa starts from the 12th folio. 7 to 8 lines per folio. Grantha script. Incomplete. Contains only cantos 1 to 5 and 7. Condition good. Name of the copyist : Sri Mulanatha Sankara Subramanyan.

T1. No. 1389 of the University Manuscripts Library, Trivandrum. Palm-leaf. Size 9¼" x 1½". No. of granthas 2000. 8 lines per folio. Malayalam script. Complete.

T2. No. 10787 of the University Manuscripts Library, Trivandrum. Palm-leaf. Size 8" x 1½". No. of granthas 2000. 8 lines per page. Malayalam script. Complete.

T3. No. 5137 of the University Manuscripts Library, Trivandrum. Palm-leaf. Malayalam script. Date 1043 (Malayālam Era). Complete. Old and damaged.

T4. No. 11078 of the University Manuscripts Library, Trivandrum. Palm-leaf. Size 13" x 1¼". 5 lines per folio. Malayalam

script. Extends upto verse 62 in Canto 12. The manuscript suffers heavily from omissions Old, worm-eaten and injured.

T5. T. No. 170C of the University Manuscripts Library Trivandrum. Paper. Size 11" x 9". Pages 70. 20 lines per page. Malayālam script. Incomplete. Contains only canto I with Ramaswamy Sastri's commentary : Manjubhāṣiṇī.

VB. 526b of Visva Bharati collections of manuscripts in Adyar Library. Palm-leaf. Size 24cm. x 3.8. cm. The codex contains both Kṛṣṇavilāsa vyākhyā Vilāsinī and Kṛṣṇavilāsa text. Folios 54. 8 lines per folio. Grantha script. Incomplete. Extends only upto verse 96 in canto 5. Old and injured.

STEMMA CODICUM

From a careful examination of the above manuscripts, their probable inter-relation can be deduced as follows.

As regards the Malayalam manuscripts from Trivandrum, T1 and T4 are from the same source, as they have the same omissions. T2 is from an entirely different source, as it contains 41 interpolated verses in Canto III. Though T3 also contains 41 interpolated verses in canto III, it differs from T2 regarding variants. The source of T3 and T4 may be same as they contain the same scribal errors in many places (e.g. Canto V. 22—change of order in verses same in T3 and T4). In comparison with T2, T3 appears to have incorporated interpolations in canto III at a later stage. It is difficult to trace the source of T5 as it contains only one canto.

M1 is different from T1, T2, T3 and T4, as this manuscript alone contains 18 interpolated verses in Canto XII. M2, M3, N and V.B. are similar and probably form a group with T1. M3, which contains only the first canto is almost identical with M2. M4 may be grouped with T4, as both these manuscripts contain similar

scribal errors. A1, A2 and A3 fall in the group of M4. A2 and A3 are almost identical. M5 may be grouped with T2, as both of them have the same interpolations and scribal errors.

Regarding the printed texts, most probably P1 is from the group of M4 and T4. The other printed texts namely P2, P5, P6, P7, P8, P9 form a group. The source of these printed texts as also that of T1 may be the same,

The following diagram indicates the *stemma codicum.*

(UR TEXT)



PRINTED TEXTS

P1. Text in Devanāgarī. Printed in Keralagranthamala in 1906-8. Cantos I-IX only.

P2. Printed in Grantha with Rāmapāṇivāda's *Vilāsinī.* Published by T. Swaminatha Sastry, Sastra Sanjivini Press, Madras-1914; Cantos I-IV only.

P3. Printed in Devanāgarī. Published by P. S. Anantanarayana Sastri, The Mangalodayam Power Press; Trichur 1927; Cantos IV and V only.

P4. Printed in Devanāgarī by L. Anantarama Sastri, R. S. Vādhyar and sons; Palghat 1955; Canto II only.

P5. Printed in Devanāgarī with Rāmapāṇivāda's Vilāsinī. Published by K. S. Ganapathi Sastri. The Mangalodayam Power Press, Trichur, 1928. Cantos I-IV only.

P6. Printed in Malayalam with Vilāsamuralī, a Malayalam translation by P. Raghavan. Kṛṣṇa Printing Works, Trivandrum, 1973. Cantos I-VI only.

P7. Printed in Malayalam with the commentary Vivaraṇa by Rama Warrier, V. V. Press, Kollam 1930. Cantos I-IV only.

P8. Printed in Malayalam with a commentary by Kavungal Nilakanta Pillai, V. V. Press, Kollam, 1926. Cantos I-IV only

P9. Printed in Malayalam with a commentary by K. Balarama Panicker; Devasvam Board, Trivandrum, 1955. Cantos I-III only.

COMMENTARIES

Among the commentaries on the *Kṛṣṇavilāsa*, the *Vilāsinī* [1] by Rāma Pāṇivāda.[2] the renowned Kerala poet of the eighteenth century, is the most important and is complete. The first four cantos of this have been published in Grantha [3] and in Devanagari.[4] The *Bālapāṭhya* [5] by Govinda [6] of Tāmrapatrālaya in Alangad who lived in the nineteenth century is incomplete and extends only for the first seven cantos. The *Mañjubhāṣiṇī* [7] by Ilattūr Rāmaswāmi Śāstri, also known as Gomatī Dāsa [8] was written in 1873 at the behest of Viśākham Tirunāl Mahārāja of Travancore.[9] This commentary is available only for the first two cantos.

---

[1] V. B. 1032—Visva Bharathi Collections of manuscripts, Adyar Library.

[2] Vide-The opening part of Vilāsinī.

श्रीनारायणगुरुवरकरुणापात्रेण पाणिवादेन ।

श्रीकृष्णविलासस्य क्रियते टीका विलासिनीनाम ॥

[3] T. Swaminatha Sastry; Sastra Sanjivini Press, Madras 1914.

[4] K. S. Ganapathy Sastry, Mangalodayam Power Press, Trichur 1928.

[5] Madras Govt., MSS. Library, No. R. 3439.

[6] अस्माद् वचनाद् यशसां मूलं निश्चित्य काव्यनिर्माणम् ।

निरमात्सुकुमारकविः श्रीकृष्णविलाससंज्ञितं काव्यम् ॥

बालपाठ्याभिधा काचिदस्य व्याख्या विरच्यते ।

ताम्रपत्रालयस्थेन गोविन्देन यथान्वयम् ।

[7] CONTRIBUTION OF KERALA TO SANSKRIT Literature by Dr. K. K. Raja, Page 198.

[8] Travancore University MS. T. 170.

श्रीमतीं गोमतीं वन्दे महात्रिपुरसुन्दरीम् ।

[9] Ibid :

आदेशेन विशाखभूवलरिपोर्यविन्मनीषाबलं

श्रीमत्कृष्णविलासकाव्यतिलकं व्याख्यातुमध्यारभे ।

चतुस्सहस्याब्दत्रभिर्युतायां शतैश्चतुस्सप्ततिसंख्ययापि ।

अतीतवत्यां कलिवत्सराणां व्याख्या कृता मञ्जुलभाषिणीयम् ॥

श्रीकृष्णविलासम्

श्रीसुकुमारविरचितम्

प्रथमः सर्गः

[1]अस्ति श्रियः सद्म सुमेरुनामा समस्तकल्याणनिधिर्गिरीन्द्रः ।
तिष्ठन्निदं विश्वमनुप्रविश्य स्वेनात्मना विष्णुरिवोर्जितेन ॥ १ ॥

मिथस्तिरोभावविलोकनाभ्यां संक्रीडमानाविव बालकौ द्वौ ।
पार्श्वेषु यस्याशु परिभ्रमन्तौ चन्द्रांशुमन्तौ नयतो दिनानि ॥ २ ॥

उच्चैःशिखः काञ्चनगौरवर्णस्तमो निगृह्णन् महसा[2] निजेन ।
दीपस्त्रयाणामिव विष्टपानां यो भाति पर्यन्तचरत्पतङ्गः ॥ ३ ॥

यस्याः पतित्वे विहिताभिलाषः करोति तीव्राणि तपांसि लोकः ।
बिभर्ति[3] रत्नाकरमेखलां तामङ्केन पुत्रीमिव यो धरित्रीम् ॥ ४ ॥

महान्ति दानानि मखानुदग्रान् पराञ्चि पानाशनयोस्तपांसि ।
शरीरिणः शान्तमलैर्मनोभिः कुर्वन्ति यच्छृङ्गनिवासकामाः ॥ ५ ॥

सुरा युगान्तेषु सह प्रियाभिर्निषेदिवांसो यदधित्यकासु ।
उदन्वतामैक्यमुपागतानां पश्यन्ति कल्लोलशतप्रचारान्[4] ॥ ६ ॥

पुष्पाणि शय्याः सुरपादपानां क्रीडागृहाः काञ्चनगह्वराणि ।
भवन्ति च स्वर्गविलासिनीनां रत्नाङ्कुरा यत्र रतिप्रदीपाः ॥ ७ ॥

---

1 T3 begins with 16th verse.
T4 begins with 10th verse.

2 A1, P2-मनसा

3 T2-बिभर्षि

4 M2-प्रचरान्

स्वर्गौकसः स्वर्णमयीषु[1] पीताः श्वेतत्विषो [2]रूप्यमयीषु भूषु ।
नीलाश्च नीलोपलमेदिनीषु ज्ञातुं मिथो यत्र न शक्नुवन्ति ॥ ८ ॥

दरीगृहोत्सङ्ग[3]गतैरनूरोः[4] कशाभिघातध्वनिभिः सकम्पाः ।
सद्यः प्रियानुज्झितमानदोषाः सुराङ्गना[5] यत्र परिष्वजन्ते ॥ ९ ॥

नेतुं [6]त्रपानम्रमुखीरनीशाः स्फुटानि यत्स्वर्णगुहान्तराणि[7] ।
सिद्धाः प्रयत्नेन विना नवोढा नयन्ति नीलोपलगह्वराणि ॥ १० ॥

यत्रोद्यतानां[8] कुसुमापचाये[9] कान्तासु कल्पद्रुमवाटिकासु ।
विभान्ति[10] सुत्रामविलासिनीनां[11] पदानि[12] लाक्षारसपाटलानि ॥ ११ ॥

पयोदमार्गव्यतिलङ्घिनीषु[13] हंसाः शिरःपुष्करिणीषु यस्य[14] ।
वर्षागमेऽप्यश्रुतमेघनादा[15] न कुर्वते मानसदीर्घयात्राम् ॥ १२ ॥

छन्नेषु यस्मिन् कनकोज्ज्वलाभिरामूलचूडं नवमञ्जरीभिः ।
गन्धेन विज्ञाय पतन्ति भृङ्गाः भृङ्गान्तरारग्वधपादपेषु ॥ १३ ॥

मन्दाकिनी यच्छिखरे[16] वहन्ती कुल्यापथाभ्यन्तरसंप्रविष्टा[17] ।
बालेव तद्रक्षणसंप्रवृत्ता दिने दिने सिञ्चति पुष्पवाटीम्[18] ॥ १४ ॥

---

1 A1 M5 P2 P5 P6 P7 P8 P9 T1 T2 T3 T4 V. B. महीषु
2 A2-रौप्यमयीषु
3 T1-दरीगृहद्वारहोत्सङ्ग
4 P2 P5 P6 P7 P8 P9 T1 T2 T3 T4 गतेः
5 T5-वराङ्गना
6 T5-त्रपां
7 A3 T4 गृहान्तराणि
8 T2-यद्यतनं
9 A2-कुसुमापाचये
10 T1-भवन्ति
11 P6-विलासनीनां
12 P2-पादानि
13 T5-व्यतिलङ्घनीषु
14 M3-यस्याः
15 M3 मेधनादः
16 M2-यं शिखरे
17 M2 पदाभ्यन्तर
18 M3 वाटिम्
1T T5 वाटीः

श्रियाभिरामः शरणं सुराणामलङ्घनीयो महता महिम्ना ।
विराजमानो वनमालया च यः शार्ङ्गधन्वानमनुप्रयाति[1] ॥ १५ ॥

पुरा पुराणां त्रितयं दिधक्षो[2]रुमापतेः कार्मुकतां प्रपन्नः ।
मध्येन वज्राङ्कुशमत्स्यचिह्नं योऽद्यापि तन्मुष्टिपदं दधाति ॥ १६ ॥

शृङ्गाग्रभाजां सुरसुन्दरीणां मुखानि पश्यन्नमलानि चन्द्रः ।
निगूहितुं नूनमुरःकलङ्कं ह्रियेव यत्सानुपथेन याति ॥ १७ ॥

मनोभिरामे शिखरे तदीये सहोपविष्टं सुरसिद्धसङ्घैः ।
अवोचदागत्य कृतप्रणामा कदाचिदुर्वी कमलाधिवासम्[3] ॥ १८ ॥

पुमानिवाहं भवतः पुरस्ताद् ब्रवीमि किञ्चित प्रतिपद्य धैर्यम् ।
पीडा मदीया परमत्र हेतु[4]र्निर्लज्जता नन्वखिलोपहास्या[5] ॥ १९ ॥

सृष्टास्त्वया दत्तवराश्च दैत्या भारेण मां संप्रति पीडयन्ति ।
बले प्रमाणे च भवन्ति येषां[6] नैवोपमानं [7]कुलभूभृतोऽपि ॥ २० ॥

स्वविक्रमोन्मूलि[8]तराजकानां जयैषिणामद्य परस्परेण[9] ।
तेषां रणक्षोणिषु सिंहनादैर्निर्घातघोरैर्गिरयः स्फुटन्ति ॥ २१ ॥

---

1 N-अनुप्रयान्ति

2 T5-दिधिक्षोः

3 N-कदाचिदागत्य कृतप्रणामा अवोचदुर्वी कमलाधिवासम्

4 M2 M3 N- हेतुं

5 A2 M2 M3 N T5 V. B. अखिलापहास्या

6 A1 A2 A3 M4 T1 - तेषां

7 A3 - नैवोपमानः

8 T1-०मीलित T5-०मूलनराजकाणां

9 A1 N - परस्परस्य

मुहुर्बलादुन्नमयत्यहीन्द्रे मद्भारभुग्नं[1] फणचक्रवालम् ।
मम प्रकम्पाश्चलिताब्धिशैला[2] दिग्दन्तिनो हन्त कदर्थयन्ति ॥ २२ ॥

आशामुखेषु भ्रमता[3]मजस्रं तेषां चमूभिः परिसर्पिणीभिः ।
तिरोहिता[4] भानुमतो[5] मयूखा न क्वापि मां सम्प्रति संस्पृशन्ति ॥ २३ ॥

सन्नाऽस्मि दैतेयभरेण साहं फणीश्वरः सीदति मद्भरेण ।
तद्भारशीर्यं निजकर्परस्य धिक् तामवस्थां कमठेश्वरस्य ॥ २४ ॥

भारावसीदत्फणमण्डलस्य फणीश्वरस्योपरि दुःस्थिताहम् ।
आसन्नपातास्मि तटीव नद्याः[6] प्रवाह[7]वेगेन विलुप्तमूला ॥ २५ ॥

निवेदिता देव ! मया दशेयम[8]नुक्तिदोषो मयि नोपपाद्यः ।
निवेद्यते रक्ष्यजनेन दुःखं ततः परस्तात् प्रभवः प्रमाणम् ॥ २६ ॥

इत्युक्तवत्यामुचितं पृथिव्यां चिन्ताबलेन स्तिमितो मुहूर्तम् ।
मुखानि पश्यन्नमृताशनानां देवः प्रजानां पतिरित्युवाच ॥ २७ ॥

नासत्यमेतद् यदवोचदुर्वी स्वकर्मणः साधु फलं मयाप्तम् ।
मद्वर्धिता मामवमत्य दैत्या बलादुपघ्नन्ति जगन्ति यत्ते ॥ २८ ॥

---

[1] M2 M3-०भग्नं

[2] N-०शैलात्

[3] M2-द्रवतां

[4] P7 P8 P9-तिरोहितां

[5] A2 M2 M3 M4-अंशुमतो

[6] P7 P8-तटीवनाद्याः

[7] T5-प्रवात

[8] T4-मयाऽप्यशेष

अतीतकार्यानुशयेन किं स्यादशेषविद्वज्जनगर्हितेन ।
सुराः! समुन्मूलनमाशु तेषां कर्तुं यतध्वं जगतां[1] हिताय ॥ २९ ॥

सद्यः समुत्तिष्ठत चिन्तयालं चिन्ता हि कार्यप्रतिबन्धहेतुः ।
यामः पृथिव्या सह तत्र यत्र[2] नारायणो दानवकालरात्रिः ॥ ३० ॥

अस्त्वेवमित्यादरपूर्वमेव स स्वीकृतोक्तिः सुरसिद्धसङ्घैः ।
सरोजजन्मा सह तैः प्रतस्थे विहायसा विश्वपतेः सकाशम् ॥ ३१ ॥

एलापरिष्वङ्गलसत्तमालं वेलाधिरूढस्खल[3]दूर्मिमालम्[4] ।
ददर्श धाता मनसोऽनुकूलं पयःपयोधेरचिरेण कूलम् ॥ ३२ ॥

ददर्श च क्षीरमयं समुद्रं कैलासशृङ्गोन्नतफेनकूटम् ।
पुण्यं पयःकेलिसमुत्सुकानां श्रियः सखीनामवगाहनेन ॥ ३३ ॥

आनन्दयामास दिवौकस[5]स्तानाघ्रातशेषो मुनिमण्डलेन ।
प्रकामपुण्यः पवनोपनीतो वैकुण्ठवक्षस्तुलसीसुगन्धः ॥ ३४ ॥

गन्धानुसारेण विसृष्टनेत्रैर्हिरण्यगर्भप्रमुखैरमर्त्यैः ।
नवार्ककल्पं ददृशे मुरारेर्वक्षस्थलीकौस्तुभरत्नधाम ॥ ३५ ॥

---

1 A1-जगतो

2 A1 A2 A3 M2 M3 M4 P6 T2 T3 T4 T5 V. B. यत्र तत्र

3 M2-०स्फरत् T2-०स्खलित०

4 T5-०माल:

5 P7-दिवौकसा:

अपह्नुताशेषमनोविकारं दिविस्पृशा[1] तूर्यरवेण मिश्रम् ।
आकर्ण्य वैकुण्ठविलासिनीनां गीतध्वनिं हर्षमयासिषुस्ते[2] ॥ ३६ ॥

आसत्तिमालक्ष्य[3] विनीतवेषाः स्वमौलिविन्यस्तकराः सुरास्ते ।
आलोकयामासुरशेषनाथं सविग्रहं पुण्यमिव प्रजानाम् ॥ ३७ ॥

प्रवृद्धहेमाभरणप्रकाशं तमालनीलं जलधौ शयानम् ।
तटिल्लताढ्यं पयसोऽतिपानादनीशमु[4]द्गन्तुमिवाम्बुवाहम्[5] ॥ ३८ ॥

तरङ्गवातेन पयःपयोधेरापूर्यमाणं करपाञ्चजन्यम् ।
वामेन तिर्यग्वलता[6] सलीलं संभावयन्तं मुहुरीक्षणेन ॥ ३९ ॥

प्रतिक्षण प्रेमविशेषजाभिः सभावनाभिः कमलासनायाः ।
पुरात्मना कल्पितमम्बुराशेः प्रमार्जयन्तं मथनावमानम् ॥ ४० ॥

पर्यायतः पाणिधृतं सरोजं विन्यस्य विन्यस्य दृशोः पदव्याम् ।
निद्रां प्रबोधं च मुहुर्नयन्तीं पद्मासनां सस्मितमीक्षमाणम् ॥ ४१ ॥

स्वच्छस्वदेहप्रतिबिम्बितेन फणाश्मजालेन फणीश्वरस्य ।
[7]भास्वत्फलस्तोमनिरन्तरस्य वहन्तमाभां वटपादपस्य ॥ ४२ ॥

---

[1] A1 A2 M4 M5 P1 V. B.-दिविस्पृशां

[2] T3-अयादिषुः

[3] T1-आसक्तिमासत्य

[4] N-अशक्तं

[5] T3-Omits the letter म्बु

[6] T4-वलिता

[7] P7-भास्वत्फले

[1]अजस्रमासीनरथाङ्गशङ्खमतिप्रसन्नं कमलाधिवासम् ।
सन्तापविच्छेदकरं प्रजानां ह्रदं महीयांसमिवाभिगम्यम् ॥ ४३ ॥

वक्तुं मिथो राहुविचेष्टितानि [2]कर्णद्वयाभ्यर्णमुपेयिवांसौ ।
अलब्धकालाविव भानुचन्द्रौ रथाङ्गशङ्खौ दधतं[3] कराभ्याम् ॥ ४४ ॥

[4]द्वारस्थसेनापतिचोदितेन निवारिताः कञ्चुकिमण्डलेन ।
सुराः प्रमोदस्खलितैर्वचोभिः स्थित्वैव ते व्योमनि तुष्टुवुस्तम् ॥ ४५ ॥

नमः परस्मै पुरुषाय तुभ्यं गिरां [5]धियामप्यपथि स्थिताय ।
अस्मान् पुनस्त्रातुमुदग्रमोहान् कृपाबलात् कल्पितविग्रहाय ॥ ४६ ॥

भागीरथी पादकुशेशयात्ते विनिर्गता विश्वमिदं पुनीते ।
कस्त्वां पुनर्भावयतो जनस्य शुद्धिं परिच्छेत्तुमलं मनीषी ॥ ४७ ॥

[6]अनन्तशक्तेरपविक्रियस्य तिस्रस्त्रिलोकीश्वर शक्तयस्ते ।
वितन्वते स्थावरजङ्गमानामुत्पादनक्षेमविलोपनानि ॥ ४८ ॥

कटाक्षमात्रेण भवाम्बुराशेः पारं परं [7]प्रापयितुस्त्रिलोकीम् ।
सकृन्नमस्या परमातरस्ते यत्नानुरूपं हि[8] [9]फलं क्रियाणाम्[10] ॥ ४९ ॥

---

[1] N-आसन्न

[2] T3-Omits b, c, and d of 44th verse.

[3] M3 M4-दधता T5-दधत:

[4] A3 Verses 45 to 55 missing.

[5] N-धियां गिरां

[6] M2-Verses 48 and 49 interchanged

[7] N-प्रापयत:

[8] M2-विफलं

[9] T3-Omits फलं

[10] M3-क्रियायाम्

त्वं ज्योतिरापस्त्वमसि त्वमुर्वी त्वं व्योम वैश्वानरसारथिस्त्वम् ।
त्वं जीववर्गः परमस्त्वमात्मा यन्नासि किं नाम जगत्पते! तत् ॥ ५० ॥

नवाभ्रवर्णं नलिनायताक्षं पीताम्बरं हारकिरीटिनं[1] त्वाम् ।
वयं तु सेवेमहि वीक्षमाणाः सायुज्यमन्विच्छति[2] कः सुखार्थी ॥ ५१ ॥

अलं न निर्देष्टुमियत्तया त्वामशेषनाथ[3]! श्रुतिरग्रिमापि[4] ।
स एव साक्षात्क्रियसे[5] पुनस्त्वमहो जितं नः सुकृतैरनल्पैः ॥ ५२ ॥

तृणाय मत्वा निखिलानि शार्ङ्गिन्! पदानि वैधेयमनोहराणि ।
आवृत्तिशून्यं परमं पदं ते वाञ्छन्ति वैराग्यधना महान्तः[6] ॥ ५३ ॥

इति स्तुतो देवगणेन देवो दयानिधिर्दानवकालरात्रिः[7] ।
[8]न्यषीददुत्थाय भरावभुग्ने भुजङ्गतल्पे भुवनैकनाथः ॥ ५४ ॥

विष्वक् स वैकुण्ठविलासिनीनां सलीलमान्दोलितचामराणाम् ।
निवारयन्नग्रकरारविन्दैः कोलाहलं काञ्चनकङ्कणोत्थम् ॥ ५५ ॥

प्रसादवत्या कमलासनादीन् सुरानशेषाननुगृह्य दृष्ट्या ।
उवाच वाचं दशनांशुपूरैः समेधयन् दुग्धमयं पयोधिम्[9] ॥ ५६ ॥

---

1 T3-०किरीटिनः
2 T3-अन्विच्छत
3 M5 T2-अशेषनाथं
4 T3-च
5 T5-साक्षात् क्रियते
6 T3-महन्तः
7 T3-०रात्रिम्
8 V.B.-निषीदत्
9 M2-समुद्रम्

अधिज्यकोदण्डधरो[1] निषङ्गी सन्नाहवान् पाणिधृतैकबाणः ।
अयं समाजो भवतां[2] द्विषद्भ्यो भयं समावेदयति स्फुटं मे ॥ ५७ ॥

अलं विलम्बेन दिवौकसस्त[3]न्निवेद्यतामद्य कुतो भयं[4] वः ।
अयं करो दुष्टवधोत्सुकं मे सुदर्शनं न क्षमते निरोद्धुम् ॥ ५८ ॥

इत्यूचिवांसं परमं पुमांसं नत्वा शिरोभिर्बहुशः सुरास्ते ।
आरूढहर्षातिशयाः[5] स्वमर्थमारेभिरे[6] वक्तुमशेषमेव[7] ॥ ५९ ॥

निवार्य सर्वानपि वक्तुकामान् सेनापतिस्तानमरान् करेण ।
[8]सविभ्रमप्रेरितया पुरःस्थं दृष्ट्या सरोजासनमाजुहाव ॥ ६० ॥

अथागतस्तेन करे गृहीत्वा नीतः प्रभोरन्तिकमब्जयोनिः ।
वक्तुं नियुक्तः स [9]कृतप्रणामो विज्ञापयामास विनीतवेषः ॥ ६१ ॥

वयं त्वया दत्तविभूतयोऽपि मोहातिरेकादभिमन्यमानाः ।
कृच्छ्रे पुनस्त्वां शरणं व्रजन्तो[10] हा निस्त्रपाणां प्रथमे भवामः ॥ ६२ ॥

अपारदुःखार्णवपोतपात्रीं त्वया [11]कृपामुद्वहतातिगुर्वीम् ।
कृतघ्नताजन्मभुवाममीषामस्माकमर्थे न किमन्यभावि[12] ॥ ६३ ॥

---

[1] T1 -कोदण्डशरो
[2] T3 -भवतं
[3] M2 -ते
[4] N -भयं कुतो
[5] A2 -हर्षातिशयं
V. B. -हर्षातिभरा
[6] M2C -समक्षं
[7] M5 -एवम्
[8] M3 -सविभ्रमं
[9] N -विनीतवेषो विज्ञापयामास कृतप्रणामः
[10] N -व्रजन्ते
[11] T2 -कृपं
[12] A3 ends abruptly with verse no. 63.

मनस्विलोकस्य[1] विगर्हणीये प्रतिग्रहे वर्जयता[2] जुगुप्साम् ।
पुरा[3] पुरस्ताद् बलिदानवस्य प्रसारितो नाग्रकरस्त्वया किम् ॥ ६४ ॥

दैत्याधिराजेन हिरण्यनाम्ना पर्याकुलं त्रातुमशेषलोकम् ।
इदं तु दिव्यं परिहृत्य[4] रूपं न त्वं किमासीर्नरतिर्यगात्मा ॥ ६५ ॥

स्वविक्रमाक्रान्तसुरासुरस्य रक्षःपतेर्निग्रहणादरेण[5] ।
भूत्वा सुतः पङ्क्तिरथस्य राज्ञस्तां तामवस्थां न किमन्वभूस्त्वम् ॥ ६६ ॥

अनेकधा पालयितारमेवं संप्रत्यपि त्वां शरणं प्रपन्नाः[6] ।
सन्तापहारी[7] ननु चातकानां भूयोऽपि भूयोऽपि पयोद एव ॥ ६७ ॥

विश्वं विदन्नप्यविदन्निव त्वं नाथानुयुङ्क्षे भयहेतुमस्मान् ।
अनुग्रहस्यैतदपि प्रभूणां प्रायः प्रकारान्तरमाश्रितेषु ॥ ६८ ॥

तपोभिरुग्रैर्भगवन्! सुराणामवध्यभावं[8] दनुजाः प्रपन्नाः ।
पातालमुर्वीं च विजित्य[9] दर्पादुपद्रवन्ते दिवमद्य जेतुम् ॥ ६९ ॥

न जातु शून्यः कुलिशेन पाणिर्वक्षो न मुक्तं मणिकङ्कटेन ।
शक्रस्य दैत्यागतिशङ्किनोऽस्य[10] नासज्जितस्तिष्ठति वारणेन्द्रः[11] ॥ ७० ॥

---

[1] M2 -लोकेन
[2] M2 -वर्जयतां
[3] T5 -पूरे
[4] T1 T4 -परिगृह्य
[5] T3 -निग्रहणाभरेण
[6] T5 -प्रपन्नः
[7] P1 -सन्तापकारी (sic)
[8] P6 T1 T2 T3 T4-अवध्यभाव
[9] M3 -विजत्य
[10] T2 -शङ्कितस्य
[11] P6 P7 P8 P9 T4 -वारणेन्दुः

दण्डं यमात् पाशमपामधीशाद् गदां[1] कुबेरात् कुलिशं मघोनः ।
आदातुकामः प्रहिणोति दूतान् कंसः स्वदोर्विक्रमनिर्जिताशः[2] ॥ ७१ ॥

रणे विनिर्जित्य बलं सुराणां पराक्रमेणाप्रतिमेन वीरः[3] ।
भोजेश्वरः क्रीडति सावरोधो मूलेषु संप्रत्यमरद्रुमाणाम् ॥ ७२ ॥

धनुर्धराध्यासितवप्रशीर्षा द्वाःपालनव्यग्रसमग्रयोधा[4] ।
प्रवीरनिर्भर्त्सितकान्दिशीका स्थातुं न जानाति[5] पुरी सुराणाम् ॥ ७३ ॥

हाहेति विक्रोशदनाथमेतद् विश्वं जगत् पीडयतः प्रकामम्[6] ।
त्वया विनान्यस्त्रिषु विष्टपेषु न कर्तुमीष्टे[7] नरकस्य भङ्गम् ॥ ७४ ॥

प्रलम्बकेशिप्रमुखास्तथान्ये [8]परः सहस्रं परियन्ति दैत्याः ।
निर्घातकल्पै[9]र्निजसिंहनादैर्विदारयन्तो वियदाहवेषु ॥ ७५ ॥

षट् सूनवः सन्ति हिरण्यनाम्नो दैत्यस्य पातालतलाधिवासाः[10] ।
तैर्न क्रियन्ते दुरितानि यानि वक्तुं न शक्यानि मुकुन्द ! तानि ॥ ७६ ॥

तेषां महीध्रप्रतिमाकृतीनां भारं मही सोढुमसावशक्ता ।
अस्मान् पुरस्कृत्य भवत्सकाशं प्राप्ता निजक्लेशनिवेदनाय ॥ ७७ ॥

---

1 P1 -खड्गं
2 T2 -निर्जितेशः
3 M2 -धीरः
4 T5 -०समस्त०
5 M5 -शक्नोति
6 M2 -निकामम्
7 M3 -इष्टे
8 T2 -परा T5 -परसहस्राः
9 M2 M3 T3 -घोरैः
10 P2 P5 P6 P7 P8 T5 -पातालतलाधिवासैः T3 -पातालतलाधिवासः

तदेतदावेदनमस्मदीयं श्रुत्वा प्रमाणं प्रभुरित्युदीर्य ।
विधिर्व्यरंसीद् विहितप्रणामः स चापि गम्भीरमुवाच देवः ॥ ७८ ॥

अलं विषादेन दिवौकसो ! वः समीहितं हस्तगतं मनुध्वम् ।
व्रतं हि मे केवलमेतदेव[1] संरक्षणं यच्छरणागतानाम् ॥ ७९ ॥

मामर्थयन्ते वसुदेवपत्न्यौ पत्नी च नन्दस्य सुतं गुणाढ्यम् ।
अंशद्वयेन[2] व्रतकर्शिताङ्गीस्तिस्रोऽपि ताः पुत्रवतीर्विधास्ये ॥ ८० ॥

इयं च[3] लोकत्रितयस्य माता मायाभिधाना मम शक्तिरग्र्या[4] ।
कार्याणि वः कान्यपि कर्तुमुर्व्या[5] जनिष्यते जन्मविनाशशून्या ॥ ८१ ॥

तद् गच्छत स्वर्गमपेतखेदा न कालहानिः परिशङ्कनीया[6] ।
अनेन शार्ङ्गेण शरैः शरैर्वः सद्यो मनःशल्यमपाकरिष्ये[7] ॥ ८२ ॥

[8]इति तममरलोकं सान्त्वयित्वा स देवः
सपदि नवघनाभः[9] पद्मनाभस्तिरोऽभूत्[10] ।
स च विहितनमस्यस्तस्य वाचं[11] प्रशंसन्
निजपदमभिपेदे हर्षपर्याकुलात्मा ॥ ८३ ॥

॥ इति प्रथमः सर्गः[12] ॥

---

[1] T3 -एवदेव
[2] T3 -अङ्ग०
[3] T5 -हि
[4] M2 -अग्रा
[5] M5 N P1 P2 P5 T5 V. B. -कर्तुकामा
[6] M3 -परिशङ्किनीया
[7] M3 -इव करिष्ये
[8] T4 -Omits verse 83
[9] T3 -हितनमस्यः
[10] M2 -Omits तिरोऽभूत
[11] T1 -वाचः
[12] M3 and T5 end with this canto.

द्वितीयः सर्गः

[1]अथैकदा पुत्रफलानि सम्यग् व्रतानि बाह्योपवने चरन्तीम् ।
रथेन कंसो वसुदेवयुक्तः स्वसारमालोकयितुं जगाम ॥ १ ॥

स्फुरत्प्रभापल्लविताङ्गयष्टिं कथंचिदूढस्तनमञ्जरीकाम् ।
तत्रालकैः षट्पदिनीमजानात्[2] स तां लतामध्यगतां चिरेण ॥ २ ॥

सा सन्नताङ्गी नियमावसाने ज्येष्ठाय तस्मै विदधे नमस्याम् ।
स चाशिषा तामनुगृह्य साध्वीं भोजेश्वरो वाक्यमिदं बभाषे ॥ ३ ॥

अद्यापि बालासि सुताननेकान् प्रसोष्यसे किं व्रतयातनाभिः ।
पश्याधुना पल्लवसूतिकाले किं कल्पते चूतलता[3] फलाय ॥ ४ ॥

कृशासि कामं विरम [4]प्रयासान्मनोभिरामाननुभुङ्क्ष्व भोगान् ।
अङ्गानि ते सन्नतगात्रि ! दुःखं[5] मृणालकल्पानि कथं सहेरन् ॥ ५ ॥

तामेवमुक्त्वा स तु साभ्यनुज्ञां रथं समारोप्य सहैव पत्या ।
प्रयातुकामः पुरमन्तरिक्षे[6] शुश्राव वाचं शतधारकल्पाम् ॥ ६ ॥

त्वदन्तिकस्था सहजाशमी यं प्रसोष्यते पुत्रमयं कृशानुम् ।
मरुत्समिद्धः स तु दुर्निवारस्त्वां भस्मसात् कंस ! करिष्यतीति ॥ ७ ॥

---

[1] T4 -Omits verses 1 to 8
[2] T2 -अजानत्
[3] T2 -कल्पलता
[4] A1, A2, N, P1, P2, V. B. -प्रयासां
[5] M2 -कार्श्यं
[6] P1, P6, T1, T2, T3, T4 -अन्तरीक्षे

निशम्य तद् भूतवचो निकामं कंसः स रोषागमदुर्निरीक्षः[1] ।
कृपां परित्यज्य कृपाणपाणिः स्वसुर्वधाय स्वयमुद्यतोऽभूत् ॥ ८ ॥

नृशंसकृत्ये नितरां प्रवृत्तमुदग्रकोपस्फुरिताधरोष्ठम् ।
प्रसादयन्नानकदुन्दुभिस्तमुवाच धीमानुपपत्तियुक्तम् ॥ ९ ॥

अलं तवानेन वधोद्यमेन त्वया विधेयो नृपते ! विमर्शः[2] ।
किमेष नाश्रावि [3]विमर्शशून्यं व्रजन्त्यनर्था[4] इति साधुवादः ॥ १० ॥

भयेन युद्धेषु पुरन्दरादीन् सुरान् पराचस्त्रपया[5] विमुञ्चन् ।
महीश्वर[6]! स्त्रीवधपातकेऽस्मिन् कथं तवोपक्रमते कृपाणः ॥ ११ ॥

अनेन किं वा तव जीवितेन यद्रक्षणं स्यात् सहजावधेन ।
गुणेन केनापि हि लब्धनाम्नामपि स्वनाशादयशो गरीयः ॥ १२ ॥

अपद्यमानस्य सदाभिवृद्धिं दिवानिशं प्रीणयतश्च[7] लोकम्[8] ।
भवद्यशश्चन्द्रमसोऽस्य मा भून्नवः कलङ्को भगिनीवधेन ॥ १३ ॥

स्वसुर्वधेनास्य भवेदकीर्तिस्तेन [9]त्यजेयुः सुहृदोऽपि भीताः ।
इत्येष[10] नूनं भुजनिर्जितैस्तैः सुरैः प्रयुक्तः सुमहानुपायः ॥ १४ ॥

---

1 N P2 P4 P5 P6 T4 V. B. -दुर्निरीक्ष्यः M5 -दुर्निरीक्षम्

2 V. B. -विचारः

3 A1 M2 M4 M5 N P2 P4 P5 P6 P7 P8, T2 T3 T4 V. B. विचार०

4 T2 -अर्थाः

5 T2 -परांश्च

6 T3 -महीश

7 N P1 -प्रीणयतस्त्रिलोकीम्

8 A2 P2 P4 P5 P6 P7 P8 P9 T4 लोकान्

9 A1 M2 M4 M5 N P1 P6 P7 P8 P9 T1 T4 V. B. -एनं

10 A2 M5 N P2 P4 P5 P6 P8 T1 T2 T3 -इत्येव

कालेन तद्[1] द्रक्ष्यसि[2] यन्मदुक्तं माभूत् तवास्मिन् विषये विशङ्का[3] ।
तथापि चेतस्तव शङ्कते चेदाकर्ण्यतां तर्ह्यपरः प्रकारः ॥ १५ ॥

सर्वाण्यपत्यानि वशे तवाहं जातानि जातानि समर्पयिष्ये ।
तन्निग्रहं वा तदनुग्रहं वा विचिन्त्य[4] कर्तासि दशानुरूपम् ॥ १६ ॥

किं बुद्धिमान्द्येन निजेन तस्य[5] किं भागधेयेन वराङ्गनायाः ।
बलेन किं वा भवितव्यतायास्तथेति जग्राह वचस्तदीयम् ॥ १७ ॥

वधप्रवृत्तो[6] वसुदेवमन्त्रप्रभावसंस्तम्भितघोरकर्मा ।
निवृत्य निस्त्रिंशमहाभुजङ्गो महीभृतः कोशबिलं विवेश ॥ १८ ॥

सत्या नु सा स्यादशरीरिणी वाक् सत्यं किमेतद् वसुदेववाक्यम् ।
वितर्कयन्नेवमुदस्तकेतुं पुरीं प्रपेदे मणितोरणाढ्याम् ॥ १९ ॥

आलोकनैर्मौलिषु भूपतीनामासञ्जयन्नञ्जलिबन्धनानि[7] ।
स वैमनस्येन मुखस्थितेन भयावहः स्वं भवनं जगाम ॥ २० ॥

विशङ्कमानः [8]स्वगृहोपकण्ठे तौ सद्मनि क्वापि विधाय गुप्तौ ।
पराक्रमाक्रान्तसमस्तलोकः पुरेव भोगानयमन्वभुङ्क्त[9] ॥ २१ ॥

---

[1] T1- यद् T4 -च
[2] M2 T2 -द्रक्षसि
[3] M2 N P2 P4 P5 -विषयेपि शङ्का
[4] M4 T4 -विचार्य
[5] A2 M2 M4 M5 N T1 तस्याः
[6] T3 -वधप्रवृत्ता
[7] P6 T1 T2 T3 T4 -आसज्जयन्
[8] P6 T1 T3 T4 -विशङ्कमानस्य
[9] M5 -अन्वभुङ्क्ष्व

माया हरेः साथ हिरण्यपुत्रान् यान् देवकीगर्भगतानकार्षीत् ।
भोजेश्वरः सत्वरमेत्य भीत्या तान् जातमात्रानवधीत् क्रमेण ॥ २२ ॥

जगद्विभूत्यै परमस्य पुंसो[1] यो देवकीगर्भमविक्षदंशः ।
आकृष्य तस्मान्मुरवै[2]रिमाया तं रोहिणीगर्भगतं[3] चकार ॥ २३ ॥

चकास[4] सप्तच्छदपाण्डुरेण[5] सुतेन सा गर्भतिरोहितेन ।
वलाहकान्तर्हितशीतभानोर्दिशो दशां वृत्रजितः प्रपन्ना ॥ २४ ॥

ततः समाह्लादनमीक्षणानामसूत पुत्रं शरदिन्दुकल्पम् ।
[6]प्रकर्षमापन्नुदयेन यस्य सद्यः समुद्रा इव सत्ववन्तः ॥ २५ ॥

पत्युः समादिष्टमिदं[7] विधाय शेषं चिकीर्षुः सुरकार्यमार्या[8] ।
चराचराणां जगतां सवित्री सा श्रद्दधे जन्मभुवं[9] यशोदाम्[10] ॥ २६ ॥

अथ प्रजानामभिवृद्धिकामो[11] देवो दयायाः किल जन्मभूमिः ।
स्वजन्मने जन्मविनाशहेतुः प्राप्यः सतां प्राप स देवकीं ताम् ॥ २७ ॥

कृशावलग्ना कुचयो[12]र्गरिम्णा सा देवकी सन्नतगात्रयष्टिः ।
जगत्रयीपुण्यकृतावलम्बा बभार गर्भेण जगन्निवासम् ॥ २८ ॥

---

1 T2 -पुंसां
2 M2 -सुर०
3 T1 -Omits गर्भ
4 T1 -चकार
5 P1 T1 -पाण्डरेण
6 A1 A2 M4 M5 N P7 P8 P9 T1 T2 -प्रहर्ष
7 T1 T2 T3 T4 -इयं
8 T3 - सुरकार्यमयी
9 M2 -जन्मभवं
10 M5 -यशोदा
11 T3 -अभिवृद्धितमो
12 M5 Picks up from तन्वी of 32a, omitting the rest of verse 28 from गरिम्णा upto जगन्निवासम्

अन्तर्दधाना सरसीरुहाक्षं स्वेनावतारेण[1] भुवं पुनाना ।
सा देवकी सा च कवेरकन्या मिथोऽदधा[2]तामुपमानभावम् ॥ २९ ॥

अलं निवासाय न यस्य विश्वं वसन् स गर्भे मुमुदे[3] मुकुन्दः ।
परोपकारप्रभवं हि दुःखं पुंसः सुखायैव महत्तरस्य[4] ॥ ३० ॥

बहिः स्फुरन्त्या करपाञ्चजन्यत्विषेव विष्णोरुदरस्थितस्य ।
अधत्त[5] तस्यास्तपनीयवर्णा[6] मधूकपुष्पच्छविमङ्गयष्टिः ॥ ३१ ॥

बभार हारं कुचयोर्न तन्वी न पादयोर्नूपुरमामुमोच ।
दधौ मणिं भारभिया न मौलौ तदेव कैवल्यमभूषयत् ताम् ॥ ३२ ॥

दृशः प्रयत्नेन ददौ[7] तिरश्चीरुवाच मन्दं निभृतं जहास ।
शनैर्ययौ दत्तकरा सखीभिर्भृशं निशश्वास च तावतैव[8] ॥ ३३ ॥

सहैव हर्षेण सुधाशनानां सहैव पुण्येन[9] वसुन्धरायाः ।
भयेन भोजाधिपतेश्च देवः सहैव गर्भे ववृधे मुकुन्दः ॥ ३४ ॥

शिरोभिरूढेन वनस्पतीनां फलोपहारेण निवेदितर्द्धिः ।
प्रावृट् समासादितसूतिकालां[10] तां देवकीं द्रष्टुमिवाजगाम ॥ ३५ ॥

---

[1] M5 - अवकाशेन
[2] T2 - दधातेनपमानभावं
T3 - दधातावुपमानभावं
[3] T1 - ववृधे
[4] T3 - महत्तमस्य
[5] T3 - आधत्त
[6] P6 T2 T4 - तपनीयवर्णं
[7] A2 M4 P1 P2 P4 P5 P6 P7 P8 T3 T4 VB- दधौ
[8] M5 P2 P5 VB - तावदेव
[9] T3 - पुण्ये
[10] T2 - सूतिकाले

अथैकदेशा इव वारिराशेरुच्चैः पुरोमारुतविप्रकीर्णाः ।
घृतास्तटिद्वि[1]द्रुमवल्लरीभिर्विरेजिरे[2] व्योमनि वारिवाहाः ।। ३६ ।।
वलाहकव्रातभवैस्तमोभिर्दिनेषु दुर्बोधपुरःस्थितेषु ।
न कश्चिदासीदभिसारिकाणां विद्युत्प्रकाशेन विनान्तरायः ।। ३७ ।।
पयोदभस्त्रा[3]न्तरनिर्गतेन झात्कारिणा[4] चण्डसमीरणेन[5] ।
वियोगिनां चेतसि मेघकालः संधुक्षयामास मनोभवाग्निम् ।। ३८ ।।
स्मरेण लोकत्रितयेश्वरेण सम्भाविताज्जीवितनिर्विशेषम् ।
ऋतोर्वसन्ताज्जलदागमस्य जहार जाति[6]र्निखिलं निकर्षम्[7] ।। ३९ ।।
बलाद् गृहीता इव[8] वैतसीभिः शाखाभिरारूढमदा इवोच्चैः ।
परिस्खलन्त्यो निखिलस्तटिन्यो जग्मुर्जवादुद्भटफेनहासाः[9] ।। ४० ।।
[10]उदारसौरभ्यवशीकृतानामन्वीयमानः पटलैरलीनाम् ।
अकल्पयत् केतकमातरिश्वा मनोभवस्यापि मनोविकारम् ।। ४१ ।।
अत्यम्बुपानप्रभवस्य कर्तुमन्त[11]र्जडिम्नः[12] प्रतिसंविधानम् ।
पपुस्तिरस्कारपदेन मेघा मयूखमालामरविन्दबन्धोः ।। ४२ ।।

---

1 M2 - विभ्रम०
2 T1 - मञ्जरीभिः
3 T2 - ०भस्त्रान्तर०
4 P1 - झाद्रकारिणा
5 T3 - समीरणे
6 A2 - जातीं M5 P1 - जाति
7 T2 - नकर्षं
8 A1 - Omits इव M2 M4 N P7 P8 P9 T1 - अपि
9 A2 - फेनहासं
10 N T4 -पराग
11 T3 - अन्तरु
12 M5 P1 P6 P7 T1 T4 - जटिम्नः
T2 - जलिम्नः
T3 - जरीम्नः

रराज खर्जूरफलप्रकाशं नवं पयः काननपल्वलेषु ।
पयोदवृन्दैः[1] परिपीय मुक्तं प्रभाकरस्येव मरीचिजालम् ॥ ४३ ॥
महीभृतां मूर्धसु दत्तपादं[2] विलोक्य मित्रं [3]विहतप्रतापम् ।
मग्ने जले मर्तुमिवारविन्दे मधुव्रताश्रुक्रुशुरन्तरिक्षे[4] ॥ ४४ ॥
निषेव्य हंसा मधुरैर्वचोभिः पद्माकरं लब्धसमीहितार्थाः ।
सद्यो ययुस्तस्य विपत्तिकाले जलाशयानां प्रकृतिः किलैषा ॥ ४५ ॥
प्ररूढसस्याः[5] फलमूलशाखैर्निरन्तराः[6] स्वादुनवोदकाढ्याः[7] ।
पल्लीजुषां[8] चेतसि पामराणां धृतिं परामादधिरे वनान्ताः ॥ ४६ ॥
समुन्मिषन्ती गिरिमल्लिकानां प्रसूनराजिः सुतरां विरेजे ।
मुक्त्वा[9] नभो मेघविमर्दभीत्या नक्षत्रमालेव गता धरित्रीम् ॥ ४७ ॥
धारालजीमूतकृतान्धकारे तस्मिन्नपर्यन्तजडिम्नि काले ।
अलक्ष्यमाणः[10] क्वचिदंशुमाली दिवाप्युवासेव तनूनपाति ॥ ४८ ॥
इति प्रवृत्ते[11] समये घनानां मासे नभस्ये[12] निशि मध्यमायाम्[13] ।
गणे शुभाख्यायिनि च ग्रहाणां देवक्युवाह प्रसवाभिमुख्यम्[14] ॥ ४९ ॥

---

[1] M2 N P2 P4 VB - बृन्दैः
[2] T1 - बद्ध
[3] M2 - विगत°
T2 T3 - विहित
[4] P1 P6 T1 T2 T3
T4 - अन्तरीक्षे
[5] M5 - प्ररूढसस्यात्
[6] A1 T2 - निरन्तर
[7] M5 - नवोद्कास्यात्
[8] A1 M2 M4 M5 T2 T3 - चुल्लीजुषां
[9] T4 - दुःखान्
[10] M2 - अदृश्यमानः
T2 - अलक्षमाणः
[11] M4 - प्रवृद्धे
[12] T3 - नभस्यां
[13] M5 - मध्यमायाः
[14] M5 - °मुख्यः

हरत्सु बाह्यं भुवनस्य तापं प्रावृट्प्रसूतेषु वलाहकेषु ।
असूत तस्यान्तरतापशान्त्यै कृष्णाम्बुवाहं कृपयेव देवी ॥ ५० ॥
दिशः प्रसेदुः सह निम्नगाभिर्जहर्ष लोकेन सहाम्बुराशिः ।
जाते मुकुन्दे मुमुचुश्च सद्यो भयेन देवाः सह पुष्पवर्षम्[1] ॥ ५१ ॥
मनोभिरामेण मधुव्रतानां नादेन शंसन्निव[2] दिष्टवृद्धिम्[3] ।
चचार वायुः सुमनोंऽशुकानि सम्प्राप्य सम्प्राप्य महीरुहेभ्यः ॥ ५२ ॥
व्यजृम्भत[4] प्रस्फुटशङ्खनादस्तारेण गीतध्वनिना विमिश्रः[5] ।
समश्नुवानः ककुभां मुखानि दिवौकसां मङ्गलतूर्यघोषः ॥ ५३ ॥
त्रपामपास्यन् विनयं विलुम्पन् नीतिं निगृह्णन् भयमाशु भञ्जन् ।
शरीरिणामच्युतजन्मजन्मामोदो जजृम्भे मदनिर्विशेषः ॥ ५४ ॥
आषाढिनं पाणिमुदस्य दूरं ब्रह्मर्षिलोकः[6] पतदुत्तरीयः[7] ।
ननर्त पर्याकुलपादचारः प्रहस्यमानः सुरसुन्दरीभिः ॥ ५५ ॥
शृङ्गोज्झितैः[8] कुङ्कुमवारिपूरैरन्योन्यमभ्युक्षणतत्पराणाम् ।
प्रमोदजन्मा दिवि सम्बभूव[9] कोलाहलः कोऽपि सुधाशनानाम् ॥ ५६ ॥

---

1 M2 N P1 P2 P4 P5 P6 P7 P8 P9 T2 - वृष्टिम्
2 T4- निज
3 M4 - दिष्टि
4 VB - विजृम्भत
A2 ends with verse 54
5 T3 - विमिश्रन्
6 M2 - °वर्गः
7 A2 M5 T3 - उत्तरीयम्
8 P7 P8 - उच्छ्रितैः
9 T3 - संबभाव

पितॄंश्च पुत्राः पितरश्च पुत्रान् गुरूंश्च शिष्या गुरवश्च शिष्यान् ।
पतींश्च दाराः पतयश्च दारान्[1] प्रमोदमत्ताः सिषिचुः पयोभिः ॥ ५७ ॥

असिञ्चदम्भोरुहयोनिरिन्द्रं तं पङ्कजावासमसिञ्चदिन्द्रः ।
असिञ्चतां[2] द्वौ[3] विबुधानशेषान् सर्वे सुरास्तौ[4] च बलादसिञ्चन् ॥ ५८ ॥

मिथः पयोभिः सिषिचुर्विनेदुः [5]ववल्गुरुच्चिक्षिपुरम्बराणि[6] ।
अन्योन्यमंसेन [7]सुदूरमूहुर्मत्ता[8] इव स्वर्गसदो बभूवुः ॥ ५९ ॥

त्रिलोकनाथोदयसम्भवेन मोदेन पर्याकुलमानसानाम् ।
गीते च नृत्ते च सुराङ्गनानां बभूव तालस्खलितं न दोषः ॥ ६० ॥

शृङ्गोदकास्फालनरक्तनेत्रा विच्छिन्नहाराश्च्युतकर्णभूषाः ।
प्रहाससीदध्वनिभिर्वचोभिः समालपन्तो विबुधा विजह्रुः ॥ ६१ ॥

जाते हरौ दैत्यविमर्दनेन विश्वम्भराभारमपाचिकीर्षौ ।
मुनेः प्रहर्षः कलहप्रियस्य जगत्प्रहर्षश्च समावभूताम् ॥ ६२ ॥

इति प्रहर्षाकुलितैर्मनोभि[9]र्विशृङ्खलं क्रीडति देहिवर्गे ।
कंसः सभृत्यः प्रतिपद्य मूर्च्छां निद्राभिधानां न किमप्यबोधि ॥ ६३ ॥

---

[1] T3 - वरान्

[2] M2 N P1 P2 P4 P5 P6 T1 T2 T4 VB - आसिञ्चतां

[3] P7 P8 P9 - तौ

[4] T1 - ते

[5] N P1 P7 P8 P9 T4 VB - जहर्षुः

[6] M2 - उच्चैः समुच्चिक्षिपुः

[7] T1 सदूरम्

[8] T3 - मुक्ता
T4 - भ्रान्ता

[9] T1 - वचोभिः

श्यामं चतुर्बाहुमुदारहारं किरीटिनं कुण्डलदीप्तगण्डम्[1] ।
पिता च[2] माता च विलोक्य पुत्रमानन्दमग्नौ विवशावभूताम् ॥ ६४ ॥

नियम्य हर्षोदयपारवश्यं तं देवकीजानिरुवाच वाचम् ।
प्रसीद भीतोऽहमतीव कंसादिदं तु रूपं प्रतिसंहरेति ॥ ६५ ॥

तत्प्रेरितस्तल्पगतं कराभ्यां तमाददे कल्पितबालभावम् ।
तयोः शयानः करयोः स तस्य प्रकाममप्रीयत[3] पद्मनाभः ॥ ६६ ॥

अशेत यः प्राग्वटपत्रमध्ये[4] लोकानशेषानुदरे दधानः ।
विना तपोभिः किमु[5] तस्य सिद्ध्येत् तत्पाणियुग्मे शयनं मुरारेः ॥ ६७ ॥

तमालनीलेन तमोभरेण निपीडिताशावलये निशीथे ।
आदाय पङ्केरुहलोचनं तं सद्यः स निर्गत्य गृहात्[6] प्रतस्थे ॥ ६८ ॥

निवार्य वर्षोदकमात्मनैव[7] प्रकाश्य मार्गं फणरत्नभासा ।
उपायमुक्त्वा वसुदेवकर्णे शेषः सिषेवे[8] बहुधैव विष्णुम् ॥ ६९ ॥

पुरात् स निर्गत्य पुमांसमाद्यं वहन् वहन्तीं यमुनामपश्यत् ।
कूलंकषौघापि[9] कलिन्दकन्या तदीयगुल्फद्वयसोदकाभूत् ॥ ७० ॥

---

[1] M2 - ⁰दीप्र⁰
P6 T1 T3 T4 - ⁰दीप्ति⁰
[2] P2 P4 P5 P6 - अपि
[3] T3 - अप्रीय
[4] T3 - adds तत्पाणियुग्मे शयनं मुरारेः
[5] T2 T4 - किल
[6] P1 - पुरात्
[7] N - आत्मनीयं
[8] T1 - सिषेचे
[9] M2 - ⁰कषापापि

उत्तीर्य तां तत्तटसंश्रितानां दातुं करं वार्षिकमागतानाम् ।
व्रजौकसां नन्दपुरोगमानां प्रीतो निवेशं[1] सहसा विवेश ॥ ७१ ॥
प्रविश्य जानन्निव नन्दगोपनिवेशनं सुप्तशरीरिवर्गम्[2] ।
सुतां प्रसूय प्रतिपन्ननिद्रां ददर्श तद्धर्मवधूं यशोदाम् ॥ ७२ ॥
तं शाययित्वा शयने तदीये कन्यां समादाय निवृत्य[3] गच्छन् ।
शुश्राव पुत्रोदयहर्षमूलं कोलाहलं गोपवधूजनानाम् ॥ ७३ ॥
करेण कन्यां मनसा च पुत्रं वहन् मुहूर्तेन विलङ्घ्य मार्गम् ।
विशङ्कमाविश्य गृहं गृहिण्या निधाय बालां शयने स[4] तस्थौ ॥ ७४ ॥
सा [5]चञ्चरीकस्वनसन्निभेन नादेन लोकस्य मनो हरन्ती ।
रुरोद किंचिद् विवृतेन बाला [6]स्फुटत्पयोजाकृतिना मुखेन ॥ ७५ ॥
आकर्ण्य बालध्वनिमस्तनिद्राः प्रधाव्य रक्षापुरुषा जवेन ।
प्रबोध्य[7] यत्नेन पतिं पृथिव्याः शशंसुरस्मै भगिनीं प्रसूताम् ॥ ७६ ॥
[8]सद्यः समागत्य स तत्र दृष्ट्वा बालाममर्षेण विमर्शशून्यः ।
स्वस्रा निरुद्धोऽपि[9] वधाभिलाषी जग्राह तस्याश्चरणौ कराभ्याम् ॥ ७७ ॥

---

[1] A1 M4 T1 T2 - निवासं
[2] P4 - ०शरीर०
[3] P2 P4 P5 P6 P7 P8 T1 T4 - निपत्य
[4] T2 T3 - अथ
[5] T1 T2 - चञ्चुलीक
P1 T3 - चञ्चलीक
[6] N P1 P2 P4 P5 P7 P8 P9 - स्फुरत्
[7] T3 - प्रबोध
[8] M5 - Omits this verse
[9] M2 M5 N P1 P2 P4 P5 P6 P7 P8 T2 T4 VB - निषिद्धः

उदस्य दूरं तरसा[1] करेण चिक्षेप तां दुर्मतिरश्मपृष्ठे ।
महीमयातैव दिवि स्थिता सा जज्वाल धाम्ना जगतां सवित्री ॥ ७८ ॥
ततः करैस्तामरसप्रकाशैः सा [2]मन्दमन्दान्दोलित[3]शस्त्रजाला[4] ।
विलोक्य तं विह्वलचित्तवृत्तिं जगाद वाचं जगदेकमाता[5] ॥ ७९ ॥
त्वमग्रहीर्मच्चरणौ रुषापि प्रापः[6] फलं तस्य न हन्मि यत्त्वाम् ।
जातः पृथिव्यां तव जाल्म हन्ता सद्यो हितं चिन्तय साधयामि ॥ ८० ॥

इति नृपमभिधाय ज्योतिषा कुर्वती सा
तटिदिव नयनानि प्राणिनामाकुलानि ।
सुरयुवतिभिरुच्चैर्गीयमानापदाना
सुरपदमभिपेदे पाटिताभ्रा जवेन ॥ ८१ ॥

श्रुत्वा तस्याः श्रवणपरुषां वाचमन्तर्विषण्णः
पुत्रापाय[7]व्यथित[8]मनसं[9] सान्त्वयित्वा स्वसारम् ।
पद्भ्यामेव स्वभवनमथ प्राप्य कृच्छ्रादनैषीत्
कंसश्चिन्ताकुलितहृदयो जाग्रदेव त्रियामाम् ॥ ८२ ॥

॥ इति द्वितीयः सर्गः ॥

---

[1] VB - सहसा
[2] T2 - समन्दं
[3] T1 - अन्दोलित
[4] P2 - ⁰शाला
[5] A1 - जगदैक⁰
[6] A1 - Omits प्रापः
N1 P1 - प्राप्तं
P4 ends with this canto.
P7 P8 P9 - प्राप्तः
[7] M5 - पुत्रापायं⁰
T1 - पुत्रापायात्
[8] T1 - व्यधित⁰
[9] VB - ⁰व्यधितमनसां

तृतीयः सर्गः

प्रातः प्रलम्बप्रमुखानमात्यान् सर्वान् समाहूय स भोजराजः ।
सविभ्र[1]मप्रेरितदृष्टिदत्ते[2] स्थाने निषण्णानवदद् विनीतः ॥ १ ॥
सन्दिह्य मोहाद् वसुदेववाक्यं मया प्रमाणीकृतभूतवाचा[3] ।
हता नृशंसेन सुता भगिन्यास्तेनाविलं[4] मे हृदयं यशोऽपि[5] ॥ २ ॥
जातां पुनः काञ्चनकाञ्चनाभां सुतां गतायु[6]र्निशि हन्तुमैच्छम्[7] ।
उत्प्लुत्य[8]सा व्योम्नि जवादतिष्ठच्छस्त्रोत्कटा[9] दर्शितदिव्यरूपा ॥ ३ ॥
नियम्य सा मातुल इत्यमर्षं प्रसेदुषी मामवदच्च बाला ।
अरिर्महीयानजनिष्ट भूमौ तवोचितं संप्रति चिन्तयेति ॥ ४ ॥
व्याहृत्य[10] तस्यामिति मां गतायां द्यां देवनारीजनसेवितायाम् ।
विचिन्तयन् दुश्चरितं मदीयमहं विनिद्रो रजनीमनैषम्[11] ॥ ५ ॥
युद्धेषु देवाः पुरुहूतमुख्या भग्ना मया स्थातुमशक्नुवन्तः[12] ।
अश्वान् परित्यज्य विमुच्य नागान् मुक्त्वा च शस्त्राणि दिशो द्रवन्ति ॥६॥
तदेषु नैकोऽपि भुवं गतो मे शक्नोति कर्तुं प्रतिकूलभावम् ।
महीयसः[13] किं घटते परागः[14] समीरणस्याभिमुखं[15] प्रसर्तुम्[16] ॥ ७ ॥

---

[1] T3 - सविक्रम

[2] T4 - °दृष्टिपादे

[3] M5 °वाचः

[4] T3 - तेनाखिलं

[5] M2 - च

[6] M2 T2 - गतायां

[7] M4 M5 - ऐच्छत्

[8] A1 M2 M4 M5 N P1 P7 P8 T1 T2 T3 VB- उत्पत्य

[9] T1 T2[2] उद्भटा

[10] P2 P5 P6 P7 P8 P9 4 व्याहृत्य मां द्यां प्रति देवनारी-गणैर्गतायामिति सेवितायाम् । देव्यामहं दुश्चरितं स्वमेव स्मरन् विनिद्रो रजनीमनैषम् ॥

[11] M5- अनीषम्

[12] T1- अशकतवन्तः

[13] M5 महीयसं

[14] M5 परागं

[15] P1- अभिसुखं (Sic)

[16] N P2 P5 P6 T1 T2 T4- प्रसक्तुम्

किमन्यदार्ताभ्यवपत्ति[1]कामः सुरेषु सन्दर्शितपक्षपातः ।
अजायतोर्व्यामसुरान् निहन्तुं[2] स एव मन्ये सरसीरुहाक्षः ॥ ८ ॥

सर्वे वयं दैत्यकुलप्रसूताः केनापि जाता भुवि कारणेन ।
स तेन[3] सन्नह्यति जेतुमस्मानुक्तोऽयमर्थः किल नारदेन ॥ ९ ॥

अतस्तदुच्छेदविधौ विनिद्रा यतध्वमद्यैव बलानुरूपम् ।
नखाग्रलाव्यस्त[4]रुरङ्कुरात्मा परश्वधस्यापि ततोऽतिभूमिः[5] ॥ १० ॥

यस्मिन् भवत्याश्रितवत्सलत्वं विप्रेषु यस्यास्ति विशेषसङ्गः ।
मनोहरं यश्च बिभर्ति रूपं वधं स बालोऽर्हति वः[6] सकाशात् ॥ ११ ॥

मखाश्च तत्प्रीतिकरा[7] निवार्या निवारणीया श्रुतिरग्रिमापि[8] ।
तृणीकृताशेषजनप्रभावा संस्तौति या तन्महिमानमेव ॥ १२ ॥

गते विरामं गरुडध्वजेऽस्मिन् मखेषु सर्वत्र निवारितेषु ।
सुरेषु सर्वेष्वपि दुर्बलेषु हस्ते भविष्यत्यमरावती नः ॥ १३ ॥

इत्यूचुषस्तस्य[9] पदोपकण्ठं[10] नीराजयन्तो मकुटप्रभाभिः ।
अवादिषुर्विक्रमदर्पितास्ते कृताट्टहासध्वनिकम्पिताशाः ॥ १४ ॥

---

1 M2- अभ्युपपत्ति
2 T2- विहन्तु
3 T2- तेनैव
4 M2 M4 M5 P1 P2 P5 P7 P8 P9 VB- नखाग्रलव्यः
5 M5 T3- अतिभूतिः
6 P2 P5 P6 P7 P8 T3 T4-मत्
7 M2 P2 P5 P6 P7 P8 T2 T3 T4- प्रीतिकृतो
8 T2 T3 - च
9 A1 M4 P2 VB- इत्यूचिषः M5- इत्यूचिषुः
10 M4 P1- पदोपकण्ठे

किं चिन्तया पार्थिव भुङ्क्ष्व भोगानस्मासु जीवत्सु कुतो रिपुस्ते ।
कथं मयूखेषु परिस्फुरत्सु[1] सरोजबन्धोस्तमसाभिभूतिः ॥ १५ ॥

अमातरिश्वानमहव्यवाहमसूर्यशीतांशुमवज्रपाणिम् ।
अनच्युतेशानपितामहं च द्रष्टासि राजन्नचिरेण लोकम् ॥ १६ ॥

[2]इत्यूचुषस्तानुचितोपचारैः संभाव्य कृत्येषु समादिदेश ।
स देवकीमानकदुन्दुभिं च विमोचयामास च बन्धनस्थौ ॥१७॥

लब्ध्वा निधानं न तथा दरिद्रो गतिं समासाद्य तथा न पङ्गुः ।
तथा[3] न चान्धो दृशमाप्य हृष्येद् यथाप्तपुत्रः स [4]जहर्ष नन्दः ॥ १८ ॥

तपने चरमाचलं प्रपन्ने तमसा च स्थगितेषु दिङ्मुखेषु ।
यमुनातटवासिनं तमूचे वसुदेवः प्रतिपद्य नन्दगोपम् ॥ १९ ॥

तपसा तव नन्दगोप मन्ये फलितं जन्मसहस्रसञ्चितेन ।
ऋणमन्त्यमपोहितुं[5] त्वदीयं यदयं पुत्रनिधिः समाविरासीत् ॥ २० ॥

इह खेलति पूतनेति कृत्या शिशुहत्यानिरता पुरोपकण्ठे ।
तदहर्निशमत्र रक्षणीयो नयनानन्दकरः सुतस्त्वयायम्[6] ॥ २१ ॥

---

1 P1- परित्स्फरत्सु
2 A1 M4 P2 VB- इत्यूचिष
3 T3- यथा
4 T3- हर्षे
5 VB- अपोहयितुं
6 VB- यः

अथवा किमिवास्यते त्वयास्मिन् निजमुत्सृज्य पदं पुरोपकण्ठे ।
सविधे न वसन्ति बुद्धिमन्तः फणिनो वायुसखस्य भूपतेश्च ॥ २२ ॥
प्रतिवेदि [1]निविष्ट[2]पूर्णकुम्भं विलसत्तोरणमुज्वल[3]प्रदीपम् ।
व्रज गोकुलमाकुलं प्रजाभिर्भवदीयागमनप्रहर्षिणीभिः[4] ॥ २३ ॥
शिशुरस्ति ममापि रौहिणेयो भवदीये विषये विवर्धमानः[5] ।
स च साधु निरीक्ष्य रक्षितव्यो[6] वपुषा केवलमावयोर्हि भेदः ॥ २४ ॥
इत्युक्त्वा गतवति देवकीसहाये सन्त्रस्तः कथमपि [7]नीतरात्रिशेषः ।
आरोहत्युदयमहीधरस्य शृङ्गं तिग्मांशौ निजवसतिं प्रति प्रतस्थे ॥ २५ ॥
स[8] चकितमृगमण्डलानि कुर्वन् [9]शकटशतध्वनिभिर्वनान्तराणि ।
प्रमुदितमथ गोकुलं प्रपेदे दिशि दिशि मारुतधूतकेतुमालम् ॥ २६ ॥
निजवसतिमभिप्रपद्य तुष्टः किमपि न कर्म चकार[10] [11]नन्दगोपः ।
नवनलिनपलाशचारुनेत्रं वदनमहर्निशमात्मजस्य पश्यन् ॥ २७ ॥
मुग्धभावमधुरेण रञ्जयन् शैशवेन हृदयं व्रजौकसाम् ।
गोकुले स विजहार केशवः क्षीरवारिनिधिमप्यचिन्तयन् ॥ २८ ॥

---

1. P1-प्रतिवेद
2. M4 P1 T4-निषण्ण
3. P1 P7-उज्वलत्
4. M2-प्रहर्षणीभिः
5. M2-विषयेपि वर्धमानः T1-विषये वर्धमानः
6. M2 M5-रक्षणीयो
7. T3- कथमपनीत०
8. T3-स्व
9. M2 N-शकटपटु०
10. A1 P2 P5 P6 P8-करोति
11. P5-Omits नन्द

वदनं मधुसूदनः कराभ्यां चरणाङ्गुष्ठमुपानयत् पिपासुः ।
गलितेव ततः सुरस्रवन्ती नखमुक्तामणिदीधितिच्छलेन ॥ २९ ॥
अमृतांशुरिवापरः प्रमोदं नयनानां जनयन् स पद्मनाभः ।
भवनं[1] भवनात् करौ कराभ्यां व्रजयोषिद्भिरनीयताङ्कमङ्कात् ॥ ३० ॥
अथः कदाचिच्छकटस्य शायितः स्वकार्यपर्याकुलया यशोदया ।
सलीलया पादसरोरुहं शनैरुदञ्चयामास [2]सरोजलोचनः ॥ ३१ ॥
मधुभिदश्चरणाम्बुजताडितं शकटमाशु समुत्थितमम्बरे ।
विपरिवृत्य[3] पपात महीतले पटुतरध्वनिपूरितदिङ्मुखम् ॥ ३२ ॥
शकटपतनजन्म नन्दमुख्याः स्तनितमिव ध्वनितं निशम्य गोपाः ।
किमिदमिति भयेन [4]तत्र जग्मुस्त्वरितगतिच्यवमानकेशबन्धाः ॥ ३३ ॥
कुचकलशविलग्नपाणिपद्मा विगलितबन्धमनोज्ञकेशपाशा[5] ।
सपदि सह सखीभिरन्वधावत् कलमणिनूपुरशिञ्जिता[6] यशोदा ॥ ३४ ॥
कृतस्मितं क्वचिदपरिक्षतं सुतं विलोक्य तं[7] प्रमुदितमानसा[8] परम् ।
व्रजौकसां[9]सविधनिवासिनां मुखाद् विसिष्मिये[10]विदिततदीयविक्रमा॥३५॥

---

1 M2 VB- भवनात् भवनं
2 T4- पयोज
3 P7- परिविवृत्य
4 T3- Omits तत्र
5 T1- विगलितमनोज्ञकेशबन्ध-पाशा
6 M2 N- ⁰शिञ्जितं⁰
7 M4- सं
8 P2 P5 VB- ⁰मानसं
M5 T1 T2- ⁰चेतसः
T3 T4- ⁰चेतसा
9 M5 व्रजौकसः
10 A1 P2 P5 P6 P8- विसिस्मिये
T1 T2 T3 T4- प्रविस्मिता

स्नुतशोणितमेव मन्यमाना चरणं तस्य निसर्गपाटलं तत् ।
उदमार्जयदंशुकाञ्चलेन द्रुतमागत्य पुनः पुनर्यशोदा ॥ ३६ ॥
तिलकं मधुविद्विषो ललाटे रजसा गोमयजन्मना विधाय ।
उरसा परिरभ्य नन्वगोपः सुचिरं तस्य[1] सुमङ्गलानि[2] दध्यौ ॥ ३७ ॥
शकटं मधुसूदनस्य दृष्ट्वा चरणोदञ्चनविभ्रमेण[3] भग्नम् ।
अथ वारिनिधेर्विवेश गर्भं स्वरथस्यापि विशङ्कय भङ्गमर्कः ॥ ३८ ॥
परितः स्फुरता नवेन सन्ध्यामहसा पल्लवपाटलेन लिप्ताः ।
पतिता इव पावके विरेजुः ककुभो दुःसहभानुविप्रयोगात्[4] ॥ ३९ ॥
क्षुभितश्चिरमम्बराम्बुराशिः तपनस्यन्दनवाहनावगाहात्[5] ।
स्फुरदुद्भटतारकापदेशात् सहसाकीर्यत फेनमण्डलेन ॥ ४० ॥
अहिमरुचि रसातलं प्रविष्टे भयविवशः[6] स्वविनाशमाकलय्य ।
तत इव तरसोत्पतन्नसीमा तिमिरभरः[7] पृथिवीतलं प्रपेदे ॥ ४१ ॥
भूरन्तरिक्षं[8] भवनानि[9] रथ्या वनानि शैलाः सरितः समुद्राः ।
ध्वान्ते दिशां रुन्धति चक्रवालं व्यक्तं न केनापि किमप्यवेदि[10] ॥ ४२ ॥

---

1 P1-तस्स
2 M2 T1 T2-स मङ्गलानि
3 T2 चरणोदञ्चविभ्रमेण
4 A1 M5 P7 P9 T1 T2-विप्रयोगाः
5 T1-०वाहनावगाहान्
6 M2 M4 M5 N P1 P2 P5 P6 P7 P8 P9 T1 T3 T4-भयचकितः
7 VB-तिमिरतरः
8 M5-भूभ्यन्तरिक्षं
9 A1 M4 M5 N P1 VB-भुवनानि
10 M4 N P1-अबोधि

अथ प्रयाति प्रहरे यशोदा जने च किञ्चिन्निभृते सनिद्रे ।
पुत्रं पयःपानगुरुप्रमोदं प्रस्वापयन्ती कलमित्यगायत् ॥ ४३ ॥

कुन्दत्विषस्तालफलप्रकाशा[1]स्तापिञ्छवर्णास्तरुणार्कभासः ।
प्रभूतदुग्धा नवनीतवत्यो गावः सहस्रं तनय त्वदीयाः ॥ ४४ ॥

प्रियालखर्जूरसमग्रसानुः फलाढ्य[2]रम्भावनलोभनीयः[3] ।
ननूपभोगाय सुतायमास्ते गोवर्धनो नाम महीधरस्ते ॥ ४५ ॥

सरसिरुहवने गतेऽपि[4] निद्रां[5] कथमिव ते नयनाम्बुजे विनिद्रे ।
श्रुतिपरिचयशालिनो हि कर्म स्वजननिषेवितमेव संश्रयन्ते ॥ ४६ ॥

तद् ध्वनिश्रवणजातकौतुका बालजीवितविलोपवि[6]श्रुता ।
आजगाम गगनेन पूतना यातना तनुमतीव देहिनाम् ॥ ४७ ॥

सावतीर्य नभसो निशाचरी गूढमेव निषसाद कुत्रचित् ।
सा च सुप्त[7] इव लक्षिते[8] सुते स्वापमाप[9] सरसीरुहेक्षणा ॥ ४८ ॥

कृष्णमङ्कमधिरोप्य निर्दया दातुमारभत पूतना स्तनम् ।
यत्पयोधरमुखे मुखार्पणादायुषा शिशुजनो[10] वियुज्यते ॥ ४९ ॥

---

1 M2- तालतयप्रकाशाः
2 P1- फलान्या०
3 N- ०लोभनीया
P2 P5 P6 P8 T1
T3-शोभनीयः
4 VB- च
5 M2 N-गते विनिद्रां
M5-गते विनिद्रे
6 T2- ०जीवितलोप
7 P6- गुप्त
8 P1 P2 P5 P6 T3
T4-वीक्षिते
9 T2-भास
10 P1-शिशुजने
A1 ends with verse no. 44

पाञ्चजन्यमिव पूतनास्तनं पाणिपल्लवयुगेन पीडयन् ।
आननेन मधुशत्रुरान्तरानाददे[1] स तु ततः समीरणान् ॥ ५० ॥
विप्रकीर्णकचबालपल्लवा [2]भग्नबाहुविटपा निशाचरी ।
सा पपात भुवि घोरनिस्वना मारुताहतमहीरुहोपमा ॥ ५१ ॥
झटिति व्यपनीतगाढनिद्रो महता तेन रवेण पूतनायाः ।
प्रतिपत्तुमियाय तां प्रवृत्तिं सहसा गोपगणेन नन्दगोपः ॥ ५२ ॥
तस्याः शरीरमधिरुह्य[3] विचेतनायाः क्रीडन्तमम्बुरुहलोचनमीक्षमाणाः ।
[4]नासाधिरोपितकराङ्गुलयो[5] मुहूर्तं तस्थुः समुन्मिषितविस्मयनिर्विकाराः ॥
नन्दः प्रमृज्य नयने मुहुरश्रुपूर्णे पुत्रं कृतान्तमुखनिर्गलितं[6] निदध्यौ ।
दध्यौ[7] च तस्य नितरामभिवृद्धिकामस्तत्त्वं[8] परं [9]स्वहृदयेन समाहितेन ॥
श्यामलः कमलपत्रलोचनो नीलकुन्तलभरः शुचिस्मितः ।
ध्यायतो मनसि तस्य सन्निधिं पुत्र एव विदधे[10] पुनः पुनः ॥ ५५ ॥
न क्षमं भवति पुत्रवासनानिर्भरं[11] हृदयमच्युतस्मृतौ ।
[12]इत्यशेषदुरितापहारिणीरग्रजन्मभिरकारयत् क्रियाः ॥ ५६ ॥

---

1 P2- आददौ
2 N T1 T2 T4-क्षिप्त
3 M5- अवरुह्य
4 M2 P2 P5 P6 P7 P8 P9 T1 T4- Order of C & D changed.
5 T2- नाभिप्ररोपित
6 M2- ⁰निर्गलितानि
7 M5 T2- न दध्यौ
8 M5- अभिवृद्धिकामं
9 M2 M4 N P1 P2 P5 P6 P7 P8 P9 T1 T2 T3 T4- स
10 M5 P1- निदधे
11 P2 P5 P6 P7 P8 P9 T3- निस्तरं
12 M2 N P1 P5 P6 T1 T2 T3 T4- ⁰परिताप⁰

पूतनाचरितभावनाभवं[1] दारुणं हृदयदारणं पितुः ।
श्रीपतिः शमयति स्म वैशसं क्रीडितैरखिललोकमोहनैः ॥ ५७ ॥

स लोचने किञ्चिदुपान्तकूणिते[2] निधाय मातुर्वदने कृतस्मितः[3] ।
पयोधरं पाणियुगावलम्बितं मनश्च तस्या मधुसूदनः पपौ ॥ ५८ ॥

पाणिजानुपरिचङ्क्रमश्रमात्[4] स्वेदबिन्दुमधुरं मुखं वहन् ।
धूसरेण वपुषा जनार्दनो गोकुलं निखिलमन्वरञ्जयत् ॥ ५९ ॥*

परिभ्रमन्तं भुवि पाणिजानुना गवामधस्तात् प्रविशन्तमेकदा ।
सुतं यशोदा गृहकृत्यतत्परा बबन्ध पाशेन बलादुलूखले ॥ ६० ॥

जनो हि यः कर्म करोति यादृशं [5]स सर्वथा तादृशमश्नुते फलम् ।
[6]बलिः पुराबध्यत येन[7] दानवः स लोकनाथोऽपि यदाप[8] बन्धनम् ॥६१॥

निखिलभुवनमुक्तिदे[9] मुरारौ भगवति गाढमुलूखले निबद्धे ।
परिशिथिलसमाधिराविरासीन्मनसि महामुनिमण्डलस्य[10] हासः[11] ॥६२॥

निषीद लोलेति निबध्य सस्मितं चकार कार्याणि [12]चकोरलोचना ।
अनादरेण भ्रमयन्नुलूखलं विनिर्ययौ विश्वपतिः [13]स्वमन्दिरात् ॥ ६३ ॥

---

[1] N-पावनामवं
T1 - पावना परमवं

[2] P2 P5 VB - घूर्णिते

[3] M2 P2 P5 VB - शुचिस्मितः

[4] M2 P2 P5 P6 P7 P8 P9 T1 T3 T4 - चङ्क्रमश्रम

[5] T1 - तादृशं

[6] T3 C & D - बलिपुराबध्य-न्धनम

[7] T2 - एव

[8] N P2 P5 - तदाप

[9] T3 - निखिलभवन०

[10] M2 T3 - महान्०

[11] M2 - हर्षः

[12] VB - सरोजलोचना

[13] M4 M5 N P1 P7 P9 T3 VB - स

* M5, T2 & T3 ha 41 verses interpolated between verses 59-60. See Intro. & Appendix-I

उपेयिवांसौ ककुभद्रुमात्मतां महीयसा[1] नारदशापतेजसा ।
अतिष्ठतामध्वनि कैटभद्विषः कुबेरपुत्रौ तरसैव[2] रिङ्गतः ।। ६४ ।।

स सन्निकृष्य[3] स्थितयोः परस्परं महीरुहोर्मध्यपथेन निःसरन् ।
गतेन तिर्यक्त्वमुलूखलेन तौ बभञ्ज दामोदरगन्धवारणः[4] ।। ६५ ।।

प्रपद्य दिव्यं वपुरम्बरस्थितौ विमुक्तशापौ धनदात्मजावुभौ ।
प्रणम्य भक्त्या पुरुषं पुरातनं मुदान्वितौ जग्मतुरन्तिकं पितुः ।। ६६ ।।

[5]तद्भङ्गजन्म[6] सुमहद् ध्वनितं निशम्य नन्दादयः सपदि गोकुलवासिनस्ते ।
अभ्येत्य भग्नपतितौ[7] ककुभद्रुमौ तौ तत्राक्षतं च ददृशुः सरसीरुहाक्षम्।।६७

नन्दः समीक्ष्य दुरितानि बहूनि सद्भ्यो दत्वा गवामयुतमात्मसुताभिवृध्यै ।
संमन्त्र्य बन्धुभिरपास्य पदं[8] तदाशु बृन्दावनं प्रति ययौ शकटैरसङ्ख्यैः[9] ।।

गत्वा स गोकुलपतिर्मनसो[10]ऽनुकूले कूले कलिन्ददुहितुर्विदधे [11]पदानि ।
रेमे च तत्र पुरुहूतपदाभिरामे[12] लीलायितानि तनयस्य निरीक्षमाणः ।।६९।।

दधिनिर्मथने निरुद्यमा सा नवनीतश्रपणे गवां च दोहे ।
सुतकेलिहृतेक्षणा यशोदा क्षणकल्पानि निनाय वासराणि ।। ७० ।।

---

[1] T3 - महीयसः
[2] T1 सहसैव
[3] M2 - सन्निकर्ष्यं
[4] T2 - °वाहनः
[5] P7 P8 P9 T1 T3 T4 - Order of a & b changed.
[6] M4 - तद्ध्वंसजन्म
[7] N - भङ्गपतितौ
[8] M2 - वनं
[9] P1 असङ्ख्यः
[10] T3 - मनसा
[11] P5 - निदधे
[12] P1 - °पुराभिरामे

अनुयाति जिघृक्षयेव नन्दे तरसा रिङ्खणतत्परस्य विष्णोः ।
ललितालकवेल्लनानि[1] रेजुर्मुखमात्रेण मुहुर्निवर्तितानि[2] ॥ ७१ ॥

अन्तरा विहतिमद्भिरुत्थितैरस्फुटाक्षरपदाभिरुक्तिभिः ।
भङ्गुरैश्च परिरम्भणोद्यमैर्गोकुलं निखिलमन्वरञ्जयत् ॥ ७२ ॥

पश्य मातुलमिति प्रदर्शितं[3] यामिनीषु गगने यशोदया ।
आजुहाव ललितेन पाणिना शीतभानुमरविन्दलोचनः ॥ ७३ ॥

आत्मनः प्रतिकृतिं विलोकयन् मातृहस्तमणिदर्पणोदरे ।
एहि मित्र[4] किमिहेति[5] कौतुकाद् व्याजहार शतपत्रलोचनः ॥७४॥

गौरवं कथमियं[6] सहेत मे मेदिनीति कृपयेव चिन्तयन्[7] ।
माधवः पतनभीतिमुद्वहन् मन्दमेव निदधे[8] पदावलिम् ॥ ७५ ॥

देवो निशासु हरिरङ्कगतो जनन्याः
श्रृण्वन् कथा मधुमुचो महतादरेण ।
मन्दं तदीयकरपल्लवताडितोरः
सुष्वाप कुड्मलितलोचनपुण्डरीकः ॥ ७६ ॥

कौतुकेन[9] पितुरग्रतो हरेर्धावतः [10]स्खलनमीक्षमाणया ।
मोदनिघ्नमनसा सलज्जया न स्थितं न चलितं यशोदया ॥ ७७ ॥

---

[1] M2 P2 P5 P6 P7 P8 P9 T4 - ०वेल्लितानि
[2] M2 - विवर्तितानि
M5 - निरीक्षणानि
[3] T3 - प्रदर्शयन्
[4] T1 - मित्र इति किमिहेति
T2 - मित्रमितिहेति
[5] N - तदिहेति
[6] P1 - इमं VB - इदं
[7] P1 P2 - कृपया विचिन्तयन्
P2 - कृपया चिन्तयन्
M5 - कृपयैवचिन्तया
[8] M5 P1 P2 P4 T1 VB - विदधे
M 2- न दधे
[9] T3 - केन केन
[10] T2 - स्खलितं

मुखडिण्डिमवादिना परीतो मधुजित् कौतुकिना सुहृद्गणेन ।
अधिरोपितवारणेन्द्रभावो ललिताभिर्गतिभिर्गृहेषु रेमे ॥ ७८ ॥

अथाभिवृद्धिं प्रतिपद्यमानो दध्यादिषु प्रीतिमुवाह शौरिः ।
तत्तत्प्रदानेन वशे विधातुमारेभिरे गोकुलयोषितस्तम् ॥ ७९ ॥

कुरुष्व नृत्तं नवनीतमूल्यं कृष्णेति साभ्यर्थनमूचुषीणाम् ।
व्रजाङ्गनानां [1]स पुरः[2]सलीलमुदञ्चयामास पदारविन्दम् ॥ ८० ॥

तासां मनःप्रीतिविधानदक्षे तथा क्षणं तस्थुषि शार्ङ्गपाणौ[3] ।
एकाङ्घ्रिसंस्पर्श[4]वियोगमात्रादधन्यमात्मानममन्यतोर्वी ॥ ८१ ॥

उदञ्चितं[5] तस्य विलोक्य पादं वेधाः पुनर्विक्रमशङ्किचेताः ।
कमण्डलुं पाणितलेन गृह्णन्नभ्युद्यतोऽभूदवनेजनाय ॥ ८२ ॥

नृत्तामृतं गोकुलयोषितस्तत् कृष्णस्य नेत्राञ्जलिभिः पिबन्त्यः ।
[6]प्रीतिप्रकर्षस्तिमितैर्मनोभिरालेख्ययोषित्प्रतिमा[7] बभूवुः ॥ ८३ ॥

विदुर्न तद्दर्शनपारवश्याद् दातुं करस्थं नवनीतमेकाः ।
विस्रस्य[8] भूमौ पतितं तदन्या न मेनिरे पाणिपयोरुहेभ्यः[9] ॥८४॥

अजस्रमेवं भवनेषु[10] तासां बभ्राम कृष्णो नवनीतभिक्षाम् ।
पुरा किलान्यैरनिवर्तनीया निवर्तिता येन हरस्य भिक्षा ॥ ८५ ॥

---

1 P2- Omits-स
2 P1 - T1 - पुरतः
3 P8 - चक्रपाणौ
4 M2 - संसर्ग
5 M2 - उदञ्चिता
6 T2 - प्रीत्या प्रकाम
7 T3 - प्रमा
8 M2 M5 P1 VB - विस्रंस्य
T1 - विन्यस्य
9 M2 M4 N P1 P7 P8 P9 T1 VB - सरोरुहेभ्यः
10 M2 - भुवनेषु

धिग्याचनं[1] चौर्य[2]भवस्य भूयानस्त्यंहसो[3] निर्हरणाभ्युपायः ।
मत्वेति नूनं नवनीतचौर्ये[4] मघोर्निहन्ता मतिमाबबन्ध ॥ ८६ ॥

निर्वाप्य दीपं मुखमारुतेन हैयङ्गवीनं निशि हर्तुमिच्छन्[5] ।
कृष्णः कटीभूषणरत्नभासा विहन्यमानो[6] विषसाद[7] भूयः ॥८७॥

निपीडयन्नग्रपदेन[8] पृथ्वीमुन्नम्य देहं भृशमूर्ध्वबाहुः ।
[9]पयोघटस्पर्शमशक्नुवान[10] स्त्रिविक्रमोऽभूत्[11] परिहासपात्रम्॥८८

नियमितश्वसितो निभृतैः पदैर्निशि कथञ्चन गर्भगृहं गतः ।
स तु भयादसमाप्तमनोरथो[12] निववृते नवनीतहरो हरिः ॥ ८९ ॥

हर्तुं हरेर्व्यवसितस्य घने निशीथे
भूषारवश्रुतिभयाद् व्रजतोऽतिमन्दम्[13] ।
अन्तर्गृहस्य नवनीतवतः प्रवेशात्
प्रागेव हन्त पथि सा रजनी विभाता ॥ ९० ॥

गोपीसमागमभिया च तृषा च गुर्व्या
पातुं विहातुमपि[14] गोपगृहेष्वजानन् ।
आद्वारमादधिघटं च गतागतानि
[15]कुर्वन् सरोजनयनः श्रममेव लेभे ॥ ९१ ॥

---

1 M2 P5 VB - याचनां
2 M2 P1 P2 P4 VB - चौर्य°
3 M2 - अस्यागसो
4 P1 - °चौर्यै
5 P1 - ऐच्छत्
6 P1 - विहन्यमाने
7 T2 - निषसाद
8 M4 - निपीड्य पादाब्जयुगेन
T1 - °करेण
9 T3 - पयोध°
10 M2 M4 M5 VB P2 P5 P7 P8 P9 - अनश्नुवानः
11 P1 - त्रिविक्रमे
12 M5 N P1 P8 T1
T3 - अनवाप्त
13 T3 - भुजते
14 M5 - ग्रहीतुमपि P2 P5 - च हातुमपि
15 T1 T2 T3 T4 - गतानि कुर्वन् मध्ये

[1]भित्तिषु प्रतिशरीरदर्शनाच्छङ्कितः[2] स नवनीतनिःस्पृहः[3] ।
किञ्चिदन्यदिव[4] तत्र मार्गयन्निर्जगाम मणिमन्दिरोदरात् ॥९२॥

जिहीर्षुरन्तर्भवनेषु[5] गोरसं दिनान्यनैषीत् तदुपायचिन्तया ।
स जागरूकश्च निनाय [6]यामिनीर्मनोहराभिर्हरणप्रवृत्तिभिः ॥९३॥

दृष्टेऽपि तत्सविधसंचरणे स तत्र वक्तुं[7] निमित्तमुचितं कृतनिश्चयः सन् ।
अभ्यर्ण एव निदधे दधिभाजनस्य लीलायितोपकरणानि निजानि शौरिः॥

हरन्[8] गृहीतो नवनीतमच्युतो[9] भयेन पारिप्लवनेत्रपङ्कजः ।
पदा लिखन् भूमिमवाङ्मुखः स्थितो जहार चेतोऽपि च गोपयोषिताम्[10] ॥

शपे पितृभ्यामित[11] ऊर्ध्वमेवं[12] नाहं विधास्ये नवनीतचौर्यम् ।
विनिश्वसन्नित्यभिधाय कृष्णो जहार मातुश्च पितुश्च चेतः ॥ ९६ ॥

एहि सद्म[13] तनयेति सादरं याचितोऽपि स मुहुर्यशोदया ।
आननेन नवनीतगन्धिना नाजगाम विहरन्निराच्युतः ॥ ९७ ॥

हृतं नवं मे नवनीतमालयाद्[14] हृतं घृतं मे दधि मे हृतं निशि ।
इति प्रभाते वचनानि योषितामुवाह शृण्वन्न मुखे स विक्रियाम् ॥ ९८ ॥

---

[1] In VB order of verses 92 & 93 interchanged.

[2] P6 T4- शङ्कितस्य

[3] P6- T2- T3- T4- नवनीतस्पृहः
T1- नवनीत विस्पृहः

[4] M4- M5- किञ्चिदन्यदिति
P1- किञ्चिदन्य इव
VB- किञ्चिदन्यदपि

[5] T1- जिहीर्षरन्तर्भवनेषु

[6] M4 M5 P1 P2 P5 P6 P7 P8 P9 T1 T2 T3 T4 VB- यामिनीं

[7] M5- पातुं

[8] M2 M4 M5 P1 P6 P7 P8 P9 T3 VB- वहन्

[9] T1 T2 T4- नवनीतकालये

[10] T3- सन्ततोषितम्

[11] T1- अत

[12] P6- ऊर्ध्वमात्रं
T 3- ऊर्ध्वमेव

[13] M2 M5 P1 T1 T2 T3 VB- वत्स

[14] M5 N T1 T2 T3 VB-आलये

पुत्रं कुलस्य भुवनस्य च [1]रक्षितारमभ्यर्थितोऽपि भगवानरविन्दनामः ।
[2]त्वां मे ददौ विधिवशाद्[3] भुवनैकचोरमित्याह कोपमभिनीय सुतं यशोदा ॥

ससान्त्वनेन प्रतिपादनेन भेदेन तीव्रेण च तर्जनेन ।
निबध्य[4] पृष्टोऽपि मुहुर्जनन्या नाङ्गीकरोति स्म हरिः स्वचौर्यम् ॥१००॥

संरक्षणाय जगतामवतीर्य पृथ्व्यां गोपालसद्मसु हरत्यखिलं मुकुन्दः ।
इत्थं निशम्य परिहासवचः[5] सुराणामन्तर्जहास भगवानरविन्दनाभः ॥१०१॥

कृष्णस्य[6] केलिसमरेक्षणकौतुकेन गोपीषु मुक्तभवनासु बहिः स्थितासु ।
मित्रैः पराजित इव द्रुतमेत्य गेहं बध्वा कवाटमहरन्नवनीतमन्तः[7] ॥१०२॥

त्रिभुवनमहनीयैरभ्युपायैरसंख्यैर्निखिलमिति स मुष्णन् गोकुलं नन्दसूनुः ।
अरमत सवयोभिस्तत्र गोपालपुत्रैरपर इव शशाङ्कः प्राणिनां प्रीतिहेतुः[8] ॥१०३

॥ इति तृतीयः सर्गः ॥

---

1 T2 - रक्षितोऽपि

2 T2 - तां

3 P7 P8 P9 T3 - ०बलात्

4 M4 - निर्बध्य T2 - निर्बन्ध

5 M2 - ०कथा

P9 ends with this canto

6 T3 - केलिकमलेक्षण स्थितासु मित्रैः पराजित इव द्रुतमेत्यनीये अभ्युपायैरसङ्ख्यैः निखिलमित

7 M4 - ईशः

8 M2 - मोदहेतुः

चतुर्थः सर्गः

स रोहिणीसूनुनिबद्धरागः सतां शरण्यस्तमसोऽपहर्ता ।
मनोहरो बाल इवौषधीशो[1] दिने दिने पोषमियाय शौरिः ॥ १ ॥

[2]त्यक्त्वा हरिः स्तैन्यकृतापवादं तच्छैशवं प्राप्य दशान्तरं सः ।
मन्ये तदंहःपरिमार्जनाय गवां परित्राणसमुद्यतोऽभूत् ॥ २ ॥

पुत्रे तथोद्योगिनि नन्दगोपो गोपालपुत्राननुनीय[3] सर्वान्[4] ।
त्रातुस्त्रयाणामपि[5] विष्टपानां संरक्षणे तस्य समादिदेश ॥ ३ ॥

मात्रा कृतस्वस्त्ययनः प्रभाते पित्रा परिष्वज्य चिरं विसृष्टः ।
सहैव रामेण समग्रहर्षौ विनिर्ययौ विश्वपतिर्वनाय ॥ ४ ॥

सः प्रातराशी [6]व्यतिषिक्तपाणिर्यष्टिं वहन्नंसविषक्तशृङ्गः ।
विमुच्यतां गौरिति संभ्रमेण गच्छन् प्रतिद्वारमवोचदुच्चैः ॥ ५ ॥

निशम्य तस्य ध्वनिमूर्ध्वकर्णा[7] विलूनपाशा[8] भृशमुत्सुकिन्यः ।
वत्सानपि स्वाननवेक्ष्य[9] गावः ससंभ्रमं[10] निर्ययुरालयेभ्यः ॥ ६ ॥

गत्वा पुरस्ताद् गजराजगामी गोष्ठं गरिष्ठो गुणमण्डलेन ।
आपूरयन्[11] मित्रगणागमार्थं पित्रोरभीष्टेन सहैव शृङ्गम् ॥ ७ ॥

---

[1] P1 VB - इवोषधीशो
[2] T4 Omits verses 2 to 10 incl.
[3] T3 - ०अनुयाय
[4] VB - गोपान्
[5] T2 - इव
[6] VB N - व्यतिषक्त
[7] N - ऊर्ध्वकर्ण
[8] N - विलूनपाशं
[9] P1 VB - अनपेक्ष्य
[10] N - ससंभ्रमा
[11] P2 P3 P5 P7 P8 - अपूरयन्
M2 - अपूरयत्

नभःस्पृशा कर्णपथं गतेन तेनैव संज्ञागवल[1]स्वनेन ।
आदाय तत्तत्परिबर्हजातं सद्यो गृहेभ्यः सुहृदो निरीयुः ॥ ८ ॥

गवां खुरन्याससमुद्भवेन [2]विषाणसङ्घट्टनजन्मना च ।
प्रसर्पता दिक्षु महास्वनेन घोषः[3] क्षणं घोषमयो[4] बभूव ॥ ९ ॥

प्रधावनैरुत्प्लुतिभिः[5] सुदूरं मिथो बलाद् ग्राहविमोचनैश्च ।
समागतैस्तत्र समं सुहृद्भिर्बहुप्रकारं विजहार शौरिः ॥ १० ॥

परेण हर्षेण परस्य[6] पुंसः संक्रीडमानस्य समं सुहृद्भिः ।
पवित्रयामास पदाम्बुजोत्था[7] करीषधूलिः ककुभां मुखानि ॥ ११ ॥

महर्षयस्तत्र महानुभावा गृहीतरूपान्तरदुर्निरूपाः[8] ।
भवाग्निसन्तापहरे ममज्जुः पदोत्थिते तस्य परागपूरे ॥ १२ ॥

प्रहर्षमालोकयतां[9] जनानां क्रीडाभिरापाद्य मनोहराभिः ।
उत्थापयामास स चीत्कृतेन[10] गोष्ठे हरिर्गोसमजं[11]शयानम्[12] ॥ १३ ॥

तस्मिन् गवां पालनकौतुकेन वनाय निर्गच्छति दैत्यशत्रौ ।
ययुः प्रियाख्यानचिकीर्षयेव दिवाकृतो दिग्वलयं मयूखाः ॥ १४ ॥

---

1 M2 - सज्ञागवल०
VB - संज्ञागमन०

2 T3 - विखात

3 VB - गोष्ठं

4 VB - घोषमयं

5 T3 - आप्लुतिभिः

6 P1 P2 P5 P6 P7 P8 T4 - पुराण

7 N - पदाम्बुजोत्थ
P1 P2 P5 - पदाम्बुजोत्थित

8 T2 - निर्निरुपाः

9 T2 - आपादयितुं

10 MS N P2 P5 T2 VB - चित्कृतेन

11 VB - गोसमाजं

12 T2 - शयानाम्

कूलद्रुमाणां कुसुमानि धून्वन्[1] कर्षन् पयःशीकरमण्डलानि ।
कृष्णं कृतानेकविहारखिन्नं यान्तं सिषेवे यमुनासमीरः ॥ १५ ॥

परस्य पुंसः पदपङ्कजाभ्यां प्रवेक्ष्यतो गोकुलपालनाय[2] ।
चकार नीहारहरैर्मयूखैः प्रवेशयोग्यानि वनानि[3] भानुः ॥ १६ ॥

प्रेम्णा परित्यक्तुमशक्नुवन्तं बद्धाञ्जलिं बन्धुजनिं निवार्य ।
रामं पुरस्कृत्य समित्रवर्गो[4] विवेश विष्णुर्विपिनान्तराणि ॥ १७ ॥

अरण्यभूमीरवगाहमानं तमातपक्लान्तमवेक्षमाणः[5] ।
पत्रातपत्रेण[6] परिस्तृतेन वियत्यसेविष्ट विहङ्गराजः ॥ १८ ॥

मा गच्छ गङ्गे यमुने क्व यासि किं तत्र गोदावरि धावसीति ।
न्यषेधि तत्तद्व्यदेशपूर्वं मार्गच्युतं गोकुलमच्युतेन ॥ १९ ॥

प्ररूढसुस्निग्धतृणाङ्कुरासु छायाद्रुमश्यामलितान्तरासु ।
गवां कुलं तत्सुलभोदकासु प्रचारयामास वनस्थलीषु ॥ २० ॥

साटोपमान्दोलितलम्बसास्ना गावश्चरन्त्यो बलमानबालाः[7] ।
त्रुट्यत्तृणस्तोमचटत्कृतिन्यश्चक्रुः[8] प्रियं चेतसि चक्रपाणेः ॥ २१ ॥

---

[1] P6 T3 T4 - धुन्वन्
[2] M2 - ० रक्षणाय
[3] T2 - पदानि
[4] M5 - सबन्धुवर्गो
[5] M2 N1 P1 P7 P8 T2 - ह्यवेक्षमाणः
[6] P2 - पक्षातपत्रे
P5 - पक्षातपत्रेण
[7] M2 P7 P8 T1 - बालाः
T2 - मालाः
[8] T2 - चटात् कृतिन्यः

[1]हरिन्मणिश्यामरुचीनि तत्र स्वैरं चरन्तीषु तृणानि गोषु ।
शौरिः स्वयं भुक्त[2] इवाप तृप्तिं तृप्यन्त्युदाराः परतर्पणेन ॥ २२ ॥

सर्वासु कण्डूयनलिप्सयोच्चैरुन्नम्य कण्ठं दधतीषु गोषु ।
बालो हरिर्बाहुसहस्रशून्यं जन्मात्मनो निष्फलमेव मेने ॥ २३ ॥

परिभ्रमद्गोकुलमुग्रकोपं समुच्चलद्धूलि रटद्विषाणम् ।
स युद्धमुक्ष्णां मदनिर्भराणां प्रविश्य मध्यं शमयाञ्चकार ॥ २४ ॥

शाखाकराग्रैरवलम्ब्य पृथ्वीं निषेदुषः पुष्पफलावनम्रान् ।
तत्र द्रुमान् सादरमीक्षमाणो जगाम तृप्तिं न कदापि शौरिः ॥ २५ ॥

अलक्ष्यमूलान्यतिविप्रकर्षाद् घोषानुमेयस्खलितोदकानि ।
उत्तुङ्गरोधस्तरुमण्डलानि निम्नानि दृष्ट्वा नितरां स रेमे ॥ २६ ॥

अतुच्छगुच्छस्तनभारनम्रा लताः प्रवालाधरलोभनीयाः[3] ।
स तत्र वीक्ष्य[4] भ्रमरालकाढ्यास्तामस्मरत्[5] तामरसाधिवासाम् ॥ २७ ॥

समुत्सुकं सागरकन्यकायामाकृष्टु[6]मन्तःकरणं मुरारेः ।
सर्वस्य वेत्ता सरसां स वाचं संकर्षणः सादरमित्युवाच ॥ २८ ॥

---

[1] T1 - हरन्मणि०

[2] T1 - तृप्त

[3] N T2 - नम्रां लतां प्रवालाधरलोभनीयां

[4] M5 - दृष्ट्वा

[5] T2 - भ्रमरालकाढ्यां

[6] N P2 - आकृष्टुं

अन्तरसमीरभ्रमणप्रसङ्गादुदीर्णनादेन गुहामुखेन ।
प्रायः[1] प्रयुङ्क्ते पृथिवीधररते गोवर्धनः स्वागतमेष[2] शौरे ॥ २९ ॥

निशम्य गोवर्धननिर्झराणां धीरध्वनिं कृष्ण! शिखण्डिनोऽमी ।
मुदा त्वदालोकनजातयेव नृत्यन्ति चक्रीकृतबर्हभाराः[3] ॥ ३० ॥

पादाविमौ सञ्चरणाय नालमत्रेति मत्वा[4] मृगयूथमेतत् ।
स्वलोचनांशुस्तबकापदेशान्नीलोत्पलैर्भूमिमिवास्तृणाति[5] ॥ ३१ ॥

विकीर्य विष्वग् विपिनद्रुमाणां मधूनि पुष्पस्तबकच्युतानि ।
अर्कांशुतप्तामनिलो धरित्रीं सञ्चारयोग्यां भवतो विधत्ते ॥ ३२ ॥

न भीतिरन्तर्न दृशोश्चलत्वं नास्था तृणे नोत्सुकता च[6] शावे ।
रूपेण दामोदर! मोहितास्ते तिष्ठन्त्यमी काष्ठकृता इवैणाः ॥ ३३ ॥

तेनेति सन्दर्शितमग्रजेन मनोहरं तत्तदवेक्षमाणः ।
गाश्चारयन्[7] शाड्वलिनीषु भूषु रेमे रमाया रमणः प्रकामम् ॥ ३४ ॥

तं तत्र दृष्ट्वा महनीयरूपं शौरिं शबर्यश्चरितार्थनेत्राः ।
फलोपहारैरुपसृत्य वन्यैरवादिषुः प्रश्रयशोभि वाक्यम् ॥ ३५ ॥

---

[1] P2 P5 P6 P7 P8 T4 - भूयः
[2] P2 VB - एव
[3] T3 - [9]भाला:
[4] N - नालं मत्वेति नूनां
[5] M5 - आस्तृणोति
T3 - आस्तृणन्ति
[6] P1 P2 P3 P5 P6 P7 P8
- T4 - अपि
[7] M2 - चालयन्

इतः पदं नः[1] शरपातमात्रं यायाः सहानेन सुहृद्गणेन ।
अत्रागमिष्यन्ति किरातपुत्रा गवाममूषां परिपालनाय ॥ ३६ ॥

व्याधाहृतैर्वारिणकुम्भगर्भान्[2] मुक्ताफलैरामलकाभिरामैः ।
प्रसाधनं त्वां भुवनत्रयस्य प्रसाधयिष्यन्ति किरातकन्याः[3] ॥ ३७ ॥

कन्यास्ति काचिच्छबरेश्वरस्य या नः कुलानामधिदेवतेव[4] ।
तां सर्वथा दास्यति ते स राजा महान्त्यनर्घाणि च यौतकानि ॥ ३८ ॥

इत्यूचुषीणां शबराङ्गनानामत्यादरं चेतसि वीक्षमाणः ।
कृष्णः कृपानिघ्नमनाः स वाचमित्याह लज्जामृदुना स्वरेण[5] ॥ ३९ ॥

पित्रोरनुज्ञामधिगम्य भद्राः[6] ! समीहितं वः सकलं विधास्ये ।
मयि स्थिते तिष्ठति गोकुलं तद् गच्छामि[7] मा भूत विषादवत्यः ॥ ४० ॥

गते पुलिन्दीरिति सान्त्वयित्वा तदिष्टभङ्गव्यथिते[8] मुकुन्दे ।
फलापचायादिषु[9] निःस्पृहास्ताः शनैर्ययुः पक्वणमेव खिन्नाः ॥ ४१ ॥

विहृत्य[10] गर्भेषु[11] लतागृहाणां निपीय वारीणि च पल्वलानाम् ।
फलानि चास्वाद्य महीरुहाणां वनानि धन्यानि चकार शौरिः ॥ ४२ ॥

---

1 M2 - तत्
2 VB - ० कुम्भगजान्
3 M5 - किरातपुत्राः
4 M4 अधिदेवतैव
5 P1 P2 P3 P5 P6 P7 P8 T4 VB - स्वनेन
6 N - भद्रां
7 N - गच्छाभ
8 M2 VB - व्यधिते
9 N - फलापयायदिपु
10 M4 प्रविश्य
11 T2 - गर्भे च T3 गर्भं च

अथाधिरूढे गगनस्य मध्यं दिवाकरे दुःसहभानुजाले ।
घर्माकुलं[1] गोकुलमीक्षमाणो हलायुधः प्राह रथाङ्गपाणिम् ।। ४३ ।।

किञ्चित्परिम्लानलताप्रवाल[2]स्तृणाकुलभ्रान्तकुरङ्गयूथः ।
अह्नः परित्यक्तजनप्रचारः प्रवर्तते मध्यम एष भागः ।। ४४ ।।

कुलानि[3] वीक्षस्व विहङ्गमानां पक्षान्तरस्थापितशावकानि ।
कठोरमेनं गमयन्ति कालं नीडेषु[4] निद्रालसलोचनानि ।। ४५ ।।

प्रायः कठोरातपपीडयेव छायाः परित्यक्तबहिर्विहाराः[5] ।
आलोकयाध्वन्यजनेन [6]सार्धमध्यासते मूलमनोकहानाम्[7] ।। ४६ ।।

[8]करैरसह्यैरयमंशुमालीतपन् महीमुग्र इव क्षितीशः ।
आशंसितापत्प्रसरः प्रजाभिर्धत्ते दशामद्य विगर्हणीयाम्[9] ।। ४७ ।।

विहृत्य कान्तारमहीषु वेगाद्[10] व्रजन्नपः पुष्करिणीषु पातुम् ।
मार्गे करीन्द्रः करशीकरेण प्रियामसावुक्षति तापखिन्नाम् ।। ४८ ।।

तप्तानि भासा तपनस्य हंसा[11] विहाय वारीणि नखंपचानि ।
पत्रेषु विन्यस्य पदानि मन्दं पद्माकरे सम्प्रति पर्यटन्ति ।। ४९ ।।

---

[1] N - धर्मानुले
[2] P3 P5 P6 P7 P8 T3 T4 - तृणाङ्कुर T2 - तृणाङ्कुलं
[3] M2 - कूलानि
[4] T3 - नीपेषु
[5] M5 P1 P5 VB - ०विकाराः N T2 - ०विकारः M2 - साकं
[7] N T3 - अनौकहानाम्
[8] T8 - असह्यैः
[9] T1 - विगर्हणीया
[10] M5 T2 - खेदात्
[11] T1 - दहसो

निगूढमीनग्रहणाभिसन्धि कृच्छ्रेण मुक्त्वा[1] कपटासिकां[2] स्वाम् ।
अमी बकोटास्तपनांशुतापात् तटीनिकुञ्जं तरसा विशन्ति ॥ ५० ॥

तदेहि यामस्तरुषण्डमेतद् घर्माकुलं गोकुलमानयामः ।
अत्रैव विश्रम्य मुहूर्तमात्रं भूयोऽपि गावः[3] प्रचरन्त्वरण्ये ॥ ५१ ॥

इतीरितं तत्समयानुरूपं[4] वाक्यं समाकर्ण्य हलायुधस्य ।
आर्यो [5]यथाज्ञापयतीति कृष्णस्तं राममुक्त्वा तरुषण्डमाप ॥ ५२ ॥

अलब्धमार्ताण्डकरप्रवेशमारामकल्पं[6] तरुषण्डमेत्य ।
आनेतुकामः स गवां कुलं तदासञ्जयामास मुखेन वेणुम् ॥ ५३ ॥

सलीलमीषत्परिवृत्तपादं[7] सविभ्रमोदञ्चितसव्यनेत्रम् ।
कृष्णस्य वंशार्पितपाटलोष्ठं वीक्ष्य स्थितिं[8] विस्मयमाप लोकः ॥ ५४ ॥

तत्र स्थितं तामरसायताक्षं तापिञ्छवर्णं शिखिपिञ्छचूडम्[9] ।
तमेव पश्यन्ननिमेषतायाः फलं प्रपेदे सुरसिद्धसङ्घः ॥ ५५ ॥

स्थितस्त्रिभङ्ग्या[10] विवरेषु[11] वेणोर्व्यापारयन्नङ्गुलिपल्लवानि[12] ।
जगत्त्रयीमोहविधानदक्षमुत्थापयामास[13] स नादमुच्चैः ॥ ५६ ॥

---

1 P1 - मुक्ता
2 T1 - कपटासि कान्त्य
T2 - कपटासिकं
VB - कपटस्थितां
3 T2 - पयोविभागः
4 M2 - तत्समयानुकूलं
5 M2 M4 M5 N P1 P7 P8 T2 VB - यदा
6 M2 M5 N T2 VB - ⁰प्रचार
7 P2 P5 परिपुक्तं⁰
8 M2 M5 N - स्थितं
T2 - स्थितां
9 T1 - शिखिचूडबर्हम्
10 M4 M5 P1 P3 P5 - ततस्त्रिभङ्ग्या
N - ततस्त्रिभङ्ग
11 VB - विवरेण
12 T2 - ⁰पल्लवेषु
13 N - ⁰दक्षां

अथोत्थितानन्दनिमीलिताक्ष्यो विलूनदूर्वाङ्कुरलाञ्छितास्याः ।
[1]गावस्तदभ्याशमुपेत्य तस्थुर्निष्पन्ददेहा[2] निभृतैः श्रवोभिः ॥ ५७ ॥

नैसर्गिकं वैरमपत्यसङ्गस्तृष्णा बुभुक्षा कुसुमायुधश्च ।
तद्वेणुनादश्रुतितत्पराणां नालं विधातुं विकृतिं तिरश्चाम् ॥ ५८ ॥

तस्मिन् मनोहारिणि चक्रपाणेर्वनान्तरे मूर्च्छति वंशनादे[3] ।
विधीयमानं परिहृत्य[4] कर्म सर्वेऽपि सत्वा लिखिता इवासन् ॥ ५९ ॥

प्रवृत्तमात्रौ[5] वनपद्मिनीषु दातुं ग्रहीतुं[6] च मृणालभङ्गम् ।
चक्राह्वयस्तद्गृहमेधिनी च प्रसार्य चञ्चू [7]परमासिषाताम् ॥ ६० ॥

उपाविशन्नुज्झितचापलानि स्वजानुविन्यस्तकराननानि ।
निष्पन्ददृष्टीनि वनद्रुमाणां शाखासु शाखामृगमण्डलानि ॥ ६१ ॥

पद्भ्यामवष्टभ्य महीमुभाभ्यां[8] सद्यःसमुत्तम्भितपूर्वकायः[9] ।
सिंहः करीन्द्राक्रमणे प्रवृत्तस्तस्थौ तथा कृत्रिमसिंहकल्पः ॥ ६२ ॥

सिद्धाः कलत्राणि लतागृहेषु समुद्यताः पाययितुं मधूनि ।
करद्वयोदञ्चितरत्नपात्रा[10] निषेदुरालेख्यमिव प्रपन्नाः ॥ ६३ ॥

---

[1] T2 - तटाभ्याश
[2] P2 P5 P7 P8 - निस्पन्द
[3] M2 T1 - वेणुनादे
[4] T3 - परिगृह्य
[5] T1 - प्रवृत्तमात्रे
[6] N P5 P6 P7 P8 T1 T2
T3 T4 - गृहीतुं
[7] M5 - पुटं
[8] T1 - महीमुखाभ्यां
[9] P7 - समुत्तम्भित
[10] M4 - ०सव्यपात्रा

तद्वंश[1]नालाच्च्युत[2]मच्युतस्य गेयामृतं[3] साधु निषेव्य वृक्षाः[4] ।
चिरं जराजर्जरित[5]त्वचोऽपि बाला इवासन् नवपल्लवाढ्याः ॥ ६४ ॥
नादेन वेणोर्विवशीकृतानां विद्याधराणां गलिताः करेभ्यः ।
गतिर्भवास्माकमपीति नूनं वीणा निपेतुर्मधुविद्विषोऽग्रे[6] ॥ ६५ ॥
स्ववेणुनादेन स जीवलोकमित्थं परानन्दमयं विधाय ।
प्रभु[7]र्व्यरंसीदमराश्च सर्वे सुप्तोत्थितानां स्थितिमन्वभूवन् ॥ ६६ ॥
प्रत्यागते चेतसि ते विदित्वा प्रभ्रश्य[8] हस्तात् पतिता[9] विपञ्चीः ।
पुनर्न चक्रुः प्रतिपन्नलज्जा विद्याधरास्तद्ग्रहणाभिलाषम्[10] ॥ ६७ ॥
मधुव्रतानां ध्वनिभिर्मनोज्ञै[11]र्वाचालयन्ती वलयं दिशानाम् ।
प्रसूनवृष्टिः सुरसिद्धमुक्ता[12] पपात मौलौ परमस्य पुंसः ॥ ६८ ॥
अवर्षि केनायमदृष्टपूर्वः प्रसूनराशिस्तव[13] मूर्ध्नीति ।
पृष्टो विहस्याह विभुः सहायान् ज्ञानं भवद्भ्योऽपि कथं ममेति ॥ ६९ ॥
विश्वद्युतां याति विवस्वदंशौ विश्रान्त[14]मुत्थाप्य गवां स यूथम्[15] ।
भूयस्तृणाश्यामल[16]भूतलेषु प्रारब्ध सञ्चारयितुं वनेषु[17] ॥ ७० ॥

---

1 P7 - तद्वेणुनालच्युतं
VB - तद्वेणु
2 M2 P8 T2 - तद्वंशनालच्युत
3 M5 T1 - गीतामृतं
N - गेयेमृतं
4 T4 - वृक्षः
5 N - चिरजराजर्जरित
VB - चिरजरानिर्झरित
6 T1 T2 T3 - मुरविद्विषो
7 M4 - विभुः
8 N T1 - विभ्रश्य
T2 - विमृश्य
P6 T3 T4 - प्रमृश्य
9 T1 - पतितां
10 T2 - ०अभिलाषः
11 N1 - स्वनितोर्मनोज्ञे
12 T1 - सुरसिद्धसङ्घैर्मुक्ता
13 M2 N P1 P7 P8 T1
VB - प्रसूनराजिः
14 T2 विभ्रान्तं
15 M2 P2 P5 P6 P7 P8 T2
T4 - पुञ्जम्
16 M2 N T2 - तृणश्यामल
17 M5 N T2 VB -
सञ्चारमकारयत्तम्

ततः परिक्षीणसहस्र[1]भानोरशाम्यदूष्मा दिवसस्य तीव्रः ।
यथा विनाशे[2] धनसञ्चयस्य महावलेपो[3] धनिनो जनस्य ॥ ७१ ॥

प्रभाकरे पाटलभासि दूरं दिशं प्रतीचीमवगाहमाने ।
आलोक्य रामः परिणाममह्नो दामोदरं सादरमित्युवाच ॥ ७२ ॥

आविर्भवन्मन्दमरुत्प्रचारा शान्तातपा निर्वृतसर्वसत्वा[4] ।
विरामवेला दिवसस्य शौरे ! प्रवर्तते पश्य मनोऽभिरामा[5] ॥ ७३ ॥

शिरोभिरूढेन्धनशाकमूलाः स्वयूथ्यमुच्चैः स्वरमाह्वयन्तः ।
वनेचरा वीक्ष्य विराममह्नः समारभन्ते सहसैव गन्तुम् ॥ ७४ ॥

शतं शतं[6] व्योमनि बद्धमालाः शात्कारवाचालविलोलपक्षाः[7] ।
व्रजन्ति लक्षीकृतवासवृक्षा मनोजवाः पश्य पतत्रिणोऽमी ॥ ७५ ॥

मुवः परागे बहुशो लुठित्वा प्रविश्य नीडं[8] कलविङ्क[9]यूथम् ।
धिनोत्य[10]पत्यानि बुभुक्षितानि ग्रासेन चञ्चू[11]पुटसञ्चितेन ॥ ७६ ॥

तदेहि शौरे ! तपनव्यपायात् प्रागेव यामः पदमस्मदीयम् ।
इयं क्षितिः[12] श्वभ्रतटेन पश्चाद् दुःसंचरा लुब्धकनिर्मितेन ॥ ७७ ॥

---

[1] N - परिक्षीणसविभ्रमं
[2] P6 T4 - विनाशो
[3] T1 - महावलेपो
[4] M2 - ^{0}सत्वजाला
N - ^{0}सत्वचाराः
[5] T2 - मनोऽभिरामः
[6] N - शता शता
[7] N - ^{0}विलोपपक्षाः
[8] T2 - नीलं
[9] P1 P7 P8 - कलपिङ्क
[10] M4 - शिनोति
[11] P7 P8 - चञ्चूदर
[12] N - क्षिती

श्रुत्वेति रामस्य गिरं[1] मुरारिरस्त्वेवमित्यादरपूर्वमूचे[2] ।
सह[3] प्रतस्थे स च मित्रवर्गैः प्रचण्डशृङ्गध्वनिपूरिताशैः[4] ॥ ७८ ॥

सह प्रयाणाय[5] कृतत्वराणामूधोभराद्[6] दूरविलम्बिनीनाम् ।
स तत्र तत्र प्रतिपाल्य तस्थौ प्रीतो गवामागमनं मुकुन्दः ॥ ७९ ॥

समावृतो गोपजनेन नन्दो गोपाङ्गनाभिश्च वृता[7] यशोदा ।
अतिष्ठतामध्वनि लोचनाभ्यां पुत्रागतिप्रेक्षणसस्पृहाभ्याम् ॥ ८० ॥

चकार कर्णेषु तयोः प्रमोदं दामोदरापूरितशृङ्गनादः[8] ।
दिवि प्रसर्पन्नथ[9] पांसुपूरो नेत्रेषु पीयूषमिवाभ्यवर्षत् ॥ ८१ ॥

[10]तौ धूसराङ्गौ रजसा कुमारौ गत्वा स नन्दः परिरभ्य गाढम् ।
आत्मानमानन्दसमुद्रमग्नं[11] नालं समुद्धर्तुमभून्मुहूर्तम् ॥ ८२ ॥

उत्पत्य[12] धावद्भिरुदस्तशस्त्रैः[13]क्ष्वेलारवक्षोभितदिग्विभागैः ।
आभीरवीरैः स वृतः प्रपेदे घोषं[14] समाकर्णित[15]तूर्यघोषम् ॥ ८३ ॥

चाटूक्तिभिः पार्श्वचरानशेषान् विसृज्य गोपान् सहितः स[16] मित्रैः ।
विवेश कृष्णो भवनं दिनान्ते समुज्ज्वलन्मङ्गलदीपिकाभिः ॥ ८४ ॥

---

[1] T2 - पदं

[2] P2 P5 P6 T4 - उक्त्वा

[3] M2 - स च प्रतस्थे सह मित्रवर्गैः
T1 T2 T3 - सह तस्थे च स
मित्रवर्गैः

[4] M4 P1 - पूरिताशाः

[5] N - प्रयाणं

[6] N - ऊधोभराद्

[7] N - वृतो

[8] M2 M4 P1 P2 P3 VB -
वेणुनादः
M5 - वेणुनादम्

[9] T1 - प्रसर्पन्निव

[10] T2 Omits a & b

[11] M2 - 0पयोधिमग्नं

[12] P1 P7 P8 T1 T2 - उत्प्लुत्य

[13] VB - उदग्रशस्त्रैः

[14] P1 P2 P5 P8 N - व्रजं
P7 VB - गोष्ठं

[15] M4 M5 T1 T3 - समापूरित

[16] T2 - स्व

कामं दिवा कर्णपथं[1]गतेन नीताः प्रियं[2] वेणुरवेण विष्णोः ।
प्रतिप्रियं[3] चक्रुरमुष्य सायं[4] गावः पयोदोहननिस्वनेन ॥ ८५ ॥

अनुदिनमिति कुर्वन् पालनं गोकुलस्य
क्षणमिव दिवसानि क्रीडया यापयन् सः ।
अखिलमपि धरित्रीभारमभ्युद्धरिष्य-
न्नरमत[5] सह शौरिस्तत्र संकर्षणेन ॥ ८६ ॥

॥ इति चतुर्थः सर्गः ॥

---

[1] N - कर्णपथा
[2] N - प्रिया
[3] M5 - प्रतिस्वनं
[4] M4 T3 - गावः सायं
[5] T2 - सरमत
M5 P2 P5 P7 & P8 end with this canto.

॥ पञ्चमः सर्गः ॥

तस्मिन् जगत्त्राणविनोदशीले नारायणे गोप्तरि गोकुलस्य ।
तत्रोपसर्गः क्वचिदाविरासीन्न मानुषः कोऽपि न दैविकश्च ॥ १ ॥

नृपाद् भयं न क्वचिदाविरासीच्छ्छन्दोऽपि[1] नाकर्ण्यत[2] तस्कराणाम् ।
नाभूदरण्येषु[3] दवाग्निपीडा व्याघ्रादयो गोषु जहुर्विरोधम् ॥ २ ॥

या रोगिणी गोषु निरामया[4] सा या स्वल्पदुग्धा पयसोत्तरा सा ।
या दुष्टशीला सगुणा[5] च साभूद् दामोदरे पालयितुं प्रवृत्ते ॥ ३ ॥

नाभूत् प्रचण्डः पवनप्रचारो नावग्रहो नाप्यतिवृष्टिरासीत् ।
नाकालमृत्युश्च कदापि जज्ञे प्रभावतः पङ्कजलोचनस्य ॥ ४ ॥

आयव्ययौ मत्सरिणाविव द्वावन्योन्यमत्येतुमुपाक्रमेताम्[6] ।
ऋणस्य नामापि न वेद कश्चिदनुग्रहात् तस्य रथाङ्गपाणेः ॥ ५ ॥

उद्गीय दामोदरकीर्तिमुच्चैः कृषीवलानां कृषतां धरित्रीम् ।
खनत्कृतिप्रीणितकर्णरन्ध्राः प्रादुर्बभूवुर्निधयो हलाग्रे ॥ ६ ॥

इत्थं यशोदातनयः कटाक्षैः पदं तदद्धं[7] स विधाय[8] सम्यक् ।
कार्यं सुराणामखिलं विधास्यन्नरंस्त तेनैव सहाग्रजेन ॥ ७ ॥

---

[1] P6 - छन्दोऽपि
[2] T4 - नाश्रूयत
[3] T1 - माभूदरण्येषु
[4] N विरामया
[5] P6 T2 T3 T4 - सुगुणा
[6] T2 - उपक्रमेतां
[7] VB - सदद्धं
[8] P1 P3 - निधाय

अत्रान्तरे भोजपतेर्निदेशादटन् महीचक्रमलब्धकामः ।
महाबलः कश्चिदरिष्टनामा मार्गस्थितं गोकुलमाप दैत्यः ॥ ८ ॥

कान्तं शतैः काञ्चनतोरणानां भूरिश्रिया भासुरमापणेन ।
अदृश्यतामेत्य चचार दैत्यो घोषं विलोलध्वजमुच्चसौधम्[1] ॥ ९ ॥

महीमिव[2] स्वर्गमुपेयिवांसमशेषमाभीरपदं विलोक्य ।
कदापि सन्तोषमनश्नुवानो विचिन्तयामास स दानवेन्द्रः ॥ १० ॥

प्राप्तं फलं [3]संप्रति नेत्रयोर्मे ये पश्यतो रम्यमिमं[4] निवासम् ।
अन्वीक्ष्य धामैतदमर्त्यलोकं मन्ये विमूढाः परमाद्रियन्ते ॥ ११ ॥

परस्वलोभः परुषोक्तिरीर्ष्या मोहो[5] मदः शाठ्यमसत्यवादः ।
नेहाशुभं किंचन किं ब्रवीमि[6] ममापि सत्वस्थ इवाधुनात्मा ॥ १२ ॥

तत् किं विचारेण करोति वासमत्रैव देवः कमलासहायः ।
नो चेत् कथं नाम वसुन्धरेयमृच्छेत् परामृद्धि[7]मभूतपूर्वाम्[8] ॥ १३ ॥

इत्थं विनिश्चित्य गृहान् गृहेभ्यो गत्वा विचिन्वत्यसुरे मुरारिम्[9] ।
गाश्चारयित्वा गहनेषु[10] कृष्णः सायं सकोलाहलमाजगाम ॥ १४ ॥

---

[1] T2 - उच्चसौयं
[2] T2 - महीरिव
[3] T2 - प्रति
[4] N - इमानि वासम्
[5] M2 मोहे
[6] T2 ब्रवीषि
[7] M4 N P1 P3 P6 T2 - भूति
[8] T3 - 0पूर्वात्
[9] N - मुरारिः
[10] M4 N - विपिनेषु

तं वीक्ष्य दैत्यः शतपत्रनेत्रं[1] चन्द्राननं कुण्डलचारुगण्डम् ।
नन्दस्य सूनुं नयनाभिराममयं स नारायण इत्यजानात्[2] ॥ १५ ॥

तं सेव्यमानं सुभटैरसङ्ख्यैः शस्त्रप्रभामण्डलदुर्निरीक्ष्यैः ।
आरादसेविष्ट रिपुः सुराणामात्मीयमिष्टं समये करिष्यन् ॥ १६ ॥

कृष्णः शिरीषप्रसवाभिरामो दैत्यः शिलाकर्कशदेहबन्धः ।
कथं नियुद्धं[3] परिणंस्यतीति विचिन्तयेव क्षयमाप सन्ध्या ॥ १७ ॥

विश्वप्रजापीडनविश्रुतस्य[4] पापीयसस्तस्य रिपोः सुराणाम् ।
वधोत्सवालोकनवाञ्छयेव प्राक्छैलमिन्दुः सहसारुरोह ॥ १८ ॥

अथ प्रतोलीषु[5] विशङ्कटासु ज्योत्स्नावतारेण समुज्ज्वलासु ।
तौ रामकृष्णौ[6] सहितौ सुहृद्भिः प्रावर्तिषातां[7] बहुधा विहर्तुम् ॥ १९ ॥

क्रीडापरं कृष्णमवेक्ष्य[8] सद्यो मनोगतं कर्म विधातुमिच्छन् ।
विस्रम्भमापादयितुं व्रजस्य बभार दैत्यो वृषभस्य वेषम्[9] ॥ २० ॥

वपुर्गरिम्णा नमयन्तमुर्वी[10] विषाणकोट्या विलिखन्तमभ्रम् ।
तं प्रेक्ष्य गावो निभृतोर्ध्वकर्णाः प्रारेभिरे जातभियोऽपसर्तुम्[11] ॥ २१ ॥

---

1 P1 - शतपद्मनेत्रं

2 N T2 - इत्यजानत्

3 N P1 P3 - कथं नु युद्धं
T2 - कथं न युद्धं

4 P6 T1 - ⁰तत्परस्य

5 T1 - प्रतोलीसु

6 N reads सहिद्भिः for सहितौ and omits सुहृद्भिः

7 N - प्रवर्तिषातां

8 T2 - उपेत्य
P6 - अवेत्य

9 P6 T1 - रूपम्

10 T2 - नमयन्तमुर्वीं

11 P6 T1 T4 - जातभियापसर्तुम्

[1]पर्याकुलं गोकुलमम्बुजाक्षो दृष्ट्वा न भेतव्यमिति ब्रुवाणः ।
निजस्य सख्युर्भुजदण्डमंसे विन्यस्य तस्थौ भुवनैकनाथः ॥ २२ ॥

तमापतन्तं तरसैव कृष्णं दृष्ट्वा ककुद्मन्तमुदग्रकोपम् ।
आस्फोटयामास विहस्य किञ्चिदुत्पत्य जग्राह च शृङ्गयोस्तम् ॥ २३ ॥

गृहीतशृङ्गं वृषभासुरं तं दृष्ट्वा जगत्त्राणपरायणस्य ।
प्राणेषु गावः परिधूय भीतिं निवृत्य तस्यान्तिकमाययुस्ताः[2] ॥ २४ ॥

क्षिप्तः स कृष्णेन पपात दूरमुत्थाय भूयोऽप्यभियातुमैच्छत् ।
उत्पत्य[3] तत्रैव[4] ततः सुरारिं चिक्षेप चिक्षेप ततश्च कृष्णः[5] ॥ २५ ॥

इति[6] क्षणं तत्र विहृत्य[7] दैत्यं मुखे विषाणे च दृढं गृहीत्वा ।
कण्ठं तदीयं[8] त्रुटितास्थिजालं निपीडयामास हरिः कराभ्याम् ॥ २६ ॥

विलूनपक्षः शिखरीव वेगात् पपात दैतेयवृषो गतासुः[9] ।
तस्याथ पातेन भुवो महीयान् कृतश्च तेनैव हृतश्च कम्पः ॥ २७ ॥

प्रमाप्य[10] तं विक्रमयूपबद्धं[11] महाध्वरे युद्धमये महोक्षम् ।
खिन्नान[12]भावेन चिरं क्रतूनां संतर्पयामास सुरानशेषान् ॥ २८ ॥

---

[1] The order of verses is different in. M4 P1 P3 T3 & T4
तमापतन्तं तरसैव कृष्णं
दृष्ट्वा ककुद्मन्तमुदग्रकोपम् ।
प्राणेषु गावः परिधूय भीतिं
निवृत्य तस्यान्तिकमाययुस्ताः ॥२२॥
पर्याकुलं गोकुलमम्बुजाक्षो
दृष्ट्वा न भेतव्यमिति ब्रुवाणः ।
आस्फोटयामास विहस्य किञ्चि-
दुत्पत्य जग्राह च शृङ्गयोस्तम् ॥२३॥
22 C & d and 24 a & b missing.

[2] M2 N - आययुश्च

[3] P6 T2 T3 T4 - उत्प्लुत्य

[4] M4 P3 P6 T2 T3 T4 VB - तत्रेव

[5] M2 - स कृष्णम्

[6] M4 Omits verses 26 to 29

[7] N - विहत्य

[8] T2 - तदीय

[9] M2 - गतायुः

[10] T3 - प्रमथ्य

[11] N - ⁰बन्धं

[12] T2 - विनान

तस्मै निजस्पर्शपवित्रिताय दैत्याय दत्वा पदमुत्तमं स्वम् ।
किमप्यकृत्वेव[1] स तत्र भूयश्चिक्रीड मित्रेण जनेन साकम् ॥ २९ ॥

स्मितं न भेदि श्वसितं न शीघ्रं[2] मुकुन्द ! न स्वेदि मुखं त्वदीयम् ।
न विक्रिया काचन संयतीति[3] संस्तूय[4] देवाः कुसुमान्यवर्षन्[5] ॥ ३० ॥

बालेन[6] नन्दस्य सुतेन दैत्ये निपातिते पर्वतसन्निकाशे ।
अदृष्टपूर्वं क्वचिदद्भुतं तद् दृष्ट्वा विनेदुर्ननृतुश्च गोपाः ॥ ३१ ॥

समुद्वहन्त्यः[7] सरसीरुहाक्ष्यः प्रदीपगर्भं तपनीयपात्रम् ।
करैः क्वणत्काञ्चनकङ्कणैस्तं नीराजयामासुरुदारवेषाः ॥ ३२ ॥
अलं विहारेण गतः प्रदोषो निजं व्रजामो गृहमित्युदीर्य ।
नन्दः कुमारौ करयोर्गृहीत्वा विवेश वेश्मान्तमनन्तकीर्तिः[8] ॥ ३३ ॥
कृत्वा मुहूर्तं परिहासगोष्ठीं[9] भुक्त्वा सुहृद्भिः सहितोऽग्र्यमन्नम् ।
निद्रागृहं कोमलतूलतल्पं[10] गत्वा च सुष्वाप सुखेन शौरिः ॥ ३४ ॥
अनर्घरत्नाभरणाभिरामा कल्हारमालामुरसा वहन्ती ।
स्वप्ने समालक्ष्यत तेन काचिद् यामे तुरीये[11] युवती [12]निशायाः ॥ ३५॥

---

1 N T2 T4 P6 - किञ्चिन्न कृत्वेव
T1 - किमप्यकृत्वैव
2 M2 - दीर्घं
3 M2 - संयति काचनेति
4 N P1 P3 - संस्तुत्य
5 N - अवर्षयन्
6 T2 - बलेन
7 T4 6 समुज्वलन्तः
8 T3 - गोपैः सहितः स्वगेहम्
9 T2 - 0गोष्ठं
01 T1 - 0कल्पं
11 N T2 - चतुर्थं
12 M2 M4 N P1 P3 VB - युवतिः

कल्याणि का त्वं कुत आगतिस्ते किं वा निमित्तं मदनुग्रहस्य ।
दोषो न चेत् कोऽपि वदेत्युदारं तेनोदिता सा तमवोचदेवम् ॥ ३६ ॥

कलिन्दजाकूलनिकुञ्जवासां[1] जानीहि[2] शौरे जलदेवतां माम् ।
अत्रागतेरद्य मया निमित्तमावेद्यते तच्छृणु सावधानम्[3] ॥ ३७ ॥

नन्वस्ति सिन्धुर्यमुनेति [4]पुण्या पुण्या विशेषेण परिग्रहात्ते ।
आभाति या सागरमेखलाया माला महानीलमयीव भूमेः ॥ ३८ ॥

कूले[5] तदीये[6] कृतपर्णशाला वाचंयमा वारिसमीरभक्षाः ।
अन्तर्मुखैरात्मविदो मनोभिः कार्त्स्न्येन कर्म क्षपयन्ति शान्ताः ॥ ३९ ॥

अधीश्वरस्यापि[7] विहङ्गमानामवार्यवीर्यो[8] वपुषा महीयान् ।
ह्रदे निवासं विदधाति तस्याः कद्रूसुतः कालियनामधेयः ॥ ४० ॥

विषोष्मणा तस्य भुजङ्गमस्य प्रसर्पता [9]पावकदारुणेन ।
निर्दग्धतीरद्रुममण्डला[10] सा शोच्यामवस्थां यमुना दधाति ॥ ४१ ॥

अपि प्रतप्तं वनहस्तियूथं[11] सहस्रभानोः परुषेण[12] धाम्ना ।
न गाहते संप्रति वारि[13] तस्या मध्यंदिने[14] मज्जनकौतुकेन ॥ ४२ ॥

---

1 N - कलिन्दजाकूलविकुञ्जवासां
2 M 2 N P1 - जानीह
3 M2 VB - सावधानः
N - सावधाना
4 N Omits one पुण्या
5 T2 - कूलं
6 P6 T1 T2 T3 T4 - यदीये
7 VB - अधीश्वरेणापि
8 N - विहागमानां
9 N - तापक°
10 M2 N P1 T1 T2 - निर्दग्धतत्तद्द्रुम
11 T2 - वनहंसयूथं
12 T2 - पुरुषेण
13 M2 - नाथ
14 M4 - माध्यं दिने

[1]असारसामस्थितराजहंसामपेतकारण्डवचक्रवाकाम् ।
स्रोतोवहां संप्रति पश्यतस्तां[2] कृपा भवेत् कस्य न कृष्ण गुर्वी[3] ॥ ४३ ॥

मनोभिरामाणि महोभिरिन्दोः[4] समुज्ज्वलैर्ग्रीष्मविभावरीषु[5] ।
सिद्धास्तदीयानि कलत्रवन्तो नाध्यासते सैकतमण्डलानि ॥ ४४ ॥

तस्यामपः[6] पातुमधोऽवतीर्णा[7] लीढाः शिखासन्तति[8]भिर्विषाग्नेः ।
दृष्टाः[9] क्षणं दग्धपटप्रकाशाः [10]परोक्षतामश्नुवते पयोदाः ॥ ४५ ॥

वनद्विपा वारि विगाह्य तस्या मध्यंदिने मज्जनकौतुकेन ।
करोपनीतैः कबलैर्बिसानामद्यानुरुन्धन्ति निजा न जायाः ॥ ४६ ॥

दिविस्पृशा गीतरवेण मिश्रामसंगतालापशताभिरामाम्[11] ।
तन्वन्ति तत्तीरलतागृहेषु न किन्नराः संप्रति पानगोष्ठीम् ॥ ४७ ॥

[12]नितम्बविक्षोभविशीर्णवीचिः स्रस्तान्तरीयः श्लथकेशपाशः[13] ।
सुराङ्गनानामधुना समाजो न वारिणि[14]क्रीडति[15]नाथ तस्याः ॥ ४८ ॥

[16]ऋजुप्रवालाङ्कुरविभ्रमाभिर्जटाभिरम्भांसि विभासयन्तः[17] ।
तपस्विनस्तां न महानुभावाः कुर्वन्ति धन्यामघमर्षणेन ॥ ४९ ॥

---

[1] T3 - आसारतामस्थित

[2] T2 - स्रोतोवगाहं प्रतिपश्यतस्तां

[3] N P1 P3 T1 VB - कृष्ण न कस्य गुर्वी

[4] M2 T2 T3 - मनोभिरिन्दोः

[5] N - समुज्ज्वलैः शोणमणि

[6] M2 - तस्याः पयः

[7] M2 - अवतीर्य

[8] M2 - ⁰संहतिभिः

[9] N - दृष्ट्वा

[10] N - दग्धपटप्रकाशामपरोक्षता

[11] T1 - ⁰समंगतालाप⁰

[12] VB - नितम्बविक्षोभि⁰

[13] N VB - श्लथकेशबन्धः

[14] N - वारि

[15] P6 T1 T2 T3 T4 - क्रीडती

[16] M2 P6 T1 T2 T3 T4- ऋतु⁰

[17] M2 - विभावयन्तः
T2- अवभासयन्तः

आन्दोलितायाः[1] पवनेन मन्दं मनोहरं[2] लास्यमिवाचरन्त्याः ।
तस्यास्तुलाकोटिरवानुकारी[3] न श्रूयते हंसवधूनिनादः[4] ॥ ५० ॥

पत्युः सलीलं[5] सविधं व्रजन्त्या नितम्बकल्पे पुलिने मनोज्ञे ।
न दृश्यते संप्रति नाथ ! तस्याः कलस्वना[6] सारसपङ्क्तिकाञ्ची[7] ॥ ५१ ॥

[8]समुन्नमच्चारुपयोधरापि सुतापि सूर्यस्य कलिन्दकन्या ।
भुजङ्गसंसर्गमुपेयुषी[9] सा जनैः परित्यज्यत एव दूरम् ॥ ५२ ॥

तस्या मनः शल्यमपाकुरु त्वं दामोदर ! त्वय्यनुरागवत्याः ।
कूलङ्कषौघापि[10] तदा पितुस्ते बभूव पार्ष्णिद्वयसोदका या[11] ॥ ५३ ॥

इत्युक्तवत्यां जलदेवतायां प्रीतः प्रतिश्रुत्य तथेति कृष्णः ।
विसृज्य तां विस्मयनीयभूमां [12]तत्याज निद्रां सह पुण्डरीकैः[13] ॥ ५४ ॥

अनुस्मरन्नद्भुतदर्शनाया वाचं जलानामधिदेवतायाः ।
समीहितं साधयितुं तदीयं कृताभिसन्धिः क्षणमास्त शौरिः ॥ ५५ ॥

प्रसर्पता दिक्षु मधुव्रतानां कोलाहलेन श्रुतिमोहनेन ।
कृष्णस्य शंसन्निव सुप्रभातं ववौ सरोजाकरगन्धवाहः ॥ ५६ ॥

---

[1] T2 - आन्दोलितास्ताः
[2] M2 - मनोहरा
[3] VB - ⁰रवानुसारी
T3 - ⁰रिवानुकारी
[4] N - ⁰निनादाः
P6 - ⁰विनोदः
[5] N - सलीला
[6] N - कलस्वनं
[7] T2 - सारसवृन्दकाञ्ची
[8] P3 Omits this verse.
[9] M2 - ⁰संपर्कं
[10] N - कूलङ्कषोपि
[11] T2 - ⁰सोदक याः
[12] M2 - विस्मयनीयभूतां
N - विस्मयनीयभूमौ
[13] N - पुण्डरीकः

प्रसारणाकुञ्चनपेशलाभ्यां[1] दोर्भ्यां सलीलं दधि मथ्नतीनाम् ।
व्रजाङ्गनानां[2] मुमुदे स शृण्वन् दामोदरः कङ्कणशिञ्जितानि ॥ ५७ ॥

दुकूलमग्र्यं परिधाय धौतं संमृष्टमभ्यर्चयतामलिन्दम्[3] ।
गृहे गृहे गोपवधूजनानां शुश्राव गीतं निजनामगर्भम्[4] ॥ ५८ ॥

इहागमिष्यत्युरगः[5] स घोरो निर्वासितो[6] नन्दसुतेन नद्याः ।
तदत्र न स्थेयमितीव मत्वा द्यामारुरोह द्युमणिः पयोधेः ॥ ५९ ॥

इति प्रवृत्ते समये प्रभाते कृष्णं यशोदा कथयांबभूव ।
मुखे[7] रजन्या वृषभासुरस्य संस्मृत्य[8] संरम्भमपेतनिद्रा ॥ ६० ॥

सुतः द्विरेफाञ्जनदर्शनीयैरुन्मीलितैर्लोचनपुण्डरीकैः ।
त्वां द्रष्टुकामा इव पङ्कजिन्यो भृशं[9] विराजन्ति धृतानुरागाः[10] ॥ ६१॥

तमःसमुद्रे पतितां[11] त्रिलोकीमुद्धर्तुमिच्छन्नुदयं प्रपन्नः ।
संचारयन् दिक्षु गवां सहस्रं[12] भवानिवाभाति मयूखमाली[13] ॥ ६२ ॥

उत्तिष्ठ जैवातृक ! मुञ्च शय्यां वैभातिकं कर्म विधेहि सर्वम् ।
एषां त्वदालोकनसस्पृहाणां[14] संभावय त्वं सुहृदां कुलानि ॥ ६३ ॥

---

[1] T2 - प्रसारणाकाञ्चन⁰
[2] T2 - वराङ्गनानां
[3] T2 - अत्यर्चयतामलन्दम्
[4] T3 - निजनादगर्भम्
[5] T2 - इहागमित्युरागः
[6] N - निवासितो
[7] M2 - मुखै
[8] M2 - संसृत्य
[9] P6 - भृशं
[10] T2 - वृतानुरागः
[11] VB - पतितं
[12] P6 T4 - समूहं
[13] N - मयूखमाला
[14] VB - ⁰कौतुकानां
T1 - ⁰तत्पराणां

उत्थाय मातुर्वचनावसाने[1] निराकरिष्यन् यमुनोपरागम्[2] ।
व्यावर्णयद्भिर्वृषभासुरस्य युद्धं स मित्रैः समगंस्त[3] शौरिः ॥ ६४ ॥

समावृतो गाः[4] सवयोगणेन संचारयन् शौरिररण्यभूषु ।
पुरेव रामेण युतः[5] प्रतस्थे तद्दिङ्मुखं यत्र स काद्रवेयः ॥ ६५ ॥

शिरोरुहैश्चन्द्रमरीचिशुभ्रैः कूर्चेन वक्षःस्थललम्बिना[6] च ।
कश्चित् गदापाणिरुपेत्य गोपो मार्गस्थितो[7] माधवमाह वाचम् ॥ ६६ ॥

अलभ्यपानीयमुदग्रतृष्णं नखंपचोर्वीतलमस्तवातम् ।
आलोकयाध्वन्यजनस्य कालं[8] कालं कठोरातपदुर्निरीक्षम् ॥ ६७ ॥

वहन्नलाबूनि[9] वनेचराणामयं समाजो जलपूरितानि ।
निदाघनिष्पत्रमहीरुहाणि भ्रमत्यनम्भांसि वनान्तराणि ॥ ६८ ॥

वनेचराणां व्यथयन्ति कर्णं क्रूराणि चीरीशतचीत्कृतानि[10] ।
अल्पोदकत्वादधुना धरेषु न निर्झराणां ध्वनयः प्रथन्ते ॥ ६९ ॥

समन्ततः पावकवर्षिणीव प्रवर्तमाने समये निदाघे ।
अन्यत्र वृन्दावनपादपेभ्यो न शाखिनः सन्ति पलाशवन्तः ॥ ७० ॥

---

[1] N - मातुर्वचसावसाने
VB - मातुर्वचसोवसाने
[2] T1 - यमुनापचारम्
T3 - यमुनोपचारम्
VB - यमुनापरागम्
[3] T3 - सममास्त
[4] T3 - सा
[5] T2 - यतः
VB - सह
[6] T3 - वक्षस्थलवनाना
[7] M4 N P1 T1 T2 T4 - मार्गस्थितं
[8] M4 N P1 P3 T1 T2 - दुःखं
T3 T4 - शूलं
[9] T 1 - वहजलांबूनि
[10] P1 P3 P6 T1 T2 T3 T4 - ⁰शीत्कृतानि
VB - चित्कृतानि

[1]अस्मिन्नसह्यार्ककरे निदाघे[2] तृणानि पर्याप्तमनश्नतीनाम्[3] ।
कुक्षिर्गवामद्भिरपि प्रपूर्यस्ताः[4] क्वापि दामोदर सन्ति नापः ॥ ७१ ॥

ह्रदो महानस्ति कलिन्दजायां[5] कल्पक्षयेऽप्यक्षयवारिसम्पत् ।
धनीव लोभेन स पन्नगेन परोपकारक्षमतां न धत्ते ॥ ७२ ॥

पीत्वा पयस्तस्य गरोपसृष्टं[6] मुञ्चन्त्यसून् माधव ! गोधनानि ।
अस्माकमृद्धिश्च गतिश्च सर्वं संरक्षिताभिर्ननु[7] गोभिरेव ॥ ७३ ॥

पुनः पुनः साधु विचिन्त्य काचिद्विधा विधेया भवता समीची ।
ननूच्यते नीतिविदा जनेन समीक्ष्यकारी सुखमृच्छतीति ॥ ७४ ॥

इति श्रुतिप्रीतिकरीं स देवस्तां [8]घोषवृद्धस्य गिरं[9] निशम्य ।
अवोचदाविष्कृतगौरवस्तं मुखेन मन्दस्मितभासुरेण[10] ॥ ७५ ॥

गच्छार्य ! कार्येषु विहाय चिन्तां सर्वं भविष्यत्यनवद्यमेव ।
कथं ह्युदासीत स शार्ङ्गधन्वा गोब्राह्मणक्षेमविधानशीलः[11] ॥ ७६ ॥

तमित्युदीर्य प्रतिपन्नहर्षं विसृज्य गोपं पुरुषः पुराणः ।
भूयोऽपि गास्तत्र वनेऽनुगच्छन्नालोक्य[12] [13]संकर्षणमाबभाषे ॥ ७७ ॥

---

[1] P6 T3 T4 - तस्मिन्
[2] M2 - ⁰मरीचितापे
[3] T2 - पर्यंसं
[4] T3 - गवामभिप्रपूर्य
[5] M4 P1 P3 T2 VB - कलिन्दजायाः
[6] T1 - शरोपसृष्टं
[7] VB - सुरक्षिताभिः
[8] M2 - गोप
[9] T1 T2 - वचो
[10] T3 - मन्दस्मितसुन्दरेण
[11] N - ⁰शीलम्
[12] M2 - वनेषु गच्छन्
[13] P1 P3 - विलोक्य

देशः स एवायमहेर्निवासो निवेदितो यः पुरुषेण तेन ।
शुष्कद्रुमा भूरियमुत्थितोष्मा यद् दृश्यते शून्यजनप्रचारा[1] ॥ ७८ ॥

तदार्य तिष्ठ क्षणमत्र तीरे तं प्राणिपीडानिरतं[2] नृशंसम्[3] ।
मथ्नामि पादेन महाभुजङ्गं हठादपस्मारमिव स्मरारिः ॥ ७९ ॥

अशेषसत्वद्रुहि दन्दशूके[4] जीवत्यमुष्मिन्नचलावलेपे ।
अकुर्वतोऽस्य प्रतिकारमुग्रं ममाधुना भार इवैष[5] देहः ॥ ८० ॥

तथेति[6] तत्वज्ञतयैव[7] तूर्णं तस्मिन् पुरोजन्मनि साभ्यनुज्ञे ।
अहेर्विचिन्वन् मथनाभ्युपायं[8] कदम्बमैक्षिष्ट तटप्ररूढम् ॥ ८१ ॥

इमं[9] समारुह्य निपत्य तस्मिन् पद्भ्यां मथिष्यामि[10] तमस्तधैर्यम् ।
इत्यध्यवस्यन् परिरभ्य दोर्भ्यामारोढुमारब्ध हरिः कदम्बम् ॥ ८२ ॥

कदम्बशाखा यमुनोरगस्य विषोष्मणा मर्मरितापि कामम् ।
आरोहतः पङ्कजलोचनस्य पादत्विषा पल्लवितेव रेजे ॥ ८३ ॥

महीयसस्तस्य महीरुहस्य शिरः समारुह्य हरिः सलीलम् ।
निपीड्य[11] पादाब्जयुगेन[12] शाखां ततः स वेगेन समुत्पपात[13] ॥ ८४ ॥

---

[1] N VB - °प्रचारः
[2] M2 - हिंसानिरतं
[3] M2 - नृशंसा
[4] N - दारशूके
[5] P3 - इवेष
[6] T2 - तथैव
[7] P3 - तत्वज्ञत्तयैव
T2 - तत्वत्तयैव
[8] T2 - मथप्युपायं
[9] T2 - नतः
[10] T3 - मथिस्यामि
[11] T2 - विभिक्त
[12] M2 - शाखाग्र
M2c - पादाग्रयुगेन
[13] M42 - खमुत्पपात

अनभ्रवृष्टिर्निखिलप्रजानां महाशनिस्तस्य भुजङ्गमस्य ।
निरूप्यमाणः[1] सुरसिद्धसङ्घैः पपात लक्ष्मीपतिरन्तरिक्षात् ॥ ८५ ॥

कथञ्चिदात्मानमुपेत्य तस्मिन् भ्रष्टे महाज्योतिषि कृष्णरत्ने ।
शुचाभिसंतप्त इवातिमात्रं शाखाकराग्रं[2] व्यधुनोत् स नीपः ॥ ८६ ॥

ह्रदं समाविश्य मुहूर्तमात्रं तस्मिन्नपश्यन्नुरगप्रचारम् ।
दिग्भित्तिभङ्गक्षमचण्डनादमास्फोटयामास स सिंहनादम्[3] ॥ ८७ ॥

श्रुत्वा तदास्फोटरवं भुजङ्गश्शूत्कारनिर्धूतसरिज्जलौघः[4] ।
प्रसार्य[5] जिह्वाः[6] करवालकल्पा[7] दुद्राव तं दुःसहरोषवह्निः ॥ ८८ ॥

वमद्भिरग्निं नयनैरमर्षादुपेयुषस्तस्य[8] निजोपकण्ठम्[9] ।
नवः पयोवाह इवाद्रिशृङ्गं तुङ्गं फणामण्डलमारुरोह ॥ ८९ ॥

स्थितः स तस्मिन् फणचक्रवाले समुज्ज्वले शोणमणिप्रभाभिः ।
अधत्त शोभामरविन्दनाभः सहस्रभानोरिव मण्डलस्थः ॥ ९० ॥

सन्तापशान्त्यै हृदयेषु भक्त्या यः सेव्यते भाग्यवता जनेन ।
अवेष्टयताङ्गं हरिचन्दनस्य तस्यातिगाढं भुजगेन तेन ॥ ९१ ॥

---

[1] P1 T3 - संस्तूयमानः
M2 M4 N T3
VB - स रूप्यमाणः

[2] T3 - शाखाकराभ्यां

[3] M2 M4 N P6 T1 T2 T3
T4 - ससिंहनादः

[4] N - जलौघाः

[5] T2 - प्रसार

[6] P6 T3 T4 - जिह्वां

[7] P6 T3 T4 - करवालकल्पां
VB - करवालकल्प

[8] T2 - अग्निर्नयनैरमीषा
VB - सरोषाद्

[9] M4 - भुजङ्गमस्य

निशम्य तां गोपजनाः प्रवृत्तिं [1]विगर्हमाणा विधिचेष्टितानि ।
विस्रस्तकेशाः शिथिलोत्तरीयाः[2] प्रदुद्रुवुस्तत्र[3] स यत्र शौरिः[4] ॥ ९२ ॥

[5]तथा स्थितं तं प्रसमीक्ष्य कृष्णं गोपाश्च गोप्यश्च कृतार्तनादाः ।
ह्रदोदरे दुर्भरदुः[6]खभारमारेभिरे[7] पातयितुं शरीरम् ॥ ९३ ॥

संकर्षणस्तानखिलान्निरुन्धन्नुवाच दृष्ट्वा वदनं मुरारेः ।
इमं जनं क्लेशयसे[8] किमर्थं कृतं कृतं केशव लीलयेति ॥ ९४ ॥

पर्यायतः सन्नतिमुन्नतिं च बिभ्रन्ति चण्डश्वसितानिलानि ।
शनैर्दयावान्[9] दृतिसन्निभानि निपीडयामास स तच्छिरांसि ॥ ९५ ॥

पादाभिघातत्रुटितास्थिसन्धेस्तस्याननाद्[10] वारिणि शोणितौघः ।
धातुप्रवाहः शिखरादिवाद्रेः पपात वेगेन निबद्धघोषः ॥ ९६ ॥

मलीमसं वास इवाप्सु पद्भ्यां विमर्दयामास[11] जनार्दनस्तम् ।
स काद्रवेयश्चिरसंभृतेन व्यमुच्यत स्वेन रजोमलेन ॥ ९७ ॥

अङ्घ्रिप्रहारादवशीकृतस्य तस्याच्युतः कालियपन्नगस्य ।
ज्ञानीव संसारभयेन सद्यो बलीयसामुच्यत वेष्टनेन ॥ ९८ ॥

---

[1] N - गोपजनप्रवृत्तिं

[2] M2 T3 VB - शिथिलान्तरीयाः

[3] T1 - प्राद्रुद्रुवुः

[4] M4 T3 - कृष्णः

[5] M4 Omits verse 93 N Omits from ह्रदोदरे (93c) upto प्रवृत्त of verse 100. VB ends with verse 96

[6] VB - दुस्सह

[7] M2 P - प्रारेभिरे

[8] M4 P1 P3 VB - क्लेशयते

[9] VB - दयालुः

[10] P6 T1 T3 T4 - पदातिघात T2 - पदाभिघात

[11] P1 P3 - प्रमर्दयामास

तेनाहिना वैरिणि दानवानां स्वर्भानुना चन्द्रमसीव मुक्ते ।
सद्यः समुत्पन्नमुखप्रसादा विरेजुराशा इव गोपकन्याः ॥ ९९ ॥

[1]पादाम्बुजस्पर्शपवित्रितात्मा तत्त्वावबोधोदयजातहर्षः ।
[2]परिश्रमेणास्फुटवर्णजालस्तं[3] कालियः स्तोतुमभूत् प्रवृत्तः ॥ १०० ॥

अस्मि [4]द्विजिह्वः कुटिलैव चर्या वृत्तिश्च शार्ङ्गिन्नसुभिः प्रजानाम् ।
तथापि मय्यर्पयता पदानि त्वयोत्तमानां प्रथमः कृतोऽहम् ॥ १०१ ॥

न विद्यते नाथ ! जगत्त्रयेऽस्मिन् मया समः कश्चन भागधेयी ।
मनीषिभिः पुण्यशतेन[5] दृश्य यत् त्वामिहावैक्षिषि[6] दुष्कृतेन ॥ १०२ ॥

दुःखैकहेतुं भुवनद्वयोऽपि[7] मदं मदीयं हरता महान्तम्[8] ।
अदायि नाथ ! प्रशमस्त्वया मे महानिहामुत्र च शर्मदायी ॥ १०३ ॥

अनुस्मरन्तः कमलेक्षण त्वामसून् विमुञ्चन्त्यपवर्गकामाः ।
मया: पुनः प्राणवियोगकाले साक्षात्कृतोऽसीत्यहमेव धन्यः ॥ १०४ ॥

इति स्तुतिं[9] तस्य निशम्य कृष्णो विरम्य तन्निग्रहणप्रसङ्गात् ।
कृपाकुले[10] लोचनपुण्डरीके समुद्वहन् वाचमवोचदेवम्[11] ॥ १०५ ॥

---

1 T2 - प्रदाम्बज
2 M2 - परिभ्रमेण0
3 P6 T1 T2 T3 T4 - वर्णजालं
4 M2 - अस्मिन्
5 P6 - पुण्यचयेन
6 M2 - इहापैक्षिषि
N - इहापोक्षिषि
7 T2 T3 - भुवनत्रयेऽपि
8 M2 - महता
9 P6 T1 T4 - स्तुतीः
10 M2 M4 - त्रपाकुले
11 T2 - वाचमवोचदेवः
T3 - वाचमुवाच देवः

प्रजोपरागप्रशमोद्यतेन मयाधुना कर्म कृतं यदुग्रम् ।
मय्यस्ति चेत् कालिय ! सौहृदं ते मा त्वं[1] कृथाश्चेतसि कष्टमेतत् ।।१०६

ह्रदो निवासाय तवैष नालं प्राप्तश्रियः पुत्रकलत्रमित्रैः ।
तदर्हसि त्वं जलधौ निवस्तुं मनोरमान् प्राप्स्यसि तत्र भोगान् ।। १०७।।

इत्युक्तो बहुमतिपूर्वमच्युतेन
प्रीतस्तं स विषधरः प्रणम्य भक्त्या ।
त्यक्त्वा तां सपरिजनः कलिन्दकन्या-
मुत्सर्पत्फणमणिदीधितिः प्रतस्थे ।। १०८ ।।

प्रीतः कृत्वा विषधरपतेरर्णवे[2] तस्य वासं
कृत्वा तस्यास्तपनदुहितुर्वारि विश्वोपभोग्यम्[3] ।
गीतख्यातिर्दिवि परिषदा सिद्धविद्याधराणां
देवः प्राप ध्वजपटशतप्रेरिताभ्रं स घोषम् ।। १०९ ।।

।। इति पञ्चमः सर्गः ।।

---

[1] N - त्वा
[2] M2 - जलधर०
[3] T4 - भ्योग्यम्
P3 ends with this canto.

षष्ठः सर्गः

एकदा पुरुहूतस्य मनःप्रीतिकरं मखम्[1] ।
उदयुञ्जत गोपालाः कर्तुं नन्दपुरोगमाः ॥ १ ॥

भवने भवने कृष्णं गायन्त्यो मधुरस्वनाः[2] ।
चक्रुर्घोष[3]विलासिन्यः सलीलं पिष्टकुट्टनम्[4] ॥ २ ॥

अश्वत्थसहकाराणां पर्णजालेन निर्मिता[5] ।
अबध्यन्त गृहद्वारि[6] मालास्तोरणमूर्धसु ॥ ३ ॥

घ्राणप्रीतिकरो दिक्षु पवनेन प्रसारितः[7] ।
ववृधे सुरभिर्गन्धो घृतश्रपणसम्भवः ॥ ४ ॥

सूप[8]सौरभशालिन्यो योषिज्जनसमाकुलाः ।
चक्रुर्मनसि कृष्णस्य प्रीतिं रन्धनभूमयः ॥ ५ ॥

स्नानार्द्रकबरीभारा निर्णिक्त[9]वसनोज्वलाः ।
अर्पयामासुरङ्गेषु भूषणानि व्रजस्त्रियः ॥ ६ ॥

इति स्फीतजनानन्दे प्रवृत्ते वासवोत्सवे ।
अजानन्निव गोविन्दो नन्दगोपमभाषत ॥ ७ ॥

---

[1] T2 T3 - महम्
[2] P1 T1 - मधुरस्वराः
[3] T1 T3 - गोप⁰
[4] T2 - पिषकुट्टनम्
[5] T2 - निर्मिताम्
N omits this canto.
[6] P6 T4 - गृहद्वारे
[7] T3 - पवनोत्प्रसारिताः
[8] T3 T4 - धूप⁰
[9] M2 - निर्निक्त

अयं प्रमुदिताशेषजनस्तात ! मखो[1] महान् ।
किंनामा किंफलः[2] का[3] वा देवतास्य, निगद्यताम्[4] ॥ ८ ॥

इति श्रुत्वा गिरं शौरेः प्रहर्षाकुलमानसः ।
बाहुभ्यां तं परिष्वज्य नन्दो वचनमब्रवीत् ॥ ९ ॥

अयं खलु मखः[5] श्रीमान् मघोनः[6] प्रीतिवर्धनः ।
प्रतिवर्षं सुतास्माभिरिज्यते भक्तिशालिभिः ॥ १० ॥

तस्मिन्[7] प्रीते सहस्राक्षे श्यामास्तरलविद्युतः ।
वृष्टिभिः प्रीणयन्त्यस्मान्[8] काले काले वलाहकाः ॥ ११ ॥

समित्रस्त्वमिमं यज्ञमनुसन्धातुमर्हसि ।
वत्स ! त्वं[9] खलु मे पुत्रः सखा बन्धुः परा गतिः ॥ १२ ॥

इति तेनोदितः[10] पित्रा स्मितांशुस्नपिताधरः[11] ।
आनन्दयन् मनस्तस्य वचनं शौरिरब्रवीत् ॥ १३ ॥

वेदशास्त्राविसंवादि[12] यदहं वक्तुमुद्यतः ।
यदि ते रोचते तात ! त्वया तत् परिगृह्यताम्[13] ॥ १४ ॥

---

[1] P6 - महो
[2] P6 T2 T3 T4 - फलं
[3] T2 - को
[4] M2 - निवेद्यताम्
[5] T3 - महः
[6] M2 - मखोनः
[7] M2 - अस्मिन्
[8] M2 - प्रीणयति
[9] T2 - त्वा
[10] M2 M4 P1 T1 - तेनोदिते
[11] T2 - °स्नपितायतः
[12] M2 T3 - वेदशास्त्रविसंवादी
M4 P6 - वेदशास्त्रार्थसंवादि
[13] P6 - तत् गृह्यतां वचः
T2 - तत् परिगृह्यत

ब्राह्मणः परमं दैवं ब्राह्मणः परमा गतिः ।
ब्राह्मणादेव लभ्यन्ते सर्वैः[1] सर्वाश्च[2] संपदः ॥ १५ ॥

किं चन्द्रेण किमिन्द्रेण[3] किमर्केण किमग्निना ।
निग्रहानुग्रहौ कर्तुं ब्राह्मणः क्षमते परम् ॥ १६ ॥

नेयं कथा किमश्रावि[4] यत् क्रोधात् कुम्भजन्मनः ।
आसीदजगरस्तात ! नरेन्द्रो नहुषः पुरा ॥ १७ ॥

विपक्षेष्वपि देवेषु सहस्रनयनादिषु ।
त्रिशङ्कुमनयत् स्वर्गं चण्डालं कुशिकात्मजः ॥ १८ ॥

अपर्यन्तप्रभावेण ब्राह्मणेन सुसंस्कृताः ।
देवता एव जायन्ते काष्ठपाषाणमृत्तिकाः ॥ १९ ॥

एधसैव समिध्यन्ते केवलं जातवेदसः ।
निमित्तमनपेक्ष्यैव[5] ज्वलन्ति ब्राह्मणाग्नयः ॥ २० ॥

मलं हरन्ति[6] तीर्थानि बाह्यमेव शरीरिणाम् ।
मनोमलमपघ्नन्ति ब्राह्मणास्तत्त्वदर्शिनः ॥ २१ ॥

---

[1] M2 - सर्वे
[2] P6 T2 T4 - सर्वार्थसंपदः
[3] P6 T1 T2 T3 T4 - किमर्केण किमिन्द्रेण
[4] M2 किमत्रापि
[5] M2 P6 - अनवेक्ष्यैव
[6] T2 - हरति

तत्सपर्या त्वया कार्या तेषान्नान्यस्य[1] कस्यचित् ।
ननु जुह्वति मन्त्रज्ञाः पावके न तु भस्मनि ॥ २२ ॥

गोवर्धनश्च संपूज्यः पुण्योऽयं पृथिवीधरः ।
वयं गावश्च यस्यैव सकाशाल्लब्धजीवनाः ॥ २३ ॥

तथेति तुष्टो जग्राह नन्दः कृष्णस्य तद् वचः ।
आनयामास[2] च क्षिप्रं विप्रान् पावकवर्चसः ॥ २४ ॥

नन्दस्तान् परमान्नेन तर्पयित्वा[3] बहुश्रुतान् ।
तेभ्यः स्वर्णानि वासांसि ददौ धेनुशतानि च ॥ २५ ॥

सम्यगाराधयामास [4]तं च गोवर्धनं ततः ।
स च सन्तोषमापेदे देवतात्मा महीधरः ॥ २६ ॥

भवतस्तनयो भूयादत्याखण्डलविक्रमः ।
इत्याशिषमतिप्रीता[5] ददुस्तस्मै द्विजातयः ॥ २७ ॥

नन्दः संकर्षणः शौरिः सर्वे च व्रजवासिनः ।
तच्छेषभोजिनः[6] प्रीतिं परमां प्रतिपेदिरे ॥ २८ ॥

---

[1] P1 - न तातान्यस्य
[2] M4 P6 - आह्वयामास
P1 - आनिनाय ततः
[3] M2 - पूजयित्वा
[4] P6 b. ततो नन्दश्च तं नगम्
c & d. आपेंदे देवतात्मा च
सन्तोषं स महीधरः ।
[5] P1 T2 T3 - अतिप्रीत्या
[6] M4 P6 T4 ०भोजनाः
T2 - तच्छेषजोजिना

उपदिष्टः सुधर्मायां शतमन्युः सहामरैः ।
श्रुत्वा परिभवं कृष्णाच्चुकोप तमसा वृतः ॥ २९ ॥

अलक्ष्यत सहस्राक्षो लोचनैः क्रोधपाटलैः[1] ।
विष्वग्ज्वलितदावाग्निर्महानिव महीधरः ॥ ३० ॥

कोपकम्पितकोटीररत्नांशुग्लपितातपः[2] ।
पाणिना पाणिमाहत्य प्रहसन् व्याजहार सः ॥ ३१ ॥

सुराः ! पश्यत कृष्णस्य दुर्विदग्धस्य चेष्टितम् ।
प्रवृत्तं वारयामास यन्मदीयं[3] महोत्सवम् ॥ ३२ ॥

यदि कृत्वा मयि द्वेषं क्षणं जीवेयुरीदृशाः ।
दानवारण्यकालाग्निं धिग्वज्रं धिक् च कार्मुकम् ॥ ३३ ॥

नाहमस्मि[4] तृणावर्तो नारिष्टो न च पूतना ।
भोक्ता मयि विरोधस्य मूढः समुचितं फलम् ॥ ३४ ॥

क्षुद्रदैत्यवधोत्सिक्तं[5] गृहीत्वा कृष्णमाहवे ।
सहसैव करिष्यामि गोकुलं रोदनाकुलम् ॥ ३५ ॥

---

[1] T2 T4 - कोपपाटकैः

M4 P6 - कोपपाटललोचनैः

[2] M2 P1 T3 - ग्लपिताधरः

[3] M2 - मदीयं यन्महोत्सवम्

[4] T2 Omits अस्मि

[5] P6 T3 T4 - वधोद्रिक्तं

कृताश्मवर्षैरथवा पुष्कलावर्तकादिभिः ।
गोकुलं संहरिष्यामि [1]गावस्तस्य हि[2] जीवितम् ॥ ३६ ॥

इत्युक्त्वा स समाहूय प्रेषयामास तान् घनान् ।
आरुरोह च मातङ्गं कैलासशिखरोपमम् ॥ ३७ ॥

तस्य तच्चेष्टितं दृष्ट्वा मुनयः सनकादयः ।
मनसा तमवज्ञाय ययुः स्वं स्वं निवेशनम्[3] ॥ ३८ ॥

नैच्छदैरावतो गन्तुं तामाशां यत्र केशवः ।
स्मृत्वेव[4] सुकृतं तस्य ग्राहात्पालितदन्तिनः ॥ ३९ ॥

स्रस्तः[5] करतलात् तस्य पपात सहसाङ्कुशः ।
रेखाङ्कुशादिव त्रस्यन् कृष्णस्य करवर्तिनः[6] ॥ ४० ॥

जवादभिमुखो वायुर्ववौ परुषनिस्वनः ।
तमीशमसुखोदर्काद्[7] वारयन्निव साहसात् ॥ ४१ ॥

तत्तद् दुश्शकुनं क्रोधादनवेक्ष्य शचीपतिः ।
ऐरावतं समाक्रम्य[8] प्रतस्थे व्योमवर्त्मना ॥ ४२ ॥

---

1 P6 - गवां
2 T1 Omits हि
P6 T4 - च
3 M2 - निकेतनम्
4 T2 - स्मृत्वैव
5 T2 - स्रता
6 M2 M4 T3 P6 - तलवर्तिनः
T2 - हितवर्तिनः
7 P6 T4 - तमिन्द्रं
M2 - तं यान्तं
8 P6 - समारुह्य

तटित्पटलदुद्दर्शास्तापिञ्छश्याममूर्तयः ।
अग्रतस्तस्य जीमूताश्चेलुर्गम्भीरनिस्वनाः ॥ ४३ ॥

पश्यता न मया[2] स्थेयं पापं[3] कर्म बिडौजसः ।
इति क्वापि ययौ भानुर्जीमूतावरणच्छलात् ॥ ४४ ॥

तथा चेतस्यतिक्षुद्रे[4] तस्य पत्युर्दिवौकसाम् ।
अमानिव[5] तमःपूरो जजृम्भे दुर्दिनच्छलात्[6] ॥ ४५ ॥

भिन्दन्त[7] इव दिक्चक्रं गर्जितैरतिभीषणैः[8] ।
दृषदो वारणस्थूला ववृषुस्ते वलाहकाः[9] ॥ ४६ ॥

पीडितानां शिलावर्षैर्गोपानामार्तनिस्वनम्[10] ।
आकर्ण्य चिन्तयामास दयालुर्देवकीसुतः ॥ ४७ ॥

अहं छत्रमिवोद्धृत्य गोवर्धनमिमं धरम् ।
पालयामि परित्रस्तान् व्रजवासिजनानिमान् ॥ ४८ ॥

इति संचिन्त्य गोविन्दो नलस्तम्बमिव द्विपः[11] ।
उदमूलयदिन्द्रस्य गर्वेण सह पर्वतम्[12] ॥ ४९ ॥

---

[1] M4 P1 - चेरुः
T3 - चेतरुगम्भीर
[2] P1 T1 T2 T3 - पश्यतो
मम न स्थेयं
[3] P6 T4 - पाप कर्म
[4] M2 - अतिक्रुद्धे
[5] M1 T1 T2 T3 - मदादिव
[6] M2 - दुर्जन⁰

[7] M2 - भिन्दन्तं
[8] P6 T3 T4 - गर्जनैः
[9] T2 - वलाहकान्
T3 - वलाहकाः
[10] M2 - ⁰आरतनिस्वनम्
P1 - ⁰आर्तिनिस्वनम्
[11] P6 - द्विपिः
[12] T2 - पर्युतम्

fn. 5 Vilāsinī reads अमानिव

तं कन्दुकमिवादत्त करेण कमलेक्षणः ।
शक्रः प्रहरणाशङ्की यथा जायेत कम्पितः ॥ ५० ॥

गोपालानाह गोविन्दो करेण[1] [2]गिरिमुद्वहन् ।
गाः प्रवेशयत छिद्रमद्रेर्विशत च स्वयम् ॥ ५१ ॥

इत्युक्तास्तेन गोपालाः सन्तुष्टाः सह गोधनैः ।
प्राविशन् पर्वतच्छिद्रं पातालमिव विस्तृतम् ॥ ५२ ॥

आसिष्ट गतसंबाधं सकलं तत्र गोकुलम् ।
युगावसाने कृष्णस्य कुक्षौ जगदिवाखिलम् ॥ ५३ ॥

धारा[3] धाराधरोत्सृष्टा[4] वारयामास भूभृता ।
सहैव बाष्पधाराभिस्तेषां गोकुलवासिनाम् ॥ ५४ ॥

धारापरिवृतोपान्तो दोर्दण्डेन धृतो हरेः ।
अद्रिर्विडम्बयामास छत्रं मुक्तागुणावृतम् ॥ ५५ ॥

बालं च पुण्डरीकाक्षं महान्तं च महीधरम् ।
पर्यश्रुनयना गोप्यः पर्यायेण व्यलोकयन् ॥ ५६ ॥

---

[1] P1 - बाहुना
[2] M2 - धरं
[3] P6 T2 T4 धारां
[4] P6 T2 T4 - [0]धरोत्सृष्टां

नाथ ! नारायण ! श्रीमन्ननाथजनबान्धव ।
पाहि मे पुत्रमापन्नमित्यरोदि यशोदया ॥ ५७ ॥

कृष्णस्य क्षेममिच्छन्तः सर्वे नन्दपुरोगमाः ।
गोपा धेनुसहस्राणि विप्रेभ्यो मनसा ददुः ॥ ५८ ॥

तं परिश्रान्तमाशङ्क्य प्रेमनिघ्नेन चेतसा ।
सुहृदो दोर्भिरुत्क्षिप्तैर्वोढुमैच्छन् महीधरम् ॥ ५९ ॥

शिलाभिर्मेघमुक्ताभिरेधमानोऽपि भूधरः[1] ।
न चक्षमे भुजं भुग्नं[2] कर्तुं दानववैरिणः ॥ ६० ॥

स्मयमानः समुद्वीक्ष्य गाः समीपमुपेयुषीः ।
अन्येन कैटभारातिरकण्डूयत[3] पाणिना ॥ ६१ ॥

श्यामः शाड्वलजालेन रेजे गोवर्धनाचलः ।
शैवालित इवाजस्रमाप्लुतो वर्षवारिणा ॥ ६२ ॥

विफलीकृतसंरम्भं[4] वीक्ष्य तं पाकशासनम् ।
जहासेव समुत्फुल्लकुटजच्छद्मना गिरिः ॥ ६३ ॥

---

[1] M2 - एधमानो महीधरः

[2] T2 T3 - भग्नं

[3] M2 - दानवारातिः

[4] P6 - वफली⁰

[5] T2 - समुत्पल्लकुव्य⁰

न बाहुरुल्बणसिरो[1] मुख न स्वेदबिन्दुमत् ।
भूधरं वहतस्तस्य निःश्वासो न त्वरान्वितः ॥ ६४ ॥

कदम्बसौरभोद्गारी वातो जीमूतनिर्गतः ।
गोपानाश्वासयामास गिरिच्छिद्रोष्म[2]पीडितान् ॥ ६५ ॥

लिहन्तीनां रसज्ञाभिरमृतात्मानमच्युतम् ।
कापि पीडा गवामासीन्न क्षुधा न च तृष्णया ॥ ६६

स पदात्[3] प्रथमन्यस्तादकुर्वाणः पदान्तरम् ।
शैलं क्षणमिवाधत्त सप्ताहं सप्तहायनः ॥ ६७ ॥

श्रान्ताः[4] सन्ततया वृष्ट्या सर्वं संवर्ततोयदाः[5] ।
उपेत्योपत्यकां तस्य भूधरस्य विशश्रमुः ॥ ६८ ॥

समाप्त्या जलरिक्थस्य[6] सर्वे विरत[7]विद्युतः ।
व्रीडयेव[8] पयोवाहा गर्जितं परितत्यजुः ॥ ६९ ॥

किन्नराणां महीध्रस्य तस्य कन्दरवासिनाम् ।
निर्झरध्वनिमान्द्येन शुश्रुवे गीतनिस्वनः[9] ॥ ७० ॥

---

[1] T3 - उद्धाणासिरो
[2] T2 - छिद्रोष्ठ
[3] T3 - स्वपादात्
P1 P3 पादात्
[4] M2 T2 - शान्ताः
[5] T2 - संवर्तंतोदयाः
[6] M2 M4 T3 - जलसत्वस्थ
T2 - जलतप्तस्य
T1 - जलवत्वस्य
T4 - जलतत्वस्य
[7] M2 - विरल⁰
[8] M2 - व्रीलितेव
[9] T2 - ⁰निस्वनम्

दिङ्मुखेषु[1] प्रसर्पन्त्या शरज्ज्योत्स्नाविशुद्धया ।
घनाः कृष्णस्य कीर्त्येव श्वेतिमानं प्रपेदिरे ॥ ७१ ॥

कार्पासतूलवत्[2] सद्यो लघुत्वं[3] समुपेयुषः ।
पवनः कृष्णभक्त्येव चकर्षाब्दानितस्ततः ॥ ७२ ॥

कृष्णद्विपस्य जीमूतजाले मुखपटोपमे ।
हृते नभस्वता शक्रः पुरः[4] स्थातुं न चक्षमे ॥ ७३ ॥

निवर्त्यैरावतं सोऽथ पुरीं प्रति ययौ भयात् ।
अपराङ्गगतैर्नेत्रैः[5] पश्यन् कृष्णस्य चेष्टितम् ॥ ७४ ॥

ऐरावतेन गच्छन्तं सृणिघातैस्तरस्विना[6] ।
अनुयातुं न शेकुस्तं सिद्धविद्याधरादयः ॥ ७५ ॥

प्राप्तपौरुषभङ्गस्य[7] तस्य प्रविशतः पुरीम् ।
[8]यक्षविद्याधरारब्धा स्तुतिरासीदरुन्तुदा ॥ ७६ ॥

अथ दिवि शिथिले वलाहकानां
प्रलयविधानपटीयसां समाजे ।
करधृतपृथिवीधरं सबाष्पः
सुतमवलोक्य जगाद नन्दगोपः ॥ ७७ ॥

---

1 M2 P1 - दिङ्मुखेषु
2 T3 - कापसिकुलयत्
3 M2 P1 - लघुतां
4 T3 - पुनः
5 T3 - अपरागं गतैः
6 T2 - सृणिहस्तं
7 P1 - प्राप्तौ
8 M2 - सिद्ध॰

प्रशममुपगतस्तवानुभावात्
कथमपि वासवसम्भवो[1] विरोधः[2] ।
तदहमपनयामि[3] गोकुलं नो
गिरिमवतारय वत्स ! मन्द[4]मुर्व्याम् ॥ ७८ ॥

इत्युक्त्वा निरगमयद् गवां कुलं तत्
स छिद्रात् स्वयमपि निर्जगाम तस्मात् ।
तेनापि स्वकरकुशेशयात् सलीलं
देवेन क्षितिमचलः पुरेव निन्ये ॥ ७९ ॥

एकेन पाणिकमलेन दधौ सलीलं
यः सप्तरात्रमचलन्नचलं महान्तम् ।
देवः स एव सुरसिद्धगणेन मुक्तं[5]
वोढुं प्रसूननिचयं न शशाक मूर्ध्ना ॥ ८० ॥

इति मदमपनीय वृत्रद्विषस्तस्य दामोदरो
मुदितनिखिलगोपनारीजनारब्धनीराजनः ।
पवनतरलकेतुमालाकुलोत्तुङ्गसौधं निजं
सुरयुवतिसहस्रगीतापदानः प्रपेदे पदम् ॥ ८१ ॥

इति षष्ठः सर्गः

---

[1] T3 - ⁰संभवे
[2] T3 - निरोधः
[3] T2 - उपनयामि
[4] T3 - शीघ्रं
[5] M2 - मुक्तां
[6] M2 - मुर्धा

P 6 & M 4 ends with this canto.

सप्तमः सर्गः

अचलोद्धरणादिभिर्विनोदैरतिलोकै[1]रतिवाह्य[2] बालभावम् ।
अनुवर्तितुमैच्छदम्बुजाक्षो वनितानन्दविधायिनीमवस्थाम् ॥ १ ॥

अपराभिरभुक्तमङ्गनाभिर्मधुराकारमिमं सुखेन भुञ्जे ।
इति कौतुकिनीव यौवनश्रीः प्रतिजग्राह[3] तमाशु पङ्कजाक्षम् ॥ २ ॥

[4]अवधिः श्रवणे दृशोरभूतां भुजयोर्जानुयुगं बभूव सीमा ।
नवयौवनसंभवैव शौरेर्न परिच्छेदमियाय कापि कान्तिः ॥ ३ ॥

हरकोपकृशानुदग्धमङ्गं पुनरप्याप्तुमिव[5] प्रसूनबाणः ।
शरणागतलोकपारिजातं तमसेविष्ट शनैरधिज्यधन्वा ॥ ४ ॥

परमात्त[6] पुरैव मुग्धभावं प्रथयन्नेव स सन्निधौ जनानाम् ।
विजने[7] तु विलासिनीषु तस्य व्यसृजन्नार्जवमीक्षणोक्तिहासाः[8] ॥ ५ ॥

श्रवणान्तमुपागतेन देवः सविलासं [9]प्रहितेन शार्ङ्गधन्वा ।
अभिनच्छतपत्रलोचनानां स मनोलक्ष्मपाङ्गसायकेन ॥ ६ ॥

गतिभिर्ललिताभिरम्बुजाक्ष्यो मुखराभिर्मणिनूपुरारवेण ।
हृदयं मधुसूदनस्य [10]जह्रुर्विपुलश्रोणिभरेण मन्थराभिः[11] ॥ ७ ॥

---

[1] N- अतिलोलैः
[2] M2- अपवाह्य
N- अतिवाह्य
T2- अतिवह्य
[3] M2 N T1- परिजग्राह
[4] T3 Omits a & b of 3rd Verse.
[5] T2- पुनप्याप्तमिव
[6] T1- वरं
[7] T4- विजनेषु विलासिनीषु
[8] T2- T3- आर्जव
[9] M2 N T1 - सविलासप्रहितेन
[10] P1 - जाहृमू
[11] M2 N - मन्थराभिः

[1]कतिचिद् दयया परे भियान्ये मतिमान्द्यादपरे तु शक्त्यभावात् ।
विदुषां वचनेन केऽपि नेमं व्यभिचारं व्रजयोषितां न्यषेधन् ॥ ८ ॥

निशि जागरघूर्णमाननेत्रं नवदन्तव्रणभासुराधरोष्ठम् ।
मृदितालकमाननं प्रियाणां स विभातेषु जहर्ष वीक्षमाणः[2] ॥ ९ ॥

तरुणीस्तनकुङ्कुमेन[3] वक्षश्छुरितं तस्य मुरद्विषो[4] विरेजे ।
परिरब्धुमिवागतेन भूयः स्फुरदंशुस्तबकेन कौस्तुभेन ॥ १० ॥

तपनीयविभूषणैस्तटित्वानतसीपुष्परुचिर्मुकुन्दमेघः ।
घनकेशकलापभारखिन्ना मदयामास विलासिनीमयूरीः ॥ ११ ॥

निहितानि मुरारिणा शरीरे नखदन्तव्रणमण्डलानि दृष्ट्वा ।
वनिता बहु मेनिरे न किञ्चिज्ज्वलदप्याभरणं[6] मणिप्रभाभिः ॥ १२ ॥

समयस्खलितो हरिः प्रभाते भवनानि प्रविशन् भयेन मन्दम् ।
निरभर्त्स्यत वामलोचनाभिर्गुरुकोपस्फुरदोष्ठपल्लवाभिः ॥ १३ ॥

चरणेषु निपत्य मानिनीनां प्रणयामर्षपराङ्मुखीकृतानाम् ।
अयतिष्ट परः पुमानलीकैरपराधं शपथैर्निजं प्रमार्ष्टुम्[7] ॥ १४ ॥

---

[1] M2 & T4 Omit this verse.

[2] N - वीक्षमाणाः

[3] M2 - तरुणीकुच०
T1 - तरुणीजन०

[4] T1 - मधुद्विषो

[5] T2 - नवदन्त०

[6] N - कञ्चिज्ज्वलदप्याभरण

[7] T1 - प्रमाष्टुः

उदितं जलधेः स्वयं त्वनिच्छन्नमृतं यः सुरसात् पुरा[1] चकार ।
स पिबन्नधरं विलासिनीनां न पुनस्तृप्तिमवाप नन्दसूनुः ॥ १५ ॥

नलिनीदलतालवृन्तवातैः शमयन्नेव रतिश्रमं प्रियाणाम् ।
यमुनापुलिनस्थलीषु[2] निन्ये रजनीरुज्ज्वलचन्द्रिकावदाताः ॥ १६ ॥

मुनयः किल यं महानुभावा निखिलज्ञाननिधानमामनन्ति ।
त्रिजगद्गुरुरग्रतः प्रियाणां स हि[3] गोत्रस्खलनेन विह्वलोऽभूत् ॥ १७ ॥

कितव ! क्व नु गच्छसीति कोपात् स गृहीतो रजनीषु खण्डिताभिः ।
पदतामरसेन ताड्यमानो हरिरात्मानममन्यतातिधन्यम्[4] ॥ १८ ॥

[5]मणिकुण्डलभासुरेषु शौरिः स्मितपुष्पच्छुरितोष्ठ[6]पल्लवेषु[7] ।
वदनेन्दुषु[8] वामलोचनानां निहितां[9] न प्रतिसञ्जहार दृष्टिम् ॥ १९ ॥

इति भोगसमुत्सुकं विदित्वा हृदयं तस्य जगत्त्रयेश्वरस्य[10] ।
ऋतवस्तमनुक्रमेण भेजुर्निखिला यामिक[11]विभ्रमं वहन्तः ॥ २० ॥

अथ गोपवधूजनं प्रहर्तुं[12] कुसुमेषोरिपुसंक्षयं विशङ्क्य ।
विशिखानिव दातुमाशु तस्मै सुहृदागात् कुसुमाकरो वसन्तः ॥ २१ ॥

---

1 T1 - परा चकार
2 T1 - स्थलेषु
3 T1 M2 - तु
4 T1 - अतिधन्यः
5 T3 - adds निज before मणि
6 T3 - ०च्छुरितेषु
7 T2 - पल्लवाभिः
8 T3 - वदनेन्दुभ
9 T1 - निहितात्
10 N - जगत्त्रयीश्वरस्य
11 M2 - यामक०
12 T1 - गोपवधूजनप्रहर्तुः

तमुपस्थित[1]मच्युताय तस्मै कुसुमोपायनधारिणं वसन्तम् ।
वचसेव[2] कलेन कूजितेन प्रतिहारा इव कोकिलाः शशंसुः ॥ २२ ॥

धृतमौनमनारतोपवासं व्रतमुद्यानतपोवने चरित्वा ।
उदयुञ्जत पारणां विधातुं परपुष्टाः सहकारमञ्जरीभिः ॥ २३ ॥

मलया[3]चलसंभवः सलीलं वलमानः पवमानगन्धहस्ती[4] ।
भ्रमरानुगतः स्मरोपवाह्यो[5] निखिलं क्षोभयति स्म जीवलोकम्[6] ॥ २४ ॥

[7]प्रियया रहितो मुहूर्तमात्रं तरुणो मन्मथशासनातिवर्ती ।
इति कोकिलकूजितापदेशान्मुहुराघोषयति स्म पुष्पमासः ॥ २५ ॥

प्रमदाधरकान्तिभिः प्रवालैर्निचितं चूतवनं चिरं चकाशे[8] ।
अरुणाम्बरनिर्मिताधिवासं शिबिरं शम्बरवैरिणोऽनुगच्छत् ॥ २६ ॥

प्रमदापदपल्लवप्रहारात् परितोषं परमीयिवानशोकः[9] ।
सुषुवे रुचिराणि पल्लवानि श्रवणालङ्करणक्षमाणि तासाम् ॥ २७ ॥

कुसुमेषु मधूनि माधवीनां प्रसरत्सौरभदिग्धदिङ्मुखानि ।
उपयुज्य चिरं मदातिरेकात् पथिकैः [10]साकमघूर्णत द्विरेफः ॥ २८ ॥

---

[1] M2 - उपागतं
[2] N - वचनेन
[3] T3 - मुखयाचल
[4] T1 - ॰गन्धहस्ति
[5] M2, N, T2, T3, T4 - स्मरोपवाह्यो
[6] T1 - जीवलोकः
[7] T3 Omits this verse.
[8] T3 - चकाश
[9] M2 N T1 - परमेयिवान्
[10] M2 T1 [3] सार्धं

मलयानिलवेल्लितो जजृम्भे सहकारप्रसवोद्भवः परागः ।
जनयन् पथिकाङ्गनाजनानां प्रचलन्मन्मथसैन्यधूलिशङ्काम्[1] ॥ २९ ॥

मुदमादधिरे दृशोरशोकाः प्रसरत्पल्लवकान्तिपाटलाशाः ।
मधुना मकरध्वजस्य रत्यै रचिता रत्नमया इवाधिवासाः ॥ ३० ॥

भुवनोन्मथनाय[2] पुष्पचापे[3] सहकाराङ्कुरबाणमाददाने ।
अभवन्[4] सघृणा इव व्रततयः पवनान्दोलितपल्लवाग्रहस्ताः ॥ ३१ ॥

अतिहृद्यमयत्नमेव विन्दन् मुखदत्तं[5] मधु मानिनीजनानाम् ।
बकुलः समदभ्रमालिरासीत्[6] तरुणानां बहुमानदृष्टिपात्रम् ॥ ३२ ॥

विरहज्वरवेदनाकृशाङ्गीरदुनोत् प्रोषितयोषितो वसन्तः ।
करुणा पदमादधाति चित्ते न कदाचिन्ननु जातिवर्जितानाम् ॥ ३३ ॥

श्रवणार्पितचारुचूतपुष्पा[7] वसनं[8] किंशुकपाटलं वसानाः ।
कनकोज्ज्वलकर्णिकारचूडा मदिराक्ष्यो मदनोत्सवं वितेनुः ॥ ३४ ॥

पदमम्बुजकोमलं प्रियाणां कठिनाशोकतरुप्रहारखिन्नम्[9] ।
अधिरोप्य[10] रथाङ्गपाणिरङ्के[11] करपद्मेन[12] शनैः शनैरमृद्नात्[13] ॥ ३५ ॥

---

[1] T1 ०शाका
T2 - ०सैन्यधूलिकानाम्

[2] M2 - भवन०

[3] N - पुष्पबाणे

[4] M2 - अभवत्

[5] T2 - मुखरादत्त

[6] M2 - सुकृतैकभूमिरासीत्
T4 - सुरुतैभ्रमरालिरासीत्

[7] T2 - ०चूतपुष्प०

[8] T3 - वसानां

[9] T3 - कथताशोक०

[10] T1 - अधिरोह्य

[11] N P1 T1 T2 T4 - ०अङ्के

[12] T3 - करपयन

[13] T1 - अमृतात्
T2 T3 T4 - अमृनात्

कुसुमतु[1] दृशोरगोचराणां पथिकानामिव संक्षयं विधातुम् ।
रभसोत्थितमल्लिकाट्टहासः सपदि प्रादुरभून्निदाघकालः ॥ ३६ ॥

नवपाटल[2] सौरभाकुलानां[3] भ्रमराणां मधुरेण हुङ्कृतेन ।
कलकण्ठगलग्रहोऽपि चक्रे[4] कदनं [5]कामुकमण्डलस्य घर्मः ॥ ३७ ॥

कुसुमायुधलुब्धकेन[6] दत्ता परितः पान्थमृगक्षयोद्यतेन ।
दहना इव किंशुका विरेजुर्धृतबालातपकान्तिभिः प्रसूनैः ॥ ३८ ॥

घनचन्दनकल्पितानुलेपाः कदलीपल्लवकोमलान्तरीयाः[7] ।
जलकेलिभिरा[8]र्द्रकेशपाशा[9] न विदन्ति स्म नतभ्रुवो निदाघम् ॥ ३९ ॥

अपि वारिविगाहनैरहार्यं[10] परितापं सुदृशो[11] निदाघजातम् ।
कुचमण्डलजन्मना जडिम्ना शमयामासुरशेषमेव यूनाम् ॥ ४० ॥

प्रियया सहितः कयापि रेमे परिहासेन किल क्वचिन्निगूढः[12] ।
वनसन्तमसासु सोऽपराभिर्हरिरुद्यानमहीषु मृग्यमाणः ॥ ४१ ॥

पुलिनेषु कलिन्दकन्यकायाः कुमुदामोद[13]मनोहरानिलेषु ।
दयितासहितः स्फुटेन्दुभासो[14] मधुजिद् ग्रीष्मविभावरीरनैषीत् ॥ ४२ ॥

---

1 T1 - कुसुमस्तु०
2 T3 - नवपादप०
3 T1 - नवसौरभपाटलाकुलानां
4 M2 - कलकण्ठगलग्रहो विचक्रे
5 T2 - कामुक०
6 T1 - ०लब्धकेन
7 T3 - ०कोमलागरीयाः
8 T2 - जलकेलिभदार्द्र०
9 T1 - ०केशपाशान्
10 T3 - ०अहेयं
11 M2 - सुहृदो
12 T2 T3 - निगूढम्
13 M2 - कुसुमामोद
14 M2 - ०हासा

अथ नर्तितविद्युदाविरासीन्नवजीमूतमृदङ्गनिस्वनेन ।
सरसीरुहलोचनस्य कर्तुं हृदये मोदमदभ्रमभ्रकालः ॥ ४३ ॥

दुधुवे रुचिरं शिखण्डिपिञ्छं[1] परितः प्राङ्मरुदैन्द्रजालिकेन ।
सविलासविवर्तितेन येन[2] भ्रममापन्निखिलोऽपि जीवलोकः ॥ ४४ ॥

स्मरहस्तिघटा[3] इवाविरासन् नवतापिञ्छरुचः पयोदमालाः ।
गलिता इव तत्कपोलशङ्खा[4] वलमाना[5] दिवि रेजिरे वलाकाः ॥ ४५ ॥

कतिचित् कुटजप्रसूनकल्पाः प्रथमे चातकचञ्चुपीतशेषाः ।
अपतन्नुदबिन्दवः[6] पयोदाद् वसुधासौरभवासिताखिलाशाः ॥ ४६ ॥

विसृजत्सु वलाहकेषु विष्वग् जलधाराः कलधौतदण्ड[7]कल्पाः ।
विरहज्वलनस्तु कामिनीनां ववृधे वैद्युतवह्निसन्निकाशः ॥ ४७ ॥

मधुरं तरुणातपप्रकाशं जलदोत्सृष्टमरण्यभूषु[8] तोयम् ।
क्षितिसौरभवासितं[9] पिबन्तो न गणास्तृप्तिमयासिषुर्मृगाणाम् ॥ ४८ ॥

वलमानक[10]दम्बगन्धवाहाः[11] स्तनितोद्गीत्रमयूरदत्तकेकाः[12] ।
क्षितिभृत्तटभूमयो विरेजुर्निपतन्निर्झरवारिझात्कृतिन्यः ॥ ४९ ॥

---

1 M2 - ०बर्हं
2 M2 - तेन
3 T1 - ०हस्तिसटा
4 P1 T2 T3 T4 - तत्कपोलशङ्के
5 T2 - वलमादादि
6 T2 - अपतन्नरबिन्दवः
7 T1 - ०गण्ड कल्पाः
8 T2 - जलदोत्सृष्टरमण्यभूषु
9 P1 T2 T3 T4 - ०सौरभवासिनः
10 T4 - पवमान
11 T3 - कदम्बगन्धवा
12 T3 - स्तनितो दत्तकेशः

नवशाद्वलमण्डले निलीना[1] नयनप्रीतिमकार्षुरिन्द्रगोपाः ।
गलिता इव मेघकाललक्ष्म्याश्चरणालक्तकबिन्दवश्चरन्त्याः ॥ ५० ॥

मधुरैरनुयायिनां[2] निनादैर्मुखराशावलयः शिलीमुखानाम् ।
प्रसरन्[3] विवशीचकार चेतः कुसुमेषोरपि मालतीसमीरः ॥ ५१ ॥

मलिनाश्वपलाशयो जडात्मा[4] समयः श्लाघ्यतमोऽभवत्[5] स वृष्ट्या ।
शतमप्यपहन्ति दूषणानां परमेको हि[6] गुणः परोपकारः ॥ ५२ ॥

स्तनितक्षतमानवैशसाभिः कठिनालिङ्ग[7]नपीडितस्त[8]नीभिः ।
अनयद् घनकालमङ्गनाभिः सह गोवर्धनकन्दरासु[9] शौरिः ॥ ५३ ॥

हरिणा तिमिरावृतासु रागादपनीते वसने नितम्बबिम्बात्[10] ।
त्रपया तरलास्तटित्प्रकाशो विदधे वामदृशो[11] विभावरीषु ॥ ५४ ॥

मुखदर्शितपुण्डरीकशोभा सिचयोद्भासिपयोधराभिरामा ।
अमलाम्बरदृष्टहंस[12]माला शरदागत्य मुरद्विषं सिषेवे ॥ ५५ ॥

नलिनीं शरदाजुहाव गूढां सलिले सारसनिस्वनच्छलेन ।
तत उन्नमयाश्चकार सा च[13] स्मयमानं[14] मुखमम्बुजापदेशात् ॥ ५६ ॥

---

[1] T4 - विलीना
[2] T2 - अनुगायिनां
[3] N - प्रचरन्
[4] M2 - जडात्मा
[5] M2 - बभूव वृष्ट्या
[6] M2 - अपि
[7] N P1 T1 T2 T4 - कठिनालिङ्गित
[8] TI - ०पीवर०
[9] T3 - ०कन्दरेषु
[10] T1 - नितम्बात्
T3 - नितम्बिनीनाम्
[11] T3 - वा सदृशो
[12] T3 - अमलाम्बरदृश्यतंसमाला
[13] M2 - अपि
[14] T2 - स्मयमासं

प्रससाद जलं नभश्च सद्यः प्रचकाशे रजनीकरः स्मरश्च ।
सरितः पथिकाङ्गनाश्च कार्श्यं दधिरे सैकतपाण्डुरप्रकाशाः ॥ ५७ ॥

स्तनितभ्रमदायिभिर्निनादैर्नृपतीनां विजयप्रयाणभेर्यः ।
जलदापगमेऽपि हंसयूथं जनयामासुरुदग्रचित्तकम्पम् ॥ ५८ ॥

वनवातसमुत्थितो[1] जजृम्भे दिशि[2] सप्तच्छदसंभवः परागः ।
निखिलस्य शरीरिमण्डलस्य[3] भ्रमकृच्चूर्ण इव स्मरेण कीर्णः ॥ ५९ ॥

कलनिस्वनसंपदो [4]विचेरुर्नलिनीपर्णसवर्णपक्षमालाः ।
कुटिलारुणतुण्डकोटिलग्नैः[5] कलमैर्व्योमनि पङ्क्तयः शुकानाम् ॥ ६० ॥

परितः पतितानि शालिगोप्यो विफलाशेषनिवारणप्रयासाः ।
रुरुधुर्मृगमण्डलानि गीत्या कलमग्रासकुतूहलाकुलानि ॥ ६१ ॥

कमलं पयसः परिष्क्रियासीत् कमलस्य[6] भ्रमरोऽभवद्विभूषा ।
भ्रमरस्य विभूषणं मदोऽभून्मदनोऽजायत मण्डनं[7] मदस्य ॥ ६२ ॥

नवकेसरमण्डलानि धून्वन्नुदगादु[8]द्गतच[9]ञ्चरीकमालः[10] ।
मरुदुल्बणसौरभो नलिन्याः प्रथमश्वास इवोदकोत्थितायाः ॥ ६३ ॥

---

[1] M2 P1 T2 T3 T4 - वनवास
[2] M2 [6] दिवि
[3] T2 - शारीरमण्डलस्य
[4] P1 T1 T3 T4 - विरेजुः
[5] T1 - ०कोटिलग्नेः
[6] M2 - T3 - कमलभ्रमरो
[7] M2 - मन्थनं
[8] T1 - उदगत्
[9] M2 - उज्जगल०
[10] TI - ०चञ्चलीक

तरुणीसदृशां तरङ्गिणीनां जघनाभोगनिभेषु[1] सैकतेषु ।
रशनागुणविभ्रमं वहन्त्यो मधुरं सारसपङ्क्तयो निनेदुः[2] ॥ ६४ ॥

सितसैकतमण्डलास्तटिन्यो[3] [4]घनचन्द्रातपनिर्मला रजन्यः ।
धवलाम्बुधरा दिशोऽप्यभूवन् कलुषं कामुकमण्डलस्य चेतः ॥ ६५ ॥

इति निर्विशति त्रिलोकनाथे हृदयानन्दकरीं शरद्विभूतिम् ।
तुहिनर्तुरथेर्ष्ययेव तस्थौ स्वगुणाविष्कृतितत्परस्तदग्रे ॥ ६६ ॥

दिवसेऽप्यनिरूपणीयरूपा मणिमञ्जीररवानुमेययात्राः[5] ।
विशिखासु हिमावृतासु जग्मुर्दयितानामभिसारिकाः[6] समीपम् ॥ ६७ ॥

सुभगागरुधूपसौरभाणि[7] प्रतिसीरावृतजालमण्डलानि[8] ।
अजयन्न[9]बलान्विता युवानो हिममन्तर्भवनानि सेवमानाः ॥ ६८ ॥

प्रसमीक्ष्य दिशः[10] [11]प्रपन्नहर्षाश्चिरकालोपनतां हिमर्तुलक्ष्मीम् ।
व्यहरन्निव[12] धूसरा हिमान्या विकिरन्त्यो[13] घनसारधूलिजालम् ॥ ६९ ॥

महिलास्तुहिनागमेन भूमौ नलिनश्रोणिषु नालसात्कृतासु ।
तदुपप्लवमाननाम्बुजेषु ध्रुवमाशङ्क्य न मन्दिरान्निरीयुः ॥ ७० ॥

---

1 M2 - ०समेषु
2 M2 T1 - विनेदुः
3 T2 - सितसैतक०
4 N - नव०
5 N - ०रवानुमेजजात्राः
6 T2 - शश्वद्दयिता
7 T2 T4 - सुभगागरुधूत०
8 N - प्रतिसीरावृतजल०
9 P1 - अजयन्त
10 P1 T2 T3 T4 - दशः
11 T4 - प्रसन्न०
12 N - जहरन्निव
T3 - ०यरन्निव
13 N - विकरन्त्यो

उपहत्य सरोरुहाणि भूमौ वनितालोचनसाम्यगर्वितानि ।
अपहन्तुमिवोत्सुका[1] हिमानी दिनकृत्पाणिसरोजमुज्जजृम्भे ॥ ७१ ॥

अपरर्तुभिरग्र एव सेवां विहितां विश्वपतेर्निरीक्षमाणः ।
शिशिरः[2] स्खलदक्षरः प्रपेदे सविधं[3] वेपितविग्रहस्तदीयम्[4] ॥ ७२ ॥

गरुदन्तरसन्निविष्टशावं भृशसङ्कोचितविग्रहं कुलाये ।
अशयिष्ट[5] दिवापि शीतभीत्या विमुखं सञ्चरणे विहङ्गयूथम् ॥ ७३ ॥

न पृथक् क्षणमप्यशेत [6]काचिद्युवतिर्मानसमाकुलापि[7] तल्पे ।
शिशिरः समयो गुणेन तेन स्पृहणीयः सुतरां बभूव यूनाम् ॥ ७४ ॥

अपि नक्तमहश्च वर्तमानाः[8] पथिकाः पुण्यहुताशनोपकण्ठे ।
प्रमदापरिरम्भणोपनेयां[9] न विषोढु[10] शिशिरव्यथामजानन् ॥ ७५ ॥

परिरभ्य दृढं पयोजनेत्रः सह ताभिर्भवने[11] सुखं शयानः ।
बुबुधे मधुसूदनो न शीतं महता तत्कुचमण्डलोष्मणैव ॥ ७६ ॥

ऋतुगणमिति निर्विशन्नजस्रं व्रजवनिताशतसेवितोपकण्ठः[12] ।
अरमत सह सीरिणा स शौरिः [13]सुरगणकार्यविधानसावधानः ॥ ७७ ॥

इति सप्तमः सर्गः

---

1 T3 - उपगन्तुं
2 T3 - शिशिरर्तु
3 M2 -सविधावेपिधविग्रहस्तदीया:
4 T1 - तदीयान्
5 T1 T4 - अशायिष्ट
6 T - कापि युयुपति M2 & N end with this canto.
7 T4 - मानसामाकुला हि
8 T2 - वर्तमान:
9 T1 - ०परिरम्भणापनेयात्
10 T3 - विसोढुं
11 M2 N T1 - भवनोदरे
12 M2 N - ०वनिताजन०
13 M2 N - सुरजन०

अष्टमः सर्गः

मथुरायां[1] महोत्पाताः[2] प्रादुरासन्[3] परःशतम्[4] ।
कंसस्य कालमासन्नं सूचयन्तः सुदारुणम् ॥ १ ॥

ववौ समीरणश्चण्डो भञ्जन्नुद्यानपादपान् ।
कंसोपभोग्यामवनीं[5] शून्यीकर्तु[6]मिवोद्यतः ॥ २ ॥

सर्वतः प्रत्यदृश्यन्त श्वेता वायसपङ्क्तयः ।
शंसन्त्य[7] इव दैत्यानां भवित्रीमन्यथास्थितिम्[8] ॥ ३ ॥

[9]पिशितोत्पाटनायेव[10] दैत्यानां वधमेष्यताम्[11] ।
तत्सौधरत्नकलशे[12] गृध्रास्तुण्ड[13]मशातयन् ॥ ४ ॥

करिणीनां कपोलेषु मेचकेषु मदाम्भसा ।
भ्रमराणामजायन्त पानगोष्ठ्यो[14] दिने दिने ॥ ५ ॥

इत्युत्पातस[15]हस्राणि दृष्ट्वा भोजमहीपतिः ।
मुखस्थेन विकारेण वेद्यमन्तर्दधे भयम् ॥ ६ ॥

अस्मिन्नवसरे कश्चित् प्रतिहारः[16] कृताञ्जलिः[17] ।
तस्मै निवेदयमास द्वारि नारदमागतम् ॥ ७ ॥

---

1 M1 P1 - मधुरायां
2 T2 - महोबाताः
3 M1 - प्रादुरासा
4 T2 - पुरश्शतम्
5 P1 - अवनिं
6 M1 T1 T3 - शून्यो
7 T1 T2 T3 T4 M1 - शंसन्त
8 M1 - स्थिती
9 In T2, Verses 4 to 13 incl. are missing. Instead verses 13 d to 16 a in Canto XII are found-
10 M1 - पिशितोत्पाटना एव
T3 - ०पाटलायेव
11 M1 - वधमेष्यता
12 T3 - ०रत्नशकले
13 M1 - तून्धं
14 T3 - पानगोधे
15 M1 - इत्युत्पाद
16 M1 - प्रतीहारः
17 M1 - कृताञ्जलिम्

अथ कंसः समुत्थाय स गत्वा किञ्चिदन्तरम्[1] ।
प्रणम्य मुनिशार्दूलमानिनाय गृहोदरम् ॥ ८ ॥

कृतसत्कृतिरासीनः स पृष्ट्वा तमनामयम् ।
वचनं नारदः किञ्चिदनुगृह्णन्निवाब्रवीत् ॥ ९ ॥

मुखं तव महीपाल! परिम्लानमिवेक्ष्यते ।
अप्रसन्नमिदं ब्रूते वैमनस्यं महत्तरम् ॥ १० ॥

बाहुदण्डबलाक्रान्तभुवनत्रितयस्य ते ।
वैमनस्य[2]निमित्तं तु न किञ्चिदुपलक्षये[3] ॥ ११ ॥

आकर्णयितुमिच्छामि गोपनीयं न चेदिदम्[4] ।
यदि तत् प्रतिकर्तव्यं करिष्यामः प्रतिक्रियाम् ॥ १२ ॥

इत्युदीरीतमाकर्ण्य वचस्तेन तपस्विना[5] ।
वाच भोजेश्वरः प्रीतो रहस्येनमभाषत ॥ १३ ॥

वधं ते देवकीगर्भो विधास्यति विशांपते ।
इति वैहायसी काचिन्मयाश्रावि सरस्वती ॥ १४ ॥

---

1 T1 T3 T4 - अनन्तरे
2 M1 - वैमनस्ये
3 T1 T3 T4 - उपलक्ष्यये
4 M1 - b - तथा वनीयं न वेदिदम्
5 P1 - मनस्विना

तां तु निश्चिन्वता वाचं मया पापीयसा हताः[1] ।
क्रोशन्त्यामेव देवक्यां तदीया बहवः सुताः ॥ १५ ॥

कदाचिद् बालिकामेकां जातमात्रां जिघांसया ।
पादे गृहीत्वा दृषदि क्षिप्तवानस्मि रंहसा ॥ १६ ॥

सा तु व्योम्नि समुत्पत्य[2] ज्वलदायुधमण्डला ।
मयि द्वेषमकुर्वाणा कृपया वाचमब्रवीत् ॥ १७ ॥

जातः संप्रति[3] मेदिन्यां निहन्ता[4] तव दुर्मते ।
आत्मनश्चिन्तय क्षिप्रं बन्धुभिः सहितो हितम् ॥ १८ ॥

एवमुक्त्वा दिवं सागादुद्ग्रीवेण मयेक्षिता[5] ।
सेविता सिद्धगन्धर्वयक्षविद्याधरोरगैः[6] ॥ १९ ॥

तमेव देवं[7] मेदिन्यां[8] जातं मत्वा जनार्दनम् ।
नदीपूरनलेनेव चकम्पे हृदयेन मे ॥ २० ॥

अजातबलयोगस्य जातमात्रस्य शार्ङ्गिणः ।
निग्रहाय मया तस्य प्रेषितो बहवो भटाः[9] ॥ २१ ॥

---

[1] T1 T1 T4 - हता
[2] M1 - समुल्लुत्य
[3] $M1_1$- जातस्त्वं प्रति
[4] M1 - निहन्त्वा
[5] T1 T3 - अभिवीक्षिता
[6] T3 यक्षगन्धर्वसिद्धय
[7] M1 - देव
[8] M1 - मेदिन्या
[9] T2 - बलवोऽसुराः

जातः क्व नु जगन्नाथो गतैर्वा[1] किमकारि तैः ।
इति जिज्ञासमानस्य कालो मे सुमहानगात् ॥ २२ ॥

दृश्यन्ते बहवश्चास्मिन्नुत्पाता दारुणाः पुरे ।
भविष्यति किमित्यद्य मदीयं[2] व्याकुलं मनः[3] ॥ २३ ॥

महर्षे ! सर्वमप्येतत् तत्त्वतो वक्तुमर्हसि ।
स्फुरत्येव हि विश्वं ते विमले मतिदर्पणे ॥ २४ ॥

इत्युदीरितमाकर्ण्य भोजभूपतिना मुनिः ।
क्षणं ध्यायन्निव स्थित्वा कथयामास तां कथाम् ॥ २५ ॥

देवोऽजायत देवक्यां जगन्नाथो जनार्दनः ।
तत्कालोत्पन्नया नन्दकन्यया परिवर्तितः ॥ २६ ॥

सागच्छत् सुमनोलोकं तदानीं तव पश्यतः ।
स तु गोपसुतो भूत्वा घोषे गूढमवर्धत[4] ॥ २७ ॥

मायया[5] विश्वमोहिन्या तस्य[6] दानववैरिणः ।
इयं बहूनि वर्षाणि कथा भुवि न पप्रथे ॥ २८ ॥

---

1 M1 - गतेर्वा
2 T1 T2 T3 - मदीया
3 T2 - मुनेः
4 M1 - अवर्तत
5 T3 - दयया
6 T3 - तस्या
7 M1 - इवं

त्वया संप्रेषिता वीरास्तन्निग्रहचिकीर्षया ।
प्रलम्बप्रमुखाः सर्वे नीतास्तेन यमक्षयम् ॥ २९ ॥

अशक्यप्रतिकारोऽयमनर्थः समुपस्थितः ।
तथापि यत्नः[1] कर्तव्यः सद्य एव नृप ! त्वया ॥ ३० ॥

इत्युक्त्वा तं वधोद्युक्तं देवकीवसुदेवयोः ।
निवार्य युक्तिमार्गेण ययौ स तदनुज्ञया ॥ ३१ ॥

गते तपोधने तस्मिन् कंसः कम्पितमानसः ।
अक्रूरमानयामास[2] तं जगाद च सादरम् ॥ ३२ ॥

ममासि[3] परमो बन्धुः संपत्सु[4] च विपत्सु[5] च ।
तत् ते किञ्चिदहं वक्ष्ये चिरकालं मनोगतम् ॥ ३३ ॥

अरातिमवनौ जातमश्रौषं कन्याकामुखात् ।
नाज्ञासिषमितः[6] पूर्वं क्वासावास्त इति स्फुटम् ॥ ३४ ॥

नारदादवगच्छामि नन्दगोपसुतं रिपुम् ।
तमानेतुमुपायेन त्वमेव क्षमसे परम् ॥ ३५ ॥

---

[1] T1 - यज्ञः
T3 - यत्तः

[2] P1 - आनिनाय

[3] T2 - ममापि

[4] M1 - सम्पत्सु

[5] T3 reads तत्ते किम् for विपत्सु च

[6] T1 T4 - अतः पूर्वं

उपायश्च धनुर्यज्ञः शूराणां कौतुकावहः ।
तस्य तद्दर्शनौत्सुक्यं जनयाभीष्टसिद्धये ॥ ३६ ॥

इति भोजेश्वरेणोक्ते[1] स तथेत्यन्वमन्यत[2] ।
तद्दर्शनेन नयने सफलीकर्तुमुत्सुकः[3] ॥ ३७ ॥

आरुह्य रथमक्रूरः पुरात् प्रमुदितो ययौ ।
ददर्श च पदं शौरेः पताकाशतशोभितम् ॥ ३८ ॥

अपरिज्ञातकार्पण्यैरज्ञातपरुषाक्षरैः ।
अविज्ञातमृषालापैः पूरितं पुरुषर्षभैः ॥ ३९ ॥

प्रचुरोत्सवसंक्षोभं[4] प्रीणितातिथिमण्डलम् ।
स्तूयमानजनौदार्यं सूतमागधवन्दिभिः ॥ ४० ॥

ललितेक्षणसंचारैः सुभ्रुभिः[5] पाटलाधरैः ।
मुखैर्गोपपुरन्ध्रीणां[6] परिभूतेन्दुमण्डलम् ॥ ४१ ॥

प्रमोदोद्गीतगोविन्दं गोविन्दभुजपालितम् ।
पालिताखिलभूदेवं[7] देवमन्तर्पणोद्यतम् ॥ ४२ ॥

---

[1] M1 - भोजेश्वरणोक्तः
[2] M1 - तथेत्यस्वमन्यत
[3] M1 - उद्यतः
[4] P1 - प्रचुरोत्सवसंक्षोभप्रीणितं
[5] M1 - सुभ्रूभिः
[6] M1 T3 - ०पुरस्त्रीणां
[7] T3 - ०भूदेव

श्रिया परोपकारिण्या कृपया निर्निमित्तया ।
उन्नत्या प्रश्रयिण्या[1] च सूचिताच्युतसन्निधिम्[2] ॥ ४३ ॥

तमागतमथाकर्ण्य मुदितो भक्तवत्सलः ।
प्रत्युज्जगाम गोविन्दः सहितः सीरपाणिना ॥ ४४ ॥

अवतीर्य[3] [4]रथात् तूर्णं तावालोक्य समागतौ ।
प्रणिपत्य प्रहर्षेण नवात्मानमबोधि सः[5] ॥ ४५ ॥

तमुत्थाप्य परिष्वज्य [6]पुलकाचितविग्रहम् ।
गृहीत्वा पाणिना पाणिं निन्यतुस्तौ गृहोदरम् ॥ ४६ ॥

[8]कृतसत्कृतिरासीनमासने वृष्णिपुङ्गवम् ।
पप्रच्छ कुशलं कृष्णः [9]स्पृशन्नङ्गानि पाणिना ॥ ४७ ॥

रचिताञ्जलिरक्रूरो भक्त्या परवशीकृतः ।
बाष्पगद्गदया वाचा व्याजहार श्रियः पतिम् ॥ ४८ ॥

उपचारमिदं मन्ये यत्क्षेममनुयुज्यते ।
कथं नु[10] कुशली न स्यां त्वयि रक्षितरि स्थिते ॥ ४९ ॥

---

[1] T1 T2 प्रश्रयिण्यं
[2] T1 T2 T3 T4 - सन्निधि
[3] T4 - अवरुह्यत:
[4] T3 - Omits रथात्
[5] T2 - अबोधित:
[6] P1 - पुलकाञ्चित
[7] T1 T3 - ०विग्रहः
[8] M1 कृतसत्कारं
T3 - कृतसास्तकारं
[9] T1 T3 - स्मरन्
[10] M1 - तु
P1 - न

इह प्रेषयता राज्ञा कृतं मे सुकृतं महम् ।
यदालोकिषि[1] नाथः त्वामवाङ्मनसगोचरम् ॥ ५० ॥

[2]खलपादार्पणायत्तं विसस्मार पराभवम् ।
भवच्चरणविन्यासधन्या संप्रति मेदिनी ॥ ५१ ॥

तं [3]प्रहर्षसमावेशादिति स्तुतिशताकुलम्[4] ।
मध्ये निवारयन्नाह मधुरं मधुसूदनः ॥ ५२ ॥

स्तौषि[5] मां[6] त्वमहं स्तूय इति साध्वी विडम्बना ।
ननु विग्रहमात्रेण भेदः केवलमावयोः ॥ ५३ ॥

श्रान्तस्त्वमसि[7] तत्कुर्याः स्नानमुष्णेन वारिणा ।
स्यन्दनक्षोभसंभूतामङ्गपीडामपोहितुम् ॥ ५४ ॥

इति सादरमक्रूरो नियुक्तस्तेन शौरिणा ।
स तु[9] निर्वर्तितस्नानः[10] प्रहर्षात्[11] रुजमत्यजत्[12] ॥ ५५ ॥

नीतेन सविधं तेन बुभुजे सह हृष्यता ।
उपाचरच्च तं कृष्णः स्रक्ताम्बूलानुलेपनैः ॥ ५६ ॥

---

[1] M1 - यदालोकिनि
[2] T3 - बल०
[3] M1 - प्रहर्ष्य
[4] M1 - स्तुतिशयाकुलम्
[5] M1 T4 - स्तुवसि
[6] M1 T4 omits मां
[7] T3 - श्रान्तस्तमसि
[8] M1 - संभूत
P1 - संजातां
[9] M1 T2 T3 - न
[10] T1 T2 T3 T4 - ०स्नाना
[11] T1 - प्रहर्षरसमत्यजत्
M1 - प्रहषरसमत्यजेत्
[12] T3 - अत्यजेत्

नारदात् तत्त्वविज्ञानं दुष्टं कंसस्य[1] चाशयम् ।
तत्त्वतः कथयामास स तयोः[2] सकलं मिथः ॥ ५७ ॥

अथ जिज्ञासमानानां निजागमनकारणम् ।
जनानां सन्निधावुच्चैरूचे वृष्णिपतिर्वचः ॥ ५८ ॥

युवां वीरौ परिज्ञाय धनुर्यज्ञमुपस्थितम्[3] ।
आह्वयत्यनुसन्धातुं मन्मुखेन[4] महीपतिः ॥ ५९ ॥

प्रतिपत्तिर्नृपाज्ञाया मथुराया विलोकनम्[5] ।
प्रकाशनं च शौर्यस्य बहुधा गमने फलम्[6] ॥ ६० ॥

इति श्रुत्वा तदालापं विनयं दर्शयन् मुखे ।
स्वरेण महता [7]शौरिर्जनानामग्रतोऽब्रवीत् ॥ ६१ ॥

फलैः किमपरैस्तानि[8] भवन्तु न भवन्तु वा ।
इदमेव फलं प्राज्यं यन्नृपाज्ञानुवर्तनम् ॥ ६२ ॥

दिवसोऽद्य गतप्रायः श्वो यास्यामः पुरीं प्रति ।
इत्युक्त्वा सुहृदो वीक्ष्य पुनः प्राह परः[9] पुमान्[10] ॥ ६३ ॥

---

[1] T3 - कौंसस्य
[2] T2 - तयोः सः सकलं
T3 - स तु सकयो
[3] T2 - अवस्तिम्
[4] T3 - उन्मुखेन
[5] P1 - अवलोकनम्
[6] T3 - गमनेषु लम्
[7] M1 - शौरि
[8] T1 T2 T4 - तात
[9] P1 - आह
[10] M1 P1 T2 T4 - पुमान् परः
T1 - परं पुमान्

सज्जीभवत[1] सर्वेऽपि यातुं[2] तातपुरस्सराः[3] ।
न हि लोकद्वयेऽप्यस्ति राजाज्ञालङ्घिनो गतिः ॥ ६४ ॥

इति सर्वान्[4] समादिश्य सुहृदः प्रीतचेतसः ।
अक्रूरेण सहानैषीच्छेषमह्नः कथाशतैः ॥ ६५ ॥

प्रयाणवार्तां कृष्णस्य निशम्याशनिदारुणाम् ।
सहसा गोकुलं सर्वमाकुलं तदजायत ॥ ६६ ॥

यशोदानन्दगोपाभ्यां किं नावार्यत केशवः ।
अन्योन्यमिति [5]पृच्छन्त्यश्चेरुर्गोप्यो गृहाद् गृहम् ॥ ६७ ॥

यशोदानन्दयोः कुर्वन् पुत्रशौर्योपपादनम् ।
अक्रूरः शमयामास कंसाद् भयमुपह्वरे ॥ ६८ ॥

निशायाः प्रथमं यामं नीत्वा कथितसत्कथः ।
नन्दसंकर्षणाक्रूरैरशेत सह माधवः ॥ ६९ ॥

प्रत्यूषे पुण्डरीकाक्षः प्रथमं प्रत्यबुध्यत ।
चिन्तया निशि निर्निद्रामभाषत च मातरम् ॥ ७० ॥

---

[1] P1 - सज्जीभवन्तु
[2] T1 T2 - यान्तु
[3] M1 - ता तु
[4] M1 - सर्वं
[5] M1 - पृच्छन्त्यो

मा त्वया चिन्त्यतां मातर्मयि कंसादुपद्रवः ।
मया हि बहवः स्वप्ना दृष्टाः कल्याणशंसिनः ॥ ७१ ॥

इदानीमाज्ञया राज्ञः सर्वे यामः[1] पुरीं वयम् ।
अनाश्रमविषण्णा[2] त्वं प्रत्यवेक्षस्व गोकुलम् ॥ ७२ ॥

दुःखितं मद्वियोगेन स्नानभोजननिस्स्पृहम्[3] ।
व्रजमाश्वासया[4]जस्रं मदागमनवार्तया ॥ ७३ ॥

पूर्वमेवोदयात् पूष्णो गूढं गच्छामि गोकुलात् ।
पश्येयुश्चेन्न भुञ्जेयुर्गावो मामपि वारिताः ॥ ७४ ॥

इत्युक्त्वा निर्ययौ[5] कृष्णो नन्दगोपादिभिर्वृतः[6] ।
कृतस्वस्त्ययनो[7] देव्या बाष्पपूरितकण्ठया ॥ ७५ ॥

सुरकार्यादरेणाग्रे दाक्षिण्येन च पृष्ठतः ।
[8]आकृष्यमाणो दैत्यारिः क्षणमासीत् समाकुलः ॥ ७६ ॥

दृशः पर्याकुला[9] दृष्ट्वा मृगीणां वनभूमिषु ।
स्मरन् जगाम कृच्छ्रेण स गोपीदृष्टिविभ्रमम्[10] ॥ ७७ ॥

---

1 T2 - पुरीं प्रति
2 M1 - अविषण्डा
3 M1 - ०निस्पृहः
4 M1 - आश्वासय
5 T1 T2 T3 T4 - निर्ययुः
6 M1 - युतः
7 M1 - इतः स्वस्त्ययनं
8 T3 add - 'मृगीणां वनभूमिषु' between b and c
9 M1 - दृशौ पर्याकुले
10 M1 - ०विक्रमम्
T1 T2 T3 T4 - ०विभ्रमः
P1 - ०विभ्रमत्

अथ घोषमगोविन्दं वीक्ष्य गोपालकन्यकाः ।
अतिमात्रमदूयन्त पतिता इव पावके ॥ ७८ ॥

स्मरन्त्यस्तस्य[1] माधुर्यमौदार्यं प्रियवादिताम् ।
विलेपुर्विगलद्बाष्पधाराहतपयोधराः ॥ ७९ ॥

[2]गच्छतः कृष्णमादाय जीवितं गोपयोषिताम् ।
अक्रूर इति तस्याख्या केन मूढेन कल्पिता ॥ ८० ॥

पुरा नास्माभिरज्ञायि दुःखं भुवनविश्रुतम्[3] ।
हतेन विधिना तत्तु ज्ञाप्यते साधु सांप्रतम् ॥ ८१ ॥

प्रसन्नं पद्मपत्राक्षं बिम्बोष्ठं चारुकुण्डलम् ।
द्रक्ष्यन्ति वदनं धन्याः कृष्णस्य पुरयोषितः ॥ ८२ ॥

स्वप्नः किमिदमाहोस्विन्माया[4] वा केनचित् कृता ।
शौरिरक्षीणदाक्षिण्यो[5] न क्षणं नः परित्यजेत् ॥ ८३ ॥

विलप्यैवं विषादिन्यो मुक्तमानभयत्रपाः ।
ताः प्रपन्ना इवोन्मादं चेरुर्दिक्षु विदिक्षु च ॥ ८४ ॥

---

1 M1 - स्मरन्त
2 T2 Omits the word गच्छतः
3 M1 - दुःख भूप न विश्रुतम्
4 P1 - किमयं
5 M1 - ईक्षण
6 M1 - प्रपन्नं T3 - प्रसन्ना

अमन्त्य:[1] शिथिला नीवीर्विग्रस्तान्[2] कबरीभरान्[3] ।
गलितानि च नाजानन् वलयानि[4] व्रजस्त्रियः ॥ ८५ ॥

काचिन्मरतक[5]श्यामं कालिन्दीकूलसं[6]भवम् ।
परिरेमे चिरं बाला[7] तमालं कृष्णशङ्कया ॥ ८६ ॥

गोवर्धनोपकण्ठेषु वृन्दावनमहीषु च ।
कृष्ण कृष्णेति काप्युच्चैराजुहावार्तनिस्वना[8] ॥ ८७ ॥

कस्तूरीमण्डनं काचित् कृष्णेन कुचयोः कृतम् ।
रक्षितुं वलितग्रीवा मुमोचास्रुपयःकणान् ॥ ८८ ॥

कुलिशध्वजमत्स्याङ्कं कालिन्दीसैकतार्पितम् ।
पदं कृष्णस्य पश्यन्ती काचिदासिष्ट[9] नोदगात् ॥ ८९ ॥

हृदयादपि[10] गोविन्दो यास्यतीति भयात् परा ।
ददृशे वारयन्तीव वक्षः[11] स्थितकरद्वया ॥ ९० ॥

अलं[12] वः परितापेन दृष्टो दामोदरो मया ।
ममास्ते मनसीत्युच्चैः काचिदूचे ससंभ्रमम् ॥ ९१ ॥

---

[1] M1 - व्रजन्त्यः
[2] M1 - ०विग्रस्तात्
[3] M1 - कबरीभरात्
[4] T3 C & D
ना जान बालयामि
[5] M1 - मरकत
[6] M1 - ०फुल०
[7] M1 - बालं
P1 - बला
T1 T2 - कालं
T3 T4 - बालं
[8] P1 - ०निस्वम्
[9] M1 - आशिष्ट
[10] M1 - हृदयामपि
[11] M1 - पक्षः०
[12] T2 - अयं

यस्या [1]नाम्नाहमाहूये तामेव भज किं मया ।
इति संकल्प्य कृष्णाय चुकोप सुचिरं परा[2] ॥ ९२ ॥

इति कृष्णमयं विश्वं पश्यन्त्यो रागविह्वला[3]ः ।
स्पृहणीया बभूवुस्ता महतामपि योगिनाम् ॥ ९३ ॥

स्वयमेव विनिर्गत्य गावः पर्यश्रुलोचनाः ।
चेरुः कृष्णं विचिन्वन्त्यो वनेषु तृणनिःस्पृहाः[4] ॥ ९४ ॥

तत्र नावाचि[5] नास्नायि नाभोजि व्रजवासिभिः ।
ध्यायन्तः केवलं कृष्णं सर्वे तूष्णीमशेरत ॥ ९५ ॥

यथा यथा पुराभ्याशं जगाम जगतां पतिः ।
आजगाम[6] गतोद्वेगः कंसं कालस्तथा तथा ॥ ९६ ॥

दिने[7] तस्मिन्नतिक्रम्य दूरमध्वानमच्युतः ।
उवास नगरादारादारामे[8] सपरिच्छदः ॥ ९७ ॥

प्रविश्य पुरमक्रूरो दृष्ट्वा कंसं समाकुलम् ।
उक्त्वा तमागतं तस्मै तद्विसृष्टो गृहं ययौ ॥ ९८ ॥

---

[1] M1 - नाम्नायमाहूये
T3 - नामाहमाहूये
[2] M1 - वरा
[3] T1 - रागविह्वला
[4] P1 - करुणस्वनाः
[5] P1 - नापाचि
[6] M1 - आससाद
[7] T2 - गते
[8] M1 - नगरद्वारा
T3 - नगरादादारामे

कृष्णनिग्रहणोपायाननेकान् परिकल्प्य सः ।
प्रथमः पापशीलानामास्तालक्षितविक्रियः[1] ॥ ९९ ॥

तत्र तं दिवसं[2] नीत्वा प्राह्णे[3] पङ्कजलोचनः ।
ददर्श दर्शनीयस्तां मथुरां मधुराशयः ॥ १०० ॥

केतुभिः पवनोद्धूतैः[4] प्रचलत्पक्षविभ्रमैः ।
करोतीव दिवं जेतुं या समुत्पतनोद्यमम्[6] ॥ १०१ ॥

नलिनैरिव नारीणां वदनैः प्रतिबिम्बितैः ।
नलिन्य[7] इव शोभन्ते यत्र नीलाश्मभूमयः[8] ॥ १०२ ॥

यत्सौधशिखरस्थानां मध्याह्नेषु पटुत्विषाम्[9] ।
भवति[10] स्वर्णकुम्भानां क्षणमन्यतमो रविः[11] ॥ १०३ ॥

दौत्ये[12] यत्र पुरन्ध्रीभिर्नियुक्ताः[13] शुकशारिकाः[14] ।
आनयन्ति प्रियालापैर्यूनः श्रवणहारिभिः ॥ १०४ ॥

[15]दृष्टिशक्तिप्रहारार्ता युवानो यत्र योषिताम् ।
उज्जीवन्ति पुनस्तासामधरामृतसेवया ॥ १०५ ॥

---

1 M1 - ०विग्रहम्
2 M1 - तद्दिवसं
3 M1 - प्राह्णो
4 M1 - पवनोद्यूतैः
5 M1 - प्रचलन्
6 T3 - समुत्पतनोद्यतम्
7 M1 - नलिन्या
T4 - नलिन्याः
8 P1 - ०मूतयः
9 T3 - पटुद्विषाम्
10 M1 - भवती
P1 - भवन्ति
11 T1 T2 T3 T4 - क्षणमन्यतमोरपि
12 M1 T2 - दूत्ये
T3 दूत्यै
13 T1 T3 T4 - प्रयुक्ताः
14 T3 - शुकशारकाः
15 T3 - सृष्टिशक्ति

अदृष्टतपनालोका यद्गृहोद्यानभूमयः ।
सातपा इव लक्ष्यन्ते क्रीडारत्नगृहत्विषा[1] ॥ १०६ ॥

न मन्दिरमनुद्यानं नोद्यानमपदीर्घिकम् ।
दीर्घिका यत्र नाहंसा[2] हंसो नास्ति च निर्मदः ॥ १०७ ॥

यत्र सन्नतगात्रीणामदृष्टिपथगोचराः ।
[3]अविघ्नतपसः[4] सर्वे भवन्ति मुनिपुङ्गवाः ॥ १०८ ॥

शीतलः कुसुमामोदी[5] यद्गृहोद्यानमारुतः ।
मुष्णाति[6] सुरतग्लानिं[7] पुष्णाति च मृगीदृशाम् ॥ १०९ ॥

भवन्ति भवनस्तम्भमण्डले मणिनिर्मिते ।
[8]युवतिप्रतिमा यत्र सचेष्टाः सालभञ्जिकाः ॥ ११० ॥

कटाक्षेषु मृगाक्षीणां निधाय धुरमात्मनः[9] ।
सह संक्रीडते[10] रत्या यत्र कामो दिवानिशम् ॥ १११ ॥

यत्र चन्द्रकरस्पृष्टचन्द्रकान्तगृहच्युतः[11] ।
यामिनीषु पयःपूरः[12] सिञ्चत्युद्यनवाटिकाः[13] ॥ ११२ ॥

---

[1] P1 - ०त्विषः
[2] T2 - यत्र हस्तो नास्ति
[3] M1 निर्विघ्न
[4] T3 T4 - ०तपरः
[5] M1 - शीतलं कुसुमामोदि
[6] T3 - मुष्णन्ति
[7] T3 - सुरसग्लानि
[8] M1 - युवती०
[9] M1 - मधुरात्मनः
[10] T3 - सहसे क्रीडते
[11] M1 - ०गृहच्युताः
[12] M1 पयः पुरं
[13] M1 ०पाविताः

तां पश्यन् नगरीं शौरिः कौतुकोत्फुल्ललोचनः ।
राजमार्गमगाहिष्ट[1] मणितोरणमण्डितम् ॥ ११३ ॥

विष्टरश्रवसं द्रष्टुं वनिता जनितादराः ।
आरोहन्[2] विपुलारोहा रम्यं हर्म्यं कृतत्वराः ॥ ११४ ॥

लब्धदेहमिवानङ्गं शीतांशुमिव[3] भूगतम्[4] ।
नार्यः पर्यग्रहीषुस्तं नयनोत्पलदामभिः ॥ ११५ ॥

नयनाञ्जलिभिः कामं तद्रूपामृतपायिनः ।
तृष्णा युवतिलोकस्य न व्यरंसीत्[5] कदाचन ॥ ११६ ॥

कामकार्मुकनिर्मुक्तैः[6] कृतमार्गाणि मार्गणैः ।
मनांसि मदिराक्षीणां जगाहे[7] जलजेक्षणः ॥ ११७ ॥

तं व्रजन्तं तमालाभं मालाकारो महीपतेः ।
ददर्श देवकीसूनुं पूर्णेन्दुप्रतिमाननम्[8] ॥ ११८ ॥

प्रणम्य प्रार्थयांचक्रे स तं भक्त्या समृद्धया ।
पवित्रय[9] पदाम्भोजपांसुभिर्मे गृहानिति ॥ ११९ ॥

---

1 M1 - अगातिष्ट
2 M1 - आरूढ
3 M1 - इह
4 M1 - भूगतः
5 T3 - व्यरासीत्
6 M1 - ०निर्मुक्ततृध्या
7 M1 - जगाद
8 T3 - ०प्रतिमाहतम्
9 T3 - पवित्रीय

तथेति भवनं तस्य प्रयातं[1] भक्तवत्सलम्[2] ।
प्रीतः प्रसाधयामास[3] स तं माल्यैर्मनोहरैः ॥ १२० ॥

माल्यानि मधुगन्धीनि प्रतिगृह्य प्रसेदिवान् ।
आदिक्षदुचितं तस्मै सुहृदे सुमनःपदम्[4] ॥ १२१ ॥

तद्गृहात्तं विनिर्गत्य गच्छन्तं गरुडध्वजम् ।
कुब्जा काचिदवैक्षिष्ट कंसस्यालेपकारिणी ॥ १२२ ॥

प्रणम्य परया भक्त्या चिरमभ्यर्थितस्तया[5] ।
जगाम भवनं तस्या देवो दाक्षिण्यसागरः ॥ १२३ ॥

तत्र चन्दनकर्पूरकस्तूरीकुङ्कुमादिभिः ।
शौरिमाराधयामास सा दिव्यैरनुलेपनैः ॥ १२४ ॥

पद्भ्यामाक्रम्य तत्पादौ चिबुके पाणिनोत्क्षिपन्[6] ।
ऋज्वीमापादयामास तां प्रीतः पद्मलोचनः ॥ १२५ ॥

प्रगुणीकृतदेहायास्तेन[7] कैटभवैरिणा ।
अशिष्यत परं[8] तस्या भ्रुवोः केशे च[9] वक्रता ॥ १२६ ॥

---

[1] M1 - प्रययौ
[2] M1 - भक्तवत्सलः
[3] M1 - प्रसादयामास
[4] M1 - सुमनाः पदम्
T2 - सुमनःपरम्
[5] P1 - अभ्यर्चितः
[6] M1 - पाणिनोत्क्षिपत
[7] T2 - प्रागुणी०
[8] M1 - वरं
[9] M1 - केशव चक्रता

अहार्षीदरविन्दाक्षस्तस्या वपुषि विक्रियाम् ।
उदपादि पुनस्तेन हृदि सा मन्मथोद्भवा ॥ १२७ ॥

स तस्या विकृतिं मत्वा शोकालापविलोकनैः[1] ।
कल्याणि! कृतकार्यस्त्वां द्रक्ष्यामीति मुमोच ताम् ॥ १२८ ॥

लीलया लोकनाथस्तां कुब्जामृज्वीं विधाय सः ।
वक्रीकर्तुं धनुर्यष्टिं निर्जगाम [2]ततो गृहात् ॥ १२९ ॥

अवारितः प्रतीहारैः स्वाभिरूप्यहृतेक्षणैः[3] ।
स विवेश धनुश्शालां दर्शितां पुरवासिभिः ॥ १३० ॥

अतिदीर्घं महाभोगं तत्रापश्यच्छरासनम् ।
पयोधिमथनायासप्रसुप्तमिव[4] वासुकिम् ॥ १३१ ॥

राजलोकदुरारोपं[5] चापं गृह्णन् करेण सः ।
[6]अन्यजन्मजमस्मार्षीत् सीतापाणिग्रहादरम् ॥ १३२ ॥

सविलासं समारोप्य तदेकेनैव पाणिना ।
बभञ्ज धनुराकर्षन्[7] कंसस्य च मनोरथम् ॥ १३३ ॥

---

[1] T3 - चैकालापविलोम्नै
[2] T3 - Omits ततो and reads गृहोदरात्
[3] M1 - स्वामिरूपहृतेक्षणै
[4] M1 - ०प्रसृप्तमिव
[5] T3 - दुरालोपं
[6] T3 - अजन्मजन्म०
[7] M1 - धनुराकर्ष

धनुषो भज्यमानस्य ध्वनिः श्रवणदारुणः ।
आनशे भुवनाभोगं[1] निर्घातः[2] कंसभूभृतः ॥ १३४ ॥

धनुर्भङ्गकृतामर्षा योधा रिपुविदारिणम्[3] ।
कृष्णमभ्यद्रवन् सर्वे प्रहर्तुं खड्गपाणयः ॥ १३५ ॥

तान् समापततः सर्वान् विलोक्य विहसन् हरिः ।
धनुषः खण्डमादाय जघान सहलायुधः ॥ १३६ ॥

श्वः करिष्यामि कंसस्य वधमित्यध्यवस्य सः ।
ततो निर्गत्य भवनाद् भूयोऽपि शकटं ययौ ॥ १३७ ॥

प्रातरागत्य पश्येयं कंसस्य निधनोत्सवम् ।
इति मत्वेव मार्ताण्डो[4] विहायागाद् विहायसम्[5] ॥ १३८ ॥

स[6] स्वविश्लेषजं दुःखमुत्पश्यन्[7] गोपयोषिताम् ।
कंसश्च[8] चिन्तयाविष्टो न निद्रामधिजग्मतुः[9] ॥ १३९ ॥

विभातायां विभावर्यां वीराणां कौतुकात्रहम् ।
मल्लदुन्दुभिनिर्घोषमश्रौषीदम्बुजेक्षणः ॥ १४० ॥

---

[1] T3 - अनतेभ्य वनाभोग
[2] T3 - निघातः
[3] M1 - ०विदारिणः
[4] P1 - मार्तण्डो
[5] T1 T4 - ययौ मुक्त्वा विहायसम्
[6] M1 - स्वं
[7] M1 - उत्पश्य
[8] M1 - कंसस्य
[9] M1 - अभिजग्मतुः

नन्दमाह च गच्छाग्रे पश्य भूपमुपायनैः ।
अहमार्यश्च यास्यावः पश्चात् तातः पुरीमिति ॥ १४१ ॥

तथेति सह गोपालैर्नन्दे राजगृहं[1] गते ।
गते चोदयमादित्ये साग्रजः प्राविशत् पुरीम् ॥ १४२ ॥

कुम्भसंभवरोषेण पुनर्विन्ध्यमिवोत्थितम्[2] ।
गजं कुवलयापीडं रङ्गद्वारि व्यलोकयत् ॥ १४३ ॥

अब्रवीच्च महामात्रं गोविन्दो धीरया गिरा ।
यदि ते वारणे वाञ्छा देहि मे पदवीमिति ॥ १४४ ॥

तेन संजातरोषेण कंसादेशविधायिना ।
प्रेरितो[3] वारणेन्द्रस्तं दुद्राव मददर्पितः ॥ १४५ ॥

गुरुभिश्चरणन्यासैः शौरेः सविधमाप[4] सः ।
दिक्कुञ्जरधृतामुर्वीमीर्ष्यया नमयन्निव ॥ १४६ ॥

ग्रहणाय कृतोत्साहं प्रसारितकरार्गलम् ।
गतिभिस्तमनेकाभिर्वञ्चयन् विचचार सः ॥ १४७ ॥

---

[1] T3 - नन्दगोपे गृहं

[2] P1 उद्यतम्

[3] T3 - प्रेषितो

[4] T3 -चरयु माप

द्विरदस्य पुरः[1] पश्चात् पार्श्वयोश्चरणान्तरे ।
भ्रमन्नलातचक्रस्य[2] लक्ष्मीं लक्ष्मीपतिर्दधौ ॥ १४८ ॥

प्रासादशिखरारूढैर्विस्मयस्तिमितेक्षणैः ।
वीक्ष्यमाणो महीपालैश्चिरं चिक्रीड केशवः ॥ १४९ ॥

तदीयं प्रतिकुर्वाणो विक्रमं च त्रिविक्रमः ।
तलैरशनिकल्पैस्तं रन्ध्रेषु प्रजहार च[3] ॥ १५० ॥

स कंसनिधनं द्रष्टुं महिषेणोपसर्पते ।
प्रीत्येव[4] प्रेतराजाय प्रेषयामास[5] तद्[6] द्विपम् ॥ १५१ ॥

हरिणा निहते तस्मिन् पतिते भुवि कुञ्जरे ।
सुहृदां सिंहनादेन[7] नभो भिन्नमिवाभवत्[8] ॥ १५२ ॥

दन्तौ[9] विक्रमवृक्षस्य वहन्तौ[10] विटपश्रियम् ।
उत्पाट्य[11] स [12]तयोरेकमग्रहीदपरं बलः ॥ १५३ ॥

अंसन्यस्तस्य दन्तस्य त्विषा धौतार्धविग्रहः ।
कृष्णो मन्दाकिनीमिश्रकालिन्दीपूरवद्[13] बभौ ॥ १५४ ॥

---

1 T2 - पुनः
2 T2 - आलोकचक्रस्य
3 T3 - सः
4 M1 - प्रीत्यैव
5 T3 - P1 - प्रेषयामास प्रेतराजाय
6 P1 - तं द्विपम्
7 M1 - सिंहनादे
8 T3 - अभवेत्
9 M1 - दन्तो
10 M1 - वहन्तो
11 M1 - उत्पाट्यं
12 T3 - सहयोरेकं
13 T4 - ०पूरयन्

रङ्गं रङ्गेशयः[1] प्राप प्राप्यः सत्पथवर्तिनाम् ।
दत्तवर्त्मा[2] जनैराशु[3] गौरवेण भयेन च ॥ १५५ ॥

व्यायामकठिनैरङ्गैरयस्तम्भानुकारिणः[4] ।
अपश्यत् क्रीडतो मल्लान् स चण्डातकधारिणः[5] ॥ १५६ ॥

नियुज्यमानं[6] कंसेन नियुद्धालोकमिच्छता ।
चाणूरं प्रतिजग्राह कृष्णो रामश्च मुष्टिकम् ॥ १५७ ॥

कृतानि प्रतिकुर्वाणौ रन्ध्रान्वेषणतत्परौ ।
चेरतुः कृष्णचाणूरौ मध्ये रङ्गस्य मण्डलम् ॥ १५८ ॥

पतनोत्पतनैः सद्यो हठाद् ग्रहणमोचनैः ।
कृष्णचाणूरयोरासीन्नियुद्धं रोमहर्षणम् ॥ १५९ ॥

वक्षः कृष्णस्य चाणूरो मुष्टिभिः प्राहरद्[7] दृढम् ।
विव्यथे[8] वीक्षमाणानां हृदयं तु सभासदाम् ॥ १६० ॥

प्रहरन्तं[9] समाकृष्य भुजे[10] मल्लं भुजेन सः ।
अवनौ पातयामास तं जग्राह च जङ्घयोः ॥ १६१ ॥

---

[1] T1 T3 T4
रङ्गेशय यः प्राप
[2] T2 - वत्तवर्त्म
[3] T1 T3 - भयेनाशु
[4] T3 - ०कठतै
[5] T3 - चण्डातवधारिणः
[6] M1 - नियुज्यमानः
[7] T3 - प्राह
[8] M1 - विव्यधे
[9] M1 - प्रहरन्त
[10] M1 - भुजो

अथ दोर्भ्यां समुत्क्षिप्य निर्णेजक इवाम्बरम्[1] ।
प्रजहार शिलापृष्ठे चाणूरं लीलयाच्युतः ॥ १६२ ॥

हतं कुवलयापीडमानेतुमिव भूभुजे ।
प्रपेदे पदवीं तस्य चाणूरस्त्वरयान्वितः ॥ १६३ ॥

मुष्टिकं मुष्टिवज्रेण हत्वा हलधरः क्षणात् ।
अन्यानापततो मल्लान् पातयामास भूतले ॥ १६४ ॥

तेषु युद्धश्रमेणेव[2] शयानेषु महीतले ।
सिंहनादं विमुञ्चन्तो ननृतुर्गोपसूनवः ॥ १६५ ॥

आत्मीयं[3] निधनं दृष्ट्वा दृष्ट्वा च द्विषदुन्नतिम् ।
प्राह कञ्चुकिनः कंसो गोपान् प्रहरतेति सः ॥ १६६ ॥

तथेति ताड्यमानानां चण्डैः कञ्चुकिमण्डलैः[4] ।
सुहृदां वैशसं दृष्ट्वा क्रुधा[5] जज्वाल केशवः ॥ १६७ ॥

उत्पपात च वेगेन मञ्चं सिंह[6] इवाचलम् ।
कंसश्च सहसोत्तस्थौ गृहीत्वा खड्गचर्मणी[7] ॥ १६८ ॥

---

1 M1 - इवाम्बरः
2 M1 - युद्धश्रमेणैव
3 P1 - आत्मीयनिधनं
4 M1 - कञ्चुकमण्डलैः
5 M1 - क्रुद्धो
6 M1 - सिंहं
7 M1 - वल्गचर्मणि

खड्गं[1] प्रहरतस्तस्य वञ्चयन्नुरुविक्रमः ।
पादेन पादमाहत्य[2] पातयामास तं भुवि ॥ १६९ ॥

पुनरुत्पततस्तस्य भुजौ[3] प्राहरदङ्घ्रिणा ।
ताभ्यां दूरं समुत्पत्य पेततुः खड्गचर्मणी ॥ १७० ॥

उद्गच्छन्तं पुनः क्रोधान्मुष्टियुद्धचिकीर्षया ।
पादपृष्ठप्रहारेण[4] पातयामास मञ्चतः[5] ॥ १७१ ॥

जयन्तु जगदाधारा गोब्राह्मणदिवौकसः ।
ब्रुवन्नित्यपतत् तस्मिन् वैनतेय इवोरगे ॥ १७२ ॥

चराचराणां लोकानामधिष्ठानस्य शार्ङ्गिणः ।
भरेण स चटत्कारं[6] त्रुट्यदङ्गो[7] व्यशीर्यत ॥ १७३ ॥

स धन्यः पुण्डरीकाक्षं पश्यन्नुत्सृष्टजीवितः ।
प्रत्यपद्यत तेनैक्यं नदीपूर इवाब्धिना ॥ १७४ ॥

[8]अग्रजन्मवधक्रोधादनुजानुपसर्पतः ।
जघान भुजदण्डेन क्रीडन्निव हलायुधः ॥ १७५ ॥

---

[1] T4 - खड्गगः
[2] T2 - पादपाहत्य
[3] M1 - भुजो
[4] P1 - पादाङ्गुष्ठ०
[5] T3 - मञ्चकः
[6] M1 - वटित्कार०
[7] P1 - चटत्कारन्त्रुद्र्यदङ्गो
[8] M1 ०वधक्रोधो

नेदुर्दुन्दुभयो दिव्या जगुः किंपुरुषाङ्गनाः ।
ननृतुः स्वर्विलासिन्यो[1] ववृषुः कुसुमं सुराः ॥ १७६ ॥

आश्वासयन् प्रचलितं नरपाललोक[2]-
मान्दोलितेन [3]करकोकनदद्वयेन ।
आरुह्य मञ्चमरविन्दविलोचनोऽसौ[4]
सद्यः सबाष्पनयनौ पितरौ ववन्दे ॥ १७७ ॥

इति तममरशत्रुं लीलया सादयित्वा
सपदि विगतबन्धं कारयित्वोग्रसेनम् ।
द्युतिमति मणिपीठे तं प्रतिष्ठाप्य देवः
कृतमिति यदुवीरः कृत्यमर्धं स मेने ॥ १७८ ॥

॥ इति अष्टमः सर्गः ॥

---

1 T2 - विलोचनस्तौ
2 M1 - नरलोकपालं
3 T3 T4 - नवकोकनद०
4 M1 P1 T4 विलोचनस्तौ

नवमः सर्गः

सरित् सुराणामिव सन्निषेव्या विचक्षणा विश्वमलापहारे ।
अथानशे कौतुकमावहन्ती[1] जगत्त्रयं जन्मकथा मुरारेः ॥ १ ॥

हत्वापि कंसं कमलासहायो दृष्ट्वापि मुक्तौ[2] पितरौ निरोधात् ।
न्यस्यापि राज्यश्रियमुग्रसेने नागात् सुखं नन्दविषादशङ्की ॥ २ ॥

पुष्टश्चिरं पोषयितुः समीपं[3] त्यक्त्वा[4] समासादितजन्मभूमिः ।
स मन्यमानः [5]पिकनिर्विशेषमात्मानमस्पृश्यत लज्जयान्तः ॥ ३ ॥

अभुक्त[6] नन्देन विना न[7] कृष्णः कदापि नासिष्ट तमन्तरेण ।
निन्ये दिनं गोकुलवार्तयैव तदीयकण्ठग्रहणेन शिश्ये ॥ ४ ॥

नन्दस्य विज्ञातसुतप्रवृत्तेर्विषादमन्तर्गतमाशु हर्तुम्[8] ।
परेङ्गितज्ञो विनयं विवृण्वन्नित्यब्रवीदानकदुन्दुभिस्तम् ॥ ५ ॥

पुरा शुनश्शेप इव स्वपित्रा[9] त्यक्तो मया निष्करुणेन शौरिः ।
स कौशिकेनेव[10] महानुभाव ! संरक्षितः साधु[11] किल त्वयासौ ॥६॥

संरक्षता[12] सज्जनपारिजातं विषद्रुमं वैरिजनस्य शौरिम्[13] ।
[14]अहं च वंशश्च यदोर्मही च संरक्षितं सर्वमपि त्वयैतत् ॥ ७ ॥

---

[1] M1 - आवहन्ति
[2] M1 P1 - दृष्ट्वा विमुक्तौ
[3] T3 - समीक्ष्य
[4] T3 - पर्यकत्वा
[5] M1 - चित०
T4 - पितृ०
[6] M1 - अभुङ्क्त
[7] T3 T4 स
[8] M1 भर्तुम्
[9] T3 - स्वमित्रा
[10] M1 कौशिकेनैव
[11] T3 - सर
[12] M1 - तौरक्षिताः
[13] M1 T3 - शौरिः
[14] M1 reads only अहं च यदोर्मही च and omits the rest.

पुरैव मे पुण्यकृतां पुरोग! मनीषितं सर्वमपि व्यधायि ।
भूयोऽपि लोभातिशयादहं त्वामभ्यर्थये केवलमेतदेकम्[1] ॥ ८ ॥

मनोहरं शैशवजन्म शौरेस्त्वयैव लीलायितमन्वभावि ।
परं त्वतः[2] पार्वणचन्द्रचारु पश्याव तुल्यं मुखमेतदीयम् ॥ ९ ॥

पतिव्रतानां प्रथमा यशोदा त्वं च[3] त्रिलोकीमहनीयकीर्तिः ।
उभौ समागत्य[4] पुरे वसन्तौ पुरेव पुत्रं परिपालयेताम् ॥ १० ॥

इतीप्सितं तस्य निशम्य नन्दः स्नेहेन पर्याकुलचित्तवृत्तिः ।
कथञ्चिदूचे निगृहीतकण्ठो महीयसा बाष्पसमुद्गमेन ॥ ११ ॥

तथा करिष्यामि यथाभ्यधायि स्थाने महाभाग[5] तवाभिलाषः ।
द्रष्टुं य[6] इच्छेत् स्वयमेव चन्द्रं[7] कथं पुनस्तं विषहेत लोकः ॥१२॥

अहं तु कृष्णस्य वियोगखिन्नं निशासरोजाकरनिर्विशेषम्[8] ।
व्रजं समाश्वास्य[9] बहुप्रकारं पुनर्विधास्यामि समीहितं ते ॥ १३ ॥

इत्यूचिवानुल्बणसम्मदेन प्रशस्यमानो नृपमण्डलेन ।
निजप्रयाणेऽभिमुखं[10] स कृष्णं गाढं परिष्वज्य मिथो बभाषे ॥१४॥

---

[1] T4 - केवलमेतदेवम्
[2] P1 - ततः
[3] M1 - तु
[4] M1 - समागम्य
[5] T2 T3 T4 - हृषीकेश
[6] M1 - यं T3 - यत्
[7] M1 - चन्द्रः
[8] T3 - निशाकरोजाकर
[9] T3 - समासाद्य
[10] P1 - निजप्रयाणाभिमुखं

आलोकयिष्ये कमलेक्षण[1] ! त्वां द्वित्रैरहोभिः सह ते जनन्या ।
अलं विषादेन कथं पुनस्ते मनो मदीयं सहते वियोगम्[2] ॥ १५ ॥

उपार्जितं बाहुबलेन राज्यं नवं[3] द्विषच्छेषसमेतमेतत् ।
चारेक्षणः[4] शाधि कृतावधानश्छायामपि स्वां सुत शङ्कमानः ॥ १६ ॥

स इत्युदीर्य स्वयमेव नन्दो रथेन पादातयुतः[5] प्रतस्थे ।
जनेन कृष्णप्रहितानि मात्रे विभूषणान्युद्वहता परीतः ॥ १७ ॥

कृष्णस्तु गव्यूतिमनुप्रयातो निवर्तितः[6] साश्रुमुखेन[7] तेन ।
निवृत्य पश्यन् पितरं प्रयान्तं मुहुः प्रपेदे भवनं कथञ्चित् ॥ १८ ॥

चकार कार्याणि च सावधानं[8] समावृतो भूपतिमण्डलेन ।
कुलं यदूनां वसुराशिवृष्ट्या समेधयन्निन्दुरिवाम्बुराशिम्[9] ॥ १९ ॥

कंसस्य गोब्राह्मणकण्टकस्य भङ्गे कृते तेन यदूद्वहेन ।
[10]पदं चिरोत्क्षिप्तमपेतशङ्को धर्मः पृथिव्यां निदधे पुरेव[11] ॥ २० ॥

तस्मिन् परित्रातरि भूतधात्र्याः स्वप्नेऽपि नैकश्चकमेऽन्यदारान्[12] ।
जहार खेलन्नपि नान्यदीयं[13] न विस्मरन्नप्यनृतं[14] बभाषे ॥ २१ ॥

---

[1] T4 - कमलेक्षणं
[2] T1 - विरोधम्
[3] T3 - नवद्विषच्छेदसमेतमेतत्
[4] T1 - शारेक्षणः
[5] P1 - पदातियुतः
[6] P1 - निवारितः
[7] M1 T3 - स्वाश्रुमुखेन
[8] M1 P1 - सावधानः
[9] T1 - अम्बुराशिः
[10] T3 C & D -
पदं पृथिव्यां निदधे पुरेव
तस्मिन् परित्रातरि भूतधात्र्या
[11] T3 - परेव
[12] T3 - नैकश्चेतमन्यदारान्
[13] M1 - खेकं न विनान्यदीयं
[14] M1 - विस्मरेन्नाप्यनृतं

हिरण्यधारामुचि कृष्णमेघे जनं दरिद्रं क्वचिदप्यविन्दन् ।
परं[1] तटाकादिविधिप्रसङ्गैश्चकार[2] लोकश्चरितार्थमर्थम्[3] ॥ २२ ॥

अदूयतौदार्यपराक्रमाभ्यामपाकृताशेषजनोपरागः ।
[4]रथाङ्गनाम्नां[5] रजनीषु शौरिराक्रन्दितादप्रतिसंविधेयात् ॥ २३ ॥

इत्युग्रसेनस्य पतिर्यदूनां विधेयमृद्धं च विधाय राष्ट्रम्[6] ।
नन्दं यशोदां च निजोपकण्ठमनागतौ[7] वीक्ष्य न शर्म[8] लेभे ॥२४॥

ततः सदाचारवतां जनानां प्रमाणभूतः पुरुषः पुराणः ।
द्विजत्वमापादयदग्रजस्य पुरोधसा पूर्वमथात्मनश्च ॥ २५ ॥

गुरोरभीप्सन् सविधे[9] निवासं[10] निवासभूमिर्निखिलागमानाम् ।
रथं समारुह्य ससीरपाणिः सान्दीपनेः सद्म जगाम काश्याम् ॥ २६ ॥

स तौ समालोक्य समग्रहर्षः सभाजयित्वा सहितो गृहिण्या ।
सुखोपविष्टौ सुरसूनुतुल्यौ[11] सान्दीपनिः सादरमित्युवाच ॥ २७ ॥

ममाधुना जन्म पवित्रमासीद् गोत्रं जगच्छ्लाघ्यमभूदिदानीम् ।
संप्रत्यवापुः पितरश्च तृप्तिमायुष्मतोरागतयोर्निवासम् ॥ २८ ॥

---

[1] T2 - चरं
[2] T1 - तटाकाद्रि
[3] T2 - लोकः परितार्थमर्थं
T3 - लोकतर्थमर्थम्
[4] T2 Omits C & D
[5] M1 - अथ
[6] T1 T3 - राज्यम्
[7] M1 T2 T3 - समागतौ
P1 - न चागतौ
[8] T3 - नर्म
[9] T3 T4 - संकुले
[10] M1 - निवास
[11] M1 - सुरसूनुल्यौ

किमत्र[1] हेतुर्मम भागधेयमाहोस्विदस्याः सुकृतं पृथिव्याः ।
युवामिहानन्दकरौ प्रजानां[2] यदागतौ कामवसन्तकल्पौ ॥ २९ ॥

विना न किञ्चिद् वसु विद्यया मे येनापि भद्रौ परितोषयामि ।
स्वीकृत्य तामप्यधुना[3] भवन्तौ पीडाकुलं[4] रक्षितुमर्हतो[5] माम् ॥३०॥

निशम्य सान्दीपनिवाचमेवं हर्षोल्लसल्लोचनपुण्डरीकः ।
जगाद[6] शौरिर्दशनांशुभिस्तद्गृहं वितन्वन् सुधयेव धौतम् ॥ ३१ ॥

धनेन किं तेन महानुभाव ! मनस्विनो यत्तु परित्यजन्ति ।
प्रसीद विद्याद्रविणप्रदानात्[7] कुरुष्व पुत्रौ कृपया परं नौ[8] ॥ ३२ ॥

निशम्य तद्वाचमिति द्विजन्मा प्रीतः परं वाचमुवाच शौरिम् ।
सहामुनास्मिन् सुगृहीतनामन्[9]! सुखेन तर्हि स्वगृहे[10] वसेति ॥३३॥

तथेति तावात्मगृहे वसन्तौ जितेन्द्रियौ भक्तिविशेषनम्रौ ।
स तत्तदग्राहयदग्रजन्मा[11] बृहस्पतेरप्यतिभूमि यद्यत् ॥ ३४ ॥

सरस्वती पूतसमस्तलोकादस्मात् क्षमामुद्वहतोऽतिगुर्वीम् ।
अशेषविद्यानिधिमाप[12] कृष्णां[13] गङ्गा हिमाद्रेरिव वारिराशिम् ॥ ३५ ॥

---

[1] T2 - तत्र
[2] T1 T2 T3 T4 - व्रजानां
[3] T1 - गामप्यधुना
[4] M1 - रञ्जितुं
[5] M1 - आगतो
T1 T2 - आगतौ
[6] T2 - जहार
[7] T3 - द्रविणप्रसादात्
[8] T2 - कृपया चरन्तौ
[9] M1 - सुगृहीतनाम
[10] T1 - स्वपुरे
[11] M1 - तत्तद्गिगाह
[12] M1 - ०विद्याविधि
[13] M1 - कृष्णः

अथास्त्रविद्या[1]समनुप्रवेशात्[2] सुदुर्निरीक्षः सरसीरुहाक्षः ।
त्वष्टुः स [3]शाणादचिरावतीर्णं विडम्बयामास सहस्रभानुम् ।।३६।।

स दक्षिणादानसमुत्सुकेन तेनार्थितः प्रीतिमता द्विजन्मा ।
गतं प्रभासे जलधौ विनष्टं[4] सुतं प्रयच्छेति स[5] तं ययाचे[6] ।।३७।।

तृणाय मत्वा पयसां निधानं गुरोर्वचस्तच्छिरसाभिनन्द्य[7] ।
रथं समारुह्य रथाङ्गपाणिर्बली बलेनैव सह प्रतस्थे ।। ३८ ।।

तरस्विना तेन रथेन यान्तं[8] समुद्रसन्दर्शनसाभिलाषम् ।
हलायुधः प्राह हरिं पुरस्तात् [9]प्रदर्शयन्नङ्गुलिपल्लवेन ।। ३९ ।।

पश्याग्रतः स्निग्धतमालनीला[10] वेला दृशोः कौतुकमादधाति ।
प्रत्युद्यतः[11] कृष्ण ! भवन्तमब्धेर्धराधिरूढेव तरङ्गमाला[12] ।।४०।।

वेलानिलः[13] केतकरेणुवर्षी शीतोऽयमाधूतलवङ्गशाखः[14] ।
द्राघिष्ठमार्गभ्रमणप्रवृत्तं[15] रथाश्वखेदं[16] शिथिलीकरोति ।। ४१ ।।

आलोकयतामम्बुनिधिस्त्वयासौ समीरणव्याकुलवारिपूरः ।
आशङ्क्य भूयो [17]मथनोद्यतं त्वां त्रासप्रकर्षादिव वेपमानः[18] ।। ४२ ।।

---

1 M1 - अथासुविद्या
2 T2 - विद्यामनुप्रवेशात्
3 M1 T1 T2 - सकाशात्
4 M1 - निविष्टं
5 P1 - च
6 T3 - त्वयाचे
7 M1 - ०अभिवन्द्याम्
8 M1 T2 - यातं
9 T3 - प्रदर्शन्
10 M1 - ०नीलां
T3 - सिद्धतमालनील
11 P1 - प्रत्युद्यता
12 M1 P1 T2 T3 - तरङ्गरेखा
13 T1 T2 T3 T4 - वेलानिलं
14 M1 ०शाखाः
15 T3 - ०मार्गे
16 M1 - रथात्वखेदं
17 T1 - मदनोद्यतं
18 T3 - वेपनानम्

महोदधेरस्य महावकाशानावर्तगर्तानवलोकयेथाः ।
पुरोत्थितानाममरद्रुमाणामापूरितानीव पदानि शौरे ॥ ४३ ॥

इति ब्रुवाणं बलभद्रमूचे शौरिः शरच्चन्द्रनिभाननस्तम् ।
गाम्भीर्यजन्मावसथं समुद्रमभ्यर्थयावो[1] [2]यदुपुङ्गवेति ॥ ४४ ॥

ततस्तथेति प्रतिपन्नवाचा सहाग्रजेन क्षपितान्यभावः ।
दर्भासनस्थो दनुसूनुवैरी[3] दध्यौ पयोधिं करुणापयोधिः ॥ ४५ ॥

प्रसीद किं नाथ ! मया विधेयमित्यर्थितः प्राञ्जलिनार्णवेन[4] ।
अवोचदालोक्य तमूर्मिहस्तैर्हृतं गुरोर्मे सुतमानयेति ॥ ४६ ॥

शङ्खाकृतिः पञ्चजनाभिधानो दैत्यस्तमादत्[5] सलिले वसन् मे ।
अतः[6] प्रमाणं प्रभुरित्युदीर्य प्रणम्य तं वारिनिधिस्तिरोऽभूत् ॥ ४७ ॥

प्रविश्य गर्भं पयसः सरामो जनार्दनः पञ्चजनं जघान ।
तस्मिन्ननालक्षितविप्रसूनुस्तदङ्गमादाय विनिर्जगाम ॥ ४८ ॥

गुरोस्त्रिलोकीगुरुरात्मजं तमानेतुमारूढमहाभिमानः[7] ।
यमाधिवासं यदुवंशवीरो रथेन रामेण युतः[8] प्रतस्थे ॥ ४९ ॥

---

1 T4 - अभ्यर्थयामो
2 M1 - यदि
3 M1 - मनुसूनुवैरिः
4 T3 - प्राञ्जलिसार्णवेन
5 M1 - आदात्
6 M1 P1 - अथ
7 T3 T4 - ॰महानुभावः
8 T1 - सह

[1]सद्यः समुत्तीर्णनभोऽन्तरालो[2] रथेन तार्क्ष्यप्रतिमेन वेगे[3] ।
यातः[4] समीपं यमराजधान्याः[5] शङ्खं प्रदध्मौ[6] शतपत्रनेत्रः ॥ ५० ॥

प्रकम्पितान्तःपुरमानसां[7] तामापादयन् संयमिनीमशेषाम्[8] ।
शङ्खस्य गर्भान्निरियाय[9] नादो घोषः समुद्रादिव संगृहीतः ॥ ५१ ॥

तस्मिन् ध्वनौ[10] कर्णपथं प्रविष्टे सद्यः समुत्थाय परेतराजः ।
निरातपत्रो निभृतः[11] [12]पदाभ्यामुपायनैर्भूरिभिराजगाम[13] ॥५२॥

तमागतं प्रेक्ष्य स धर्मराजं पुत्रं गुरोर्मे वितरेत्यवोचत् ।
तथेति तुष्टेन[14] च तेन दत्तमानीय सूनुं गुरवे दिदेश ॥ ५३ ॥

तमागतं प्रेतपतेः सकाशाद्[15] दृष्ट्वा सुतं वीक्ष्य च शिष्यभक्तिम् ।
प्रीतिप्रकर्षागतबाष्पभारः[16] पतिर्द्विजानां कथमप्यवादीत्[17] ॥ ५४ ॥

कृतः प्रयत्नेन विना युवाभ्यां यद् दुष्करे कर्मणि मन्नियोगः ।
अवाप्स्यतः[18] तज्जगति[19] प्रतिष्ठां नृशंसता मे युवयोश्च कीर्तिः ॥ ५५ ॥

कोऽयं प्रकारो[20] यदुवंशवीरौ ! मृतं समानीय सुतं मदीयम् ।
अहं पुनः प्रत्युपकारमूढो जीवन्मृतो यद् विहितो युवाभ्याम् ॥ ५६ ॥

---

1 T4 Omits a
2 M1 - ०नभोन्तरालं
3 T3 - संक्ष्यप्रतिमेन वेगा
4 T3 - ततः
5 M1 - यमराजधान्यां
6 P1 T1 T2 T3 T4 - प्रदध्यौ
7 T4 - प्रकम्पिताश्वद्विप-पत्तिसंखा
8 M1 संयमनीं
9 M1 - नियीय
10 P1 - स्वने
11 M1 - निभृतं
12 T3 T4 - उपानये
13 M1 - भूतिभिः
14 T3 - कृष्णेन
15 M1 - सकाशं
16 M1 - ०बाष्पभारं
17 T3 - कथयत्यवादीत्
18 T3 - अवाप्स्य
P1 - अवाप्नुतां
19 T3 - तस्य
20 M1 - कोऽयं प्रकारौ
P1 - कृतोपकारौ

जातोऽस्मि सन्तोषपराङ्मुखानामहं किलोदाहरणं जनानाम् ।
लब्ध्वापि पुत्रौ गुणवत्तरौ वां पुत्रान्तराय स्पृहयालुरासम् ॥ ५७ ॥

विश्वप्रजापालनबद्धदीक्षौ[1] नैवोत्सहे स्थापयितुं[2] भवन्तौ ।
तद् गच्छतं दीर्घवियोगखिन्नाः पश्यन्तु धन्याः पुरयोषितो[3] वाम् ॥५८॥

इत्यूचिवांसं प्रणिपत्य[4] भक्त्या सान्दीपनिं तस्य च धर्मपत्नीम् ।
निवार्य तौ शौरिरनुप्रयातौ[5] स्वां राजधानीं सबलः प्रतस्थे ॥५९॥

[6]शङ्खध्वनाकर्णनजातहर्षः पौरैः प्रतिष्ठापिततोरणां ताम् ।
विवेश विष्वग्विलसत्पताकां पुरीं स वेदिस्थितपूर्णकुम्भाम् ॥ ६० ॥

तं दृष्टिनीलोत्पलमालिकाभिः पुराङ्गनाः केशवमभ्यवर्षन् ।
तासां पुनः पाणिसरोजमुक्तः[7] प्रसूनवर्षः[8] पुनरुक्तिमाप[9] ॥ ६१ ॥

स विध्यमानः[10] पुरसुन्दरीणामपाङ्गशस्त्रैरसितोत्पलाभैः ।
[11]सर्वास्त्रविद्याकुशलोऽपि शौरिर्नाभूत् प्रभुस्तत्प्रतिरोधनाय ॥ ६२ ॥

मृगीदृशामुत्पलिनीं[12] कटाक्षैः स राजवीथीसरसीं[13] विलङ्घ्य ।
गत्वा सरामो[14] गृहमुग्रसेनं प्रणम्य मातापितरौ ववन्दे ॥ ६३ ॥

---

[1] M1 P1 T4 - ०कक्ष्यौ
[2] M1 - स्वापयितुं
[3] M1 - पुरयोषितेव
[4] M1 - इत्यूचिवान् संप्रणिपत्य
[5] T4 - अनुप्रयान्तौ
[6] P1 - शङ्खस्वन०
[7] P1 - ०मुक्ता
[8] P1 T3 - प्रसूनवृष्टिः
[9] T1 आपः
[10] T1 T2 - पीड्यमानः
[11] M1 - सर्वत्र
[12] M1 - उत्पलिनी
[13] M1 - सरोजवीथीसरसीं
[14] M1 - गत्वा रामो

संघट्टनभ्रष्टकिरीटरत्नाः संचूर्णितोरःस्थलहारदण्डाः ।
समुद्यताः तत्प्रणतौ[1] मुहूर्तं न लेभिरे भूपतयोऽवकाशम् ॥ ६४॥

आरूढवत्यासनमुग्रसेने वृद्धे जने ज्यायसि[2] चोपविष्टे[3] ।
आसिष्ट भूमौ सह भूमिपालैरत्यूर्जितानां विनयो विभूषा ॥ ६५॥

आनिर्गमादानगरप्रवेशाद् [4]वृत्तान्तविज्ञानधृताभिलाषान्[5] ।
यदून् विदित्वापि परेङ्गितज्ञो जगाद गम्भीरतया न किञ्चित्[6] ॥ ६६ ॥

अशेषविद्याधिगमं द्विजेन्द्रात् सूनोर्मृतस्याहरणे तदाज्ञाम् ।
तस्याश्च निर्वृत्तिमपेतयत्नां सर्वं[7] पुनः सारथिराह तेभ्यः ॥ ६७॥

उपेयुषा विस्मयमम्बुजाक्षः संभावितो[8] भूपतिमण्डलेन ।
क्षणं निषद्योज्झितराजलोकः स्नानादिकर्मप्रवणो बभूव ॥ ६८ ॥

तेजस्विभिः [9]कंसनिरोधमुक्तैर्निषेव्यमाणो यदुवंशवीरैः ।
स राजकार्याणि विचार्य कुर्वन् निनाय शौरिः कतिचिद् दिनानि ॥ ६९॥

अथ स्वजामातरमच्युतेन निशम्य कंसं हतमुग्रकोपः ।
पुरीं जरासन्ध इति प्रसिद्धो[10] रुरोध राजा महता बलेन ॥ ७० ॥

---

1 M1 - प्रणतो
2 T2 - ध्यायसि
3 T3 - सिलोपविष्टे
4 M1 - ०प्रवेशोद्वृत्तान्त
5 M1 - ०अभिलाषात्
T2 - वृत्तान्तसुताभिलाषान्
6 T1 T2 - कश्चित्
7 M1 - सर्वां
8 T3 - स भावितो
9 T3 - ०विरोध
10 T4 - प्रकाशो

महीभुजां तद्भुजसंश्रयाणां हस्त्यश्वपादातिरथोत्थितेन ।
महीयसा[1] भूरजसैव[2] तस्याः ख्यातं[3] पुरः पूरितकल्पमासीत् ॥ ७१ ॥

उदीर्णघोरध्वनिना[4] परीता पृथ्वीपतीनां पृतनार्णवेन ।
आयामविस्तारवती बभार द्वीपश्रियं सा यदुराजधानी ॥ ७२ ॥

पराभवं प्रेक्ष्य यदूद्वहास्तं क्रुधा[5] ज्वलन्तः सहसोदतिष्ठन् ।
विपक्षभूभृत्कटकाटवीं तां दग्धुं प्रपन्ना[6] इव पावकत्वम् ॥ ७३ ॥

छेदप्रसङ्गे नवशाड्वलानां को नाम कुर्यात् कुलिशस्य मोक्षम् ।
मत्वेति केचिद् भुजमात्रशस्त्रा यदुप्रवीरा ययुरभ्यमित्रम् ॥ ७४ ॥

पराक्रमश्रीपरिरम्भकाले विशङ्क्य नूनं व्यवधानदोषम् ।
उरच्छदस्य ग्रहणो पराञ्चो निरीयुरन्ये यदवः स्मयेन ॥ ७५ ॥

परे परोत्सेकमपारयन्तः सोढुं समारूढसमग्रकोपाः ।
अनुद्रुताः स्वेन बलेन दूरे जवेन जग्मुः स्वयमेव योद्धुम् ॥ ७६ ॥

नवोदयाताम्रमिवार्कबिम्बं मुखं दधानो मुसली सरोषः ।
जहास मन्दीकृतसैन्यघोषो जवादुदस्थाच्च विलोलहारः ॥ ७७ ॥

---

[1] M1 - महीयता

[2] M1 - भूरजसेव

[3] P1 reads पुरः for ख्यातं

[4] T2 - ०घोरध्वनिना

[5] M1 T3 - क्रुद्धा

[6] T3 T4 - प्रवन्ना

बलानि यादृच्छिकसंगमानि राज्ञां[1] पुराणीव महासुराणाम् ।
अहं पिनाकीव[2] विनाशयेयमित्यध्यवस्यन्नुदतिष्ठदीशः ॥ ७८ ॥

ततः स सञ्जातकुतूहलाभिर्विलोक्यमानागमनं प्रजाभिः ।
भ्रमत्पताकापटमन्तरिक्षे रथद्वयं रत्नमयं ददर्श ॥ ७९ ॥

रथौ समानीय तयोः[3] समीपं रत्नप्रभापल्लवितान्तरिक्षौ ।
सूतौ तदालोकनजातहर्षौ प्रणम्य सप्रश्रयमभ्यधाताम्[4] ॥ ८० ॥

आयुष्मतोराहवसाभिलाषं मनो[5] मरुत्वानवधार्य देवः ।
आदिक्षदारोहणयोग्यमेतद् रथद्वयं संभृतसर्वशस्त्रम्[6] ॥ ८१ ॥

अनुप्रविष्टाखिलदेवशक्ति धनुर्द्वयं दिव्यमिदं गृहीत्वा ।
[7]सर्वंसहादुस्सहभारमेतन्नयेतमन्तं प्रतिपक्षसैन्यम् ॥ ८२ ॥

वचस्तदाकर्ण्य महत् प्रियं नः कृतं मघोनेत्यभिधाय शौरिः ।
ससंभ्रमं सारथिदत्तहस्तो रथं सतार्क्ष्यध्वजमारुरोह ॥ ८३ ॥

[8]रामः स्वधाम्ना[9] महता हरिष्यन्[10] दिग्व्यापिनीं वैरिचमूतमिस्राम् ।
महीधरं पूर्वमिवौषधीशो रथं [11]सतालध्वजमध्यरुक्षत्* ॥ ८४ ॥

---

[1] M1 - राज्ञः
[2] M1 - पिनाकीक
[3] T3 - समीनीयतये
[4] M1 - अभ्यधात्ताम्
[5] T3 - महो
[6] P1 - ०दिव्य०
* P1 ends with verse 84
[7] T4 - सर्वंसदादुस्सह
[8] M1 - ताम
[9] M1 - स्व नाम्ना
[10] M1 करिष्यन्
[11] M1 - सतार्क्ष्यध्वजं

पुरः समारब्धपराक्रमाणां श्रुत्वा यदूनां युधि सिंहनादम् ।
तद्धैर्यसन्धुक्षणसाभिलाषः शङ्खं समापूरयति स्म शौरिः ॥ ८५ ॥

तद् वीक्षितुं युद्धमभूतपूर्वमुपस्थितानां मरुतां विमानैः[1] ।
तिरोहिते भास्वति शार्ङ्गपाणेरभूदभिख्याकरमातपत्रम्[2] ॥ ८६ ॥

हर्म्यश्रितामाहवदर्शनाय[3] निमेषशून्यैर्नयनैर्वधूनाम् ।
सुराङ्गनानां च विमानभाजां न भेदकं लक्ष्म बभूव किञ्चित् ॥ ८७ ॥

निर्जग्मुषस्तस्य पुरो मुरारेः दृष्ट्वा महच्छत्रमृगाङ्कबिम्बम् ।
प्रवृद्धघोषो[4] यदुसैन्यसिन्धुर्व्यलङ्घयद्[5] भूमिभृतोऽपि[6] पक्षान् ॥ ८८ ॥

अचिन्तितोदग्रविपक्षशौर्यमनुत्थितप्राणविपत्तिभीति ।
द्वयोस्तयोरुल्बण[7]मानमूलं बभूव युद्धं बलयोः सुघोरम् ॥ ८९ ॥

सुराङ्गनाभिः सुभटाभिसारे पर्युत्सुकाभिः परिकल्पितायाः ।
समुत्थिता दिक्षु तिरस्करिण्याः श्रियं दधौ सैन्यपरागराजिः ॥ ९० ॥

कृपाणघातध्वनिभिर्भटानां क्ष्वेलारवैः कार्मुकनिस्वनैश्च ।
तस्मिन् समुत्तिष्ठति सैन्यरेणौ युद्धं तदानीमनुमेयमासीत् ॥ ९१ ॥

---

[1] T3 - वितानैः
[2] T1 T2 T3 T4 - अभिध्यापरं
[3] M1 - ०आगवदर्शनाय
[4] T1 T2 T3 T4 ०घाषे
[5] M1 - यदुसङ्घसिन्धुः
[6] M1 - भूमिभृतो विपक्षान्
[7] T3 - उद्‌वलमानमूलं

बाणाहतानां करिभूधराणामसृङ्मयैर्गैरिकनिर्झरौघैः ।
विच्छिन्नमूला रणधूलिरासीत्[1] क्षणेन शान्तानलधूमकल्पा ॥ ९२ ॥

[2]गत्वा रिपूणां बलमायदुग्रं छित्वा[3] कृपाणत्रुटिते कृपाणे ।
निवृत्य भङ्गे च भटाः प्रभूणां संभावनानिष्कृतिमन्वतिष्ठन् ॥ ९३ ॥

उत्सन्नवाहानवतीर्य वाहाद् विशीर्णशस्त्रानपहाय शस्त्रम् ।
परान् विजित्यापि मनस्विलोको लज्जां दधौ प्रेक्षकसाधुवादात्[4] ॥ ९४॥

प्रकामभिन्नेऽपि [5]परप्रयुक्तैर्वक्षःस्थले तोमरशक्तिबाणैः ।
न चक्षमे धैर्यकृतावकाशं भीतिर्भटानां हृदयं प्रवेष्टुम् ॥ ९५ ॥

प्रहर्तुकामाः[7] पदयोर्गृहीत्वा क्षिप्ताः सुदूरं नभसि द्विपेन्द्रैः ।
वीराः क्षणं नाकविलासिनीनां कण्ठग्रहं दुर्लभमन्वभूवन् ॥ ९६ ॥

कृत्वा सजीवः प्रतिपक्षभीतिं[8] वीरो[9] जनः प्राप्तकबन्धभावः ।
परिभ्रमन्नुद्धृतमण्डलाग्रो बलद्वयस्यापि चकार भीतिम् ॥ ९७ ॥

चक्रप्रहारेण मतङ्गजस्य करे विलूने पतितोऽपि[10] भूमौ ।
असृक्प्रवाहः प्रपतन् धरस्य[11] श्रियं दधौ गैरिकरञ्जितस्य[12] ॥ ९८ ॥

---

[1] T3 - विच्छिन्नधूली रणभूमिरासीत्
[2] T4 - Omits a
[3] T1 T2 T3 T4 - दत्वा
[4] T1 - ०साधुवादैः
[5] M1 - प्रकामभिन्ने विवरे प्रयुक्तैः
[6] M1 - धैर्यहृतावकाशं
T3 T4 - धैर्यभृतावकाशं
[7] M1 - प्रहर्तुकामैः
[8] M1 Omits b, c & d of verse 97, as a result verses are not in proper order till 102nd verse.
[9] T2 - प्रीतो
[10] M1 च
[11] M1 - प्रपतद्गजस्य
T3 T4 - प्रपतन् करस्य
[12] M1 - गैरिकनिरझंरस्य
T3 - गैरिकतञ्जितस्य

तेषामसह्योर्जितविक्रमाणां यदूद्वहानां प्रतिभूमिपालाः ।
मृगाधिपानामिव वारणेन्द्राः स्थातुं महान्तोऽपि न शेकुरग्रे[1] ॥ ९९ ॥

हृताश्वचक्रा [2]हृतहस्तियूथा [3]हृतोष्ट्रसङ्घा हृतकेतुमालाः ।
हृतातपत्रप्रकरा च भग्ना दुद्राव दूरं मगधेन्द्रसेना[4] ॥ १०० ॥

स्थितश्च[5] पश्चान्मगधेश्वरस्य सन्धुक्षिताहंकृतिभिर्वचोभिः ।
प्रारेभिरे ते [6]विनिवृत्य कामं कर्तुं यदूनां कदनं नरेन्द्राः ॥ १०१ ॥

जातत्रपा[7] जीवितनिःस्पृहास्ते कृतप्रतिज्ञाः प्रतिभूमिपालाः ।
प्रापय्य भङ्गं[8] यदुराजसैन्यं नेदुर्विभिन्दन्त[9] इवान्तरिक्षम्[10] ॥ १०२ ॥

किं स्थीयते कृष्ण कृतेऽपि भङ्गे[11] परैर्यदूनां धिगनादरं ते ।
उक्त्वेति रामः स्वयमेव कोपात् संग्रामरङ्गं सहसा विवेश ॥ १०३ ॥

आर्यः सकोपः स्वयमेव योद्धुं प्रयाति तच्चोदय[12] सूत वाहान् ।
इति ब्रुवन्नाजिमुखं प्रपेदे रथेन सूतप्रहितेन शौरिः[13] ॥ १०४ ॥

क्व सीरपाणिः क्व स[14] नन्दसूनुरिति ब्रुवन्तः[15] स्फुरदुग्रशस्त्राः ।
महौजसस्ते मगधेशपक्षा महीभृतः सत्वरमभ्यगच्छन् ॥ १०५ ॥

---

1 T3 - शेकरग्रे
2 T3 - हुत०
3 T2 - हृकोष्ट्र
4 M1 T2 T3 T4 मगधेन्द्रसेना
5 M1 सितस्य
6 T4 - प्रारेभिरे तेऽपि निवृत्य
7 M1 - जातस्पृहा
8 M1 - भागं
9 M1 - विनिघ्नन्त
10 T1 T1 T3 T4 - अन्तरीक्षम्
11 M1 - कृते विभङ्गे
T1 T3 T4 - कृतेऽपि भागे
12 M1 तं चोदय
13 M1 - शौरिम्
14 T2 - नु
15 T4 - स्फुरन्तः

तस्मिन् महद्भिः[1] प्रतिपक्षसैन्यैस्तिरोहिते[2] चन्द्रमसीव मेघैः ।
मनोभिरामं तमवीक्षमाणाः प्रासादभाजः प्रमदा विषेदुः ॥ १०६ ॥

जगत्त्रयप्लोषविधानदक्षं [3]परप्रतापं परिवर्धमानम्[4] ।
उच्छेत्स्यता मार्गणवारिवृष्ट्या धनुर्दधे कृष्णवलाहकेन ॥ १०७ ॥

तस्य स्फुरत्कार्मुकमण्डलस्य शरत्विषः शार्ङ्गिसहस्रभानोः ।
प्रारेभिरे तां पृतनाहिमानीं[5] प्रावृण्वतीं प्रापयितु विनाशम् ॥ १०८ ॥

कृष्णस्य तूणीमुख एव लग्नं पश्यन् जनो दक्षिणमग्रहस्तम् ।
नाराचसन्धानविकर्ष[6]मोक्षान् मेने परं[7] वैरिशिरोनिपातैः[8] ॥ १०९ ॥

मुखे च कर्णे च भुजद्वये च वक्षःस्थले चोरुयुगे[9] च राज्ञाम् ।
अन्येषु चाङ्गेषु समानकालं शतं शतं शौरिशरा निपेतुः ॥ ११० ॥

भित्वापि गोविन्दशराः परेषामङ्गान्यलिप्यन्त न शोणितेन ।
कृत्वापि[11] कर्माणि विशुद्धभावा जनाः फलेनेव[12] तदुद्भवेन[13] ॥ १११ ॥

तुरङ्गपादातिमतङ्गजानां[14] भित्वा सहस्राणि मुरारिबाणाः ।
शेषस्य भारोपहतस्य नूनं[15] वक्तुं प्रियं गर्भमवापुरुर्व्याः[16] ॥ ११२ ॥

---

[1] T3 - महति
[2] M1 - प्रतिपक्षसैन्ये
[3] M1 - वरप्रतापं
[4] M1 - परिवर्धमानः
[5] M1 - पृतनाभिमानीं
[6] M1 - ०विकाम०
[7] M1 चिरं
[8] T1 T2 - ०निपाते
[9] M1 - चारुयुगे
[10] M1 - निपेतुम्
[11] T2 च
[12] M1 - फलेनैव
[13] T2 - तदुत्भयेन
[14] M1 - ०पादात०
[15] T3 - सूनुं
[16] M1 - उर्व्याम्

कृष्णस्य कोदण्डविनिर्गतेभ्यो नाभूदलं वैरिजनः शरेभ्यः ।
आसन् न तस्मै सुरयोषितोऽलं ताभ्यश्च नासीदलमन्तरिक्षम्[1] ॥ ११३ ।

कम्पावहः कार्मुकटङ्कृतेन शरान् विमुञ्चन् शतकोटिकल्पान् ।
रामश्चरन् भावननिर्विशेषं सपत्नसैन्यं शकलीचकार ॥ ११४ ॥

बलं तयोर्बाणपरंपराभिरात्मीयमुत्सन्नमवेक्षमाणः[2] ।
रुषा महत्या मगधाधिराजो जज्वाल कल्पान्तकृशानुकल्पः ॥ ११५ ॥

स सैनिकैः शौरिशरावकृत्तैर्गतिप्रवृत्तैरिव रुद्धमार्गः ।
रथेन शश्वद्दलितेन[3] मन्दं समाययौ[4] संयुगसत्वरोऽपि ॥ ११६ ॥

तालध्वजस्तं[5] तरसा पतन्तं दृष्ट्वा ससंरम्भकृताट्टहासः ।
रथेन सूतप्रहितेन[6] शीघ्रं गन्धद्विपं सिंह इवाभिपेदे[7] ॥ ११७ ॥

समीक्ष्य साक्षादिव कालरुद्रं तं रोषबद्धभ्रुकुटीकरालम् ।
करेण कर्षन्[8] विशिखान्[9] निषङ्गादुवाच वाचं मगधाधिराजः ॥ ११८ ॥

दैवात् त्वमग्रे पतितोऽसि यत्ते संज्ञापि तावद् बलभद्र साध्वी ।
ध्रुवं हि मे लाघवधाम्नि कृष्णे तृणे च तुल्यप्रतिपत्ति चेतः ॥ ११९ ॥

---

[1] T1 T2 T3 T4 - अन्तरीक्षम्
[2] T3 T4 - इवेक्षमाणः
[3] M1 - गलितेन
[4] T4 - समाययौ
[5] T3 - तालध्वा
[6] T4 - सूत्रप्रहितेन
[7] T3 - जवाभिपेदे
[8] T4 - कर्षद्
[9] T1 T2 T3 T4 - विशिखन्

तद्बाणनिःश्रेणिकया[1] निहत्य नीत्वा पुरस्त्वां[2] यमराजधानीम् ।
[3]त्वद्विप्रयोगव्यसनानभिज्ञं नेष्यामि कृष्णं भवतः समीपम् ॥ १२० ॥

इति प्रकोपाकुलवर्णमुक्त्वा सङ्कर्षणं संयुगबद्धदीक्षम् ।
स्ववैरशिक्षाबलसाहसानामथानुरूपं युयुधे [4]स वीरः ॥ १२१ ॥

तदीयबाणासननिर्गतेन[5] समावृतः सायकमण्डलेन ।
क्षणं समालक्ष्यत सीरपाणिः पतिर्मृगाणामिव पञ्जरस्थः ॥ १२२ ॥

प्रसर्पता शौर्यमहोमहिम्ना शरान्धकारं तदपोह्य[6] सर्वम् ।
समास्थितः स्यन्दनपूर्वशैलं चिरं चकाशे यदुवीरचन्द्रः ॥ १२३ ॥

धनुस्तदीयं विशिखेन रामश्चिच्छेद सद्यो जगृहे परं सः ।
तस्मिन् निकृत्ते[7] यदुपुङ्गवेन सोऽन्यद् दधे तच्च चकर्त सीरी ॥ १२४ ॥

श्यामीकृताशावलयां महोभिः[8] कटाक्षमालामिव कालरात्रेः ।
स शक्तिमादातुममोघशक्तिमैच्छत् परोत्सेकविवृद्धमन्युः ॥ १२५ ॥

यावत् स गृह्णाति करेण शक्तिं तावत् परिज्ञाततदीयभावः[9] ।
रथादवप्लुत्य रथं तरस्वी जग्राह केशेषु बलाद् बलस्तम् ॥ १२६ ॥

---

[1] T2 - निद्रेणिकया

[2] M1 - पुरस्तां

[3] M1 तद्

[4] M1 - युयुथे

[5] T3 - ०बाणाननिनिर्गतन

[6] M1 - तद्वाह्य

[7] M1 निवृते

[8] M1 - कृताशावल्यामहाभिः
T3 T4 - श्यामसितैर्महोभिः

[9] M1 - तमानुभावम्

कृपाणमुत्पाट्य विकृष्य केशान्[1] हर्तुं शिरस्तस्य हठात् प्रवृत्तम् ।
मा मेति[2] रुन्धन्नुपसृत्य रामं महामनाः शौरिरुवाच वाचम् ॥ १२७ ॥

न घ्नन्ति[3] शूराः समरे गृहीतं नोत्सृष्टशस्त्रं न च मुक्तकेशम् ।
प्रसीद तत् प्रेषय दीनमेनं पशूपमोऽयं न पदं[4] रुषस्ते ॥ १२८ ॥

इति प्रसाद्याग्रजमग्र्यकीर्तिर्विमुच्य कृष्णो[5] मगधेश्वरं तम् ।
सुरैर्विमुक्तं कृतसाधुवादैः पर्यग्रहीत् पुष्पमयं स वर्षम् ॥ १२९ ॥

गत्वा रणश्रीगणिकां[6] स मूढो विलुप्तसर्वस्वतयापि षण्डः[7] ।
जगाम लज्जावनतेन मूर्ध्ना प्रवेष्टुमिच्छन्निव गर्भमुर्व्याः ॥ १३० ॥

सस्यावतारेण[8] कृतापराधे गवीव[9] तस्मिन् निगृहीतमुक्ते ।
यदुप्रवीरस्य यशश्छलेन हासो जजृम्भे हरितां मुखेषु ॥ १३१ ॥

अथान्तरिक्षादवतीर्य देवः सुरैः सहस्राक्षमुखैरुपेतः ।
पराक्रमप्रीतमना[10] विनम्रौ तावब्रवीत् तामरसाधिवासः ॥ १३२ ॥

कृतं कृतान्तेन विचिन्त्य नून तवोपकारं[11] गुरुपुत्रदानात् ।
यदूद्वह त्वत्प्रहितैरसङ्ख्यैर्वीरैः[12] समापूरि पुरी तदीया ॥ १३३ ॥

---

[1] T1 T2 T3 T4 - केशात्

[2] M1 - मामेत

[3] M1 - निघ्नन्ति

[4] T1 T2 - पदा

[5] T1 T2 T3 T4 - कृष्णे

[6] M1 - ०गणितां

[7] T1 - सर्वस्वतया विषण्णः

[8] M1 - सस्यापराधेन

[9] M1 - गर्वीव
T1 T2 - गलीव

[10] T2 T4 - पराक्रमक्रीत०

[11] M1 T2 T3 - परोपकारं
T4 - पुरोपकारं

[12] M1 - त्वदुग्रहितैः

आदानसन्धानविकर्षमोक्षाः न स्युः शराणां क्रममन्तरेण ।
इत्युत्थितां[1] त्वत्करलाघवोत्था युक्तिं[2] निरुन्धे युगपत् प्रतीतिः[3] ॥ १३४ ॥

इदं जरासन्धजयापदानं कल्पान्तरस्थायि बलं त्वदीयम् ।
संभूय संभूय सह प्रियाभिः सिद्धाः प्रहर्षादुपवीणयन्ति ॥ १३५ ॥

उपायनं किञ्चन नानुरूपं पश्यामि सीरिन्! कृतकर्मणस्ते ।
यस्य प्रदानेन तवाधुनाहं सन्तोषमापादयितुं क्षमोऽस्मि ॥ १३६ ॥

आनर्तनाथः स्वसुतां कुलीनो मयार्थितो दित्सति रैवतस्ते ।
सा रेवती राम! तवानुरूपा भूयात् सपत्नी विजयश्रियोऽस्याः ॥१३७॥

महामहीभृत्कुलसंभवास्त्वां[4] कन्या [5]मनोहारिवयोविलासाः[6] ।
यास्यन्ति धन्याः स्वयमेव शौरे[7]! रसाकुला[8] नद्य इवाम्बुराशिम् ॥ १३८ ॥

मया नियुक्तः स्थपतिः सुराणां मध्ये समुद्रस्य पुरीमकार्षीत्[9] ।
तस्मिन् कुटुम्बानि यदूद्वहानां निवेश्य दुर्गे जय साधु पृथ्वीम् ॥ १३९ ॥

इत्यूचुषि ब्रह्मणि लौकिकज्ञे निजं गते धाम सुरैरुपेते ।
हरिर्गृहीतं हयहस्तियूथं ददौ यदुभ्यः कृतविक्रमेभ्यः ॥ १४० ॥

अथ पुरवनितानां[10] प्रेमगर्भैः कटाक्षैः[11] कुवलयदलदामश्यामलैर्विध्यमानः ।
कथमपि यदुवीरः प्राप रम्यं स हर्म्यं [12]पवनचलनवेल्लत्केतुमालाकुलाभ्रम्
॥ १४१ ॥

॥ इति नवमः सर्गः ॥

---

[1] M1 - इत्यर्थितां
[2] M1 - युक्तिः
[3] M1 - प्रतीतः
[4] M1 - ०संभवः
[5] T3 - ०वचो०
[6] M1 - विलासम्
[7] M1 - शौरेः
[8] M1 - अन्वाकुला
[9] M1 - अकार्षीः
[10] T2 - पुरमबलानां
[11] T3 - मन्थरालोलनेत्रैः
[12] M1 T3 T4 - पवनवलन

दशमः सर्गः

अथादराद् वर्धकिना सुराणां सारं समुद्धृत्य कृतामिवोर्व्याः ।
दिग्विश्रुतां[1] द्वारवतीति नाम्ना पुरीं प्रपेदे पुरुषः पुराणः ॥ १ ॥

याधिष्ठिता भोगवतां सहस्रैराभाति सीमा रमणीयतायाः ।
विजेतुकामा[2] दिवमम्बुराशेरभ्युत्थिता भोगवती पुरीव ॥ २ ॥

[3]अस्पृष्टगर्भेषु निशातमोभिर्गृहेषु यस्या मणिनिर्मितेषु ।
प्रदीपमाला परमङ्गनाभिः प्रवर्त्यते मङ्गलकाङ्क्षयैव ॥ ३ ॥

विलोलशङ्खाभरणेन[4] वेल्लत्फेनावलीचामरमण्डलेन[5] ।
वप्रे[6] यदीये तटघातकेलिर्निर्वर्त्यते[7] सागरकुञ्जरेण ॥ ४ ॥

रुद्धाम्बरे भास्वति तापनीये यत्सालरेखारशनाकलापे[8] ।
दिने दिने वीचिकरोद्धृतानि[9] रत्नानि विन्यस्यति वारिराशिः ॥ ५ ॥

अत्युन्नतत्वाद् गृहमण्डलानां द्यामुत्पतन्तीमिव दृश्यमानाम् ।
यामूर्मिहस्तैरुपगूह्य गाढमाभाति रुन्धन्निव वीचिमाली ॥ ६ ॥

व्योमस्पृशा सौधशतेन यस्याः पयोधिगर्भप्रतिबिम्बितेन ।
एकक्षणे शेषपुरीं दिवं च या दृश्यते जेतुमिव प्रवृत्ता ॥ ७ ॥

---

[1] M1 - दिग्विश्रुता
T3 T4 - सुविश्रुता
[2] T3 Omits after
विजेतुकामा
[3] T3 Omits a & b of
3rd verse

[4] M1 - ०बरणेन
[5] M1 T1 - ०मण्डनेन
[6] M1 - वव्रे
[7] M1 - निपत्यते
[8] M1 - यत्साललेखा
[9] T3 - वीचिकरेषु तानि

शोभामपर्यायविलोकनीयां पार्श्वेषु यस्या युगपद् दिदृक्षुः ।
रसाकुलात्मा परिवृत्य शश्वत् तिष्ठत्युदन्वाननिमेषदृष्टिः ॥ ८ ॥

समीरणव्याकुलिताः[1] पताका विद्युल्लताभिः पुनरुक्तयद्भिः[2] ।
घनैः समुद्रोदकपानखिन्नैर्विश्राम्यते यद्भवनाग्रभूमौ[3] ॥ ९ ॥

दिवीव[4] दुष्कर्मदुरासदायां तस्यां वसन् वासवनिर्विशेषः ।
स पप्रथे साधुचकोरचन्द्रस्त्रिविक्रमो विक्रमरूपशीलैः ॥ १० ॥

रामो जरासन्धजयेन भूमौ सम्भावनाभूमिरभूत् प्रजानाम् ।
रघुप्रवीरः प्रथमेऽह्नि युद्धे यथा दशग्रीवविनिग्रहेण[5] ॥ ११ ॥

तस्मै जगद्विश्रुतवैभवाय रामाय राजीवविलोचनाय ।
[6]अदिक्षदानर्तपतिस्तनूजां[7] स्वां रेवतीं रेवतनामधेयः ॥ १२ ॥

नदन्मृदङ्गः [8]श्रुतशङ्खशब्दो[9] नृत्यन्नटो [10]निर्वृतचाटुकारः ।
महोत्सवो रामविवाहजन्मा व्याजृम्भतानन्दनिमग्नलोकः[11] ॥ १३ ॥

क्रमेण तस्मिन् विरतिं प्रयाते महोत्सवे मानितविप्रलोके ।
कदाचिदेकान्तसुखोपविष्टं प्रणम्य कृष्णं पुरुषो बभाषे ॥ १४ ॥

---

1 Verse incomplete in T4

2 T2 - पुनरुक्तवद्भिः

3 M1 - Omits the syllable "द्भ"

4 T1 T2 T3 T4 - द्रवीव

5 T4 - ०विनिर्जयेन

6 T1 T2 T3 T4 - अद्रक्षत्

7 T1 T2 T3 - तनूजा

8 M1 T2 - श्रुति०

9 Vilāsinī notes a variant ०नादो

10 निर्वृक

11 T1 T2 - ०विमग्नलोकः

द्राघिष्ठमार्गभ्रमणं निजेन निवेदयन् ग्लानिमता मुखेन ।
देव ! द्विजन्मा तव दर्शनार्थी कश्चिद् गृहद्वारि निषीदतीति ॥ १५ ॥

सवेत्रिणस्तस्य निशम्य वाचं वाचं बभाषे विभुरादरेण ।
प्रवेश्यतामाशु[1] ननु द्विजेन्द्रा निवारणीया न कदाचनेति ॥ १६ ॥

प्रावेशितस्तेन[2] तथेति विप्रो वर्षन्तमक्ष्णोरमृतस्य धाराम्[3] ।
ददर्श हेमाभरणाभिरामं कृष्णं तटित्वन्तमिवाम्बुवाहम् ॥ १७ ॥

अक्षोभ्यमानन्ददमिन्द्रियाणामसी[4]मगाम्भीर्यमतिप्रसन्नम्[5]
तं पश्यतः कृष्णमहातटाकं द्विजन्मनः शान्त[6] इव श्रमोऽभूत् ॥ १८ ॥

मुक्तासनो[7] दर्शितसंभ्रमस्तं नत्वा कृताशीर्मुदितेन तेन ।
स तं समारोप्य हिरण्यपीठमासिष्ट भूमौ विनयेन शौरिः ॥ १९ ॥

वाग्भिः सुधाशीकरवर्षिणीभिः पृष्ट्वा सुखादीनि सरोरुहाक्षः ।
प्रीतिप्रकर्षस्फुटरोमहर्षं कृतार्हणं ब्राह्मणमाबभाषे ॥ २० ॥

उत्थातुमर्हस्यधुना[8] महीयान् नेयः शमं मार्गपरिश्रमस्ते ।
[9]स्नानाशनाभ्यामपनीतखेदः[10] कर्तासि विस्रम्भकथाः पुनस्त्वम्[11] ॥२१॥

---

[1] M1 - प्रणम्यता

[2] M1 - प्रवेशितः

[3] M1 धाराः

[4] M1 - अक्षोभ्यमानन्दमतीन्द्रियाणां
T3 - ०अननदमिन्द्रियाणां
T4 - ०अतीन्द्रियाणां

[5] M1 - असीमगां शीघ्रं

[6] M1 श्रान्त

[7] T4 - दत्तासनो

[8] M1 - ०भयुधा

[9] M1 - स्नानासनाभ्यां

[10] M1 - ०खेदाः

[11] T3 - कथादपुनस्त्वम्

इत्यादरात् तेन नियुज्यमानो गत्वा गृहाभ्यन्तरमग्रजन्मा ।
कृष्णस्य रूपादिषु दत्तचेताश्चकार तत्तद् विवशैरिवाङ्गैः ॥ २२ ॥

स्नानव्यपेताध्वपरिश्रमस्य द्विजन्मनस्तस्य कृताशनस्य[1] ।
दन्तप्रभामण्डलचन्दनेन[2] लिम्पन्निवाङ्गानि जगाद शौरिः ॥ २३ ॥

धन्योऽस्मि धन्याः[3] पितरोऽधुना[4] मे धन्यं कुलं धन्यमिदं च राज्यम् ।
ब्रह्मन्! परित्यज्य कुटुम्बचिन्तां मां द्रष्टुकामो यदिहागतोऽसि ॥ २४ ॥

महीतले वा भुवनान्तरे वा समीहितं ते सहसा[5] विधास्ये ।
आपूरणे साधुसमीहितानां न कालहानिं[6] यदवः सहन्ते ॥ २५ ॥

इत्यच्युतस्यादरमीक्षमाणो[7] मनीषितं पाणिगतं स मेने ।
पर्यश्रुराभाषत च द्विजन्मा वाग्भिः प्रहर्षस्खलदक्षराभिः ॥ २६ ॥

संरक्षिता साधु [8]विदर्भभूमेर्भीष्माभिधानः परलोकभीरुः ।
नन्वस्ति राजा रजसोऽतिभूमिः[9] श्रुतः[10] शमी[11] सत्यरतः[12] कुलीनः ॥२७॥

अस्त्यम्बुराशेरिव सत्वधाम्नो वेलामनुल्लङ्घयतः कदापि ।
लक्ष्मीरिवाम्भोरुहचारुहस्ता तस्यात्मजा काचन रुक्मिणीति[13] ॥ २८ ॥

---

[1] M1 - कृतासनास्य
[2] T3 T4 - ०मण्डलिनाननेन
[3] M1 - धन्यः
[4] T2 - अमुना
[5] M1 - तरसा
[6] T3 - काचहानिं
[7] M1 - वीक्ष्यमाणः
[8] T2 - विदर्भभूमौ
[9] M1 - अतिभूरिः
[10] M1 - शुक्तयः
T1 T2 - शुक्तः
[11] M1 - समी
[12] T3 - सत्यरती
T4 - सत्यरतिः
[13] T1 T2 T3 P4 - रुग्मिणीति

अन्येव दिव्या सनिमेषदृष्टिः कला हिमांशोरिव निष्कलङ्का ।
चिरप्रभा कापि[1] तटिल्लतेव या[2] द्योतते निष्प्रतिरूपरूपा[3] ।। २९ ।।

सा राजपुत्री[4] सकलासु शिक्षां कलासु लास्येषु च नीयमाना ।
सरस्वतीवाभिनावतारा[5] ददर्श सीमामचिरेण तासाम् ।। ३० ।।

सा मालतीव प्रसवोद्गमेन[6] चन्द्रोदयेनेव समुद्रवेला ।
कामप्यभिख्यामभजत् क्रमेण संसृज्यमाना नवयौवनेन ।। ३१ ।।

वरं[7] वयश्शीलगुणाभिरूपैस्तस्याः[8] समं कञ्चिदवीक्षमाणौ[9] ।
गृहीतचिन्ताबलकर्शिताङ्गौ दिने दिने तत्पितरावभूताम् ।। ३२ ।।

ताभ्यां पुनः प्रेमवशीकृताभ्यां पुण्येन कश्चित्समयः कृतोऽभूत् ।
इयं यमिच्छेद् भुवि राजपुत्रमस्याः स एवास्तु पतिः कृतीति ।। ३३ ।।

इत्यध्यवस्यापि न[10] राजपुत्रानानेतुमाकाङ्क्षत भूमिपालः[11] ।
अलब्धकामैरपरैरमर्षात् करिष्यमाणं कलहं विचिन्त्य ।। ३४ ।।

भित्तिष्वथालिख्य[12] नरेन्द्रपुत्रान् यथावयोवर्णविलासरूपम् ।
प्रदर्शयामासतुरात्मजायै तदन्वयज्ञेन सखीजनेन ।। ३५ ।।

---

1 M1 - चिरप्रदातापि
2 M1 T4 - यत्
3 M1 - निष्कृति
4 T4 - राजकन्या
5 T3 T4 - सरस्वतीवाचनवाववारा
6 T2 - प्रमिवोद्गमेन
7 M1 - परं
8 M1 - ०गुणादिरूपैः
9 M1 - किञ्चित्
10 T1 T2 T3 T4 - स
11 T4 - नावनीपः
12 M1 - भित्तिष्विवालिख्य

तत्तद्गुणाख्यापनतत्पराभिर्निर्दिश्यमानाः क्रमशः सखीभिः ।
तया व्यलङ्घ्यन्त[1] नरेन्द्रपुत्राः[2] नेत्रेण सावज्ञनिवर्तितेन[3] ॥ ३६ ॥

विशालवक्षःस्थलमुन्नतांसं पीताम्बरं चारुकिरीटहारम् ।
सा तत्र तन्वी शतपत्रनेत्रमपश्यदालेख्यगतं भवन्तम् ॥ ३७ ॥

स्विद्यत्करा कण्टकितं दधाना शरीरमम्भोरुहनालकल्पम् ।
अङ्गेषु किञ्चित्[4] प्रथमानकम्पा सान्येव[5] जाता सरसीरुहाक्षी ॥ ३८ ॥

मनोहरां त्वत्प्रतियातनां तां सचेतनां कर्तुमिवोद्यता सा ।
निवेश्य तत्रैव मनो मनोज्ञा स्वयं तु चित्रे लिखितेव तस्थौ ॥ ३९ ॥

तस्या मनस्त्वत्प्रवणं विदित्वा पिता च माता च धृतप्रमोदौ ।
धन्यासि भद्रे पितरोऽद्य तृप्ताः पुण्यं[6] कुलं चेति ननन्दतुस्तौ[7] ॥ ४० ॥

ज्येष्ठः सुतो दुर्नयकर्णधारो रुक्मी[8] वपुष्मानिव पापराशिः ।
निर्भर्त्स्य पुण्याभिनिवेशिनौ[9] तौ तां दातुमैच्छद् दमघोषजाय ॥ ४१ ॥

दुश्शिक्षितत्वात् तनयस्य तस्य मन्दीकृतत्वाज्जरसा महिम्नः ।
बलाच्च राज्ञः शिशुपालनाम्नो स्वकामभङ्गं नृपतिर्विषेहे ॥ ४२ ॥

---

[1] M1 T3 - तयाप्यलङ्घ्यन्त
T4 - तयाप्यलक्ष्यन्त
[2] M1 - नरेन्दुपुत्रान्
[3] M1 - सावज्ञविवर्तितेन
[4] T3 T4 - कञ्चित्
[5] T4 - धन्येव
[6] T1 T2 T3 T4 - पुण्या
[7] T1 T2 - तां
[8] T1 T2 T3 T4 - रुग्मी
[9] M1 - ०निवेशितौ

स प्राहिणोद् दूतशतानि रुक्मी मूढः समीपं दमघोषसूनोः ।
राज्ञः समाहूत्य भवद्विपक्षान् सोऽप्यायया चेदिपतिर्दुरात्मा ॥ ४३ ॥

मां भ्रातरं राजपुरोहितस्य कुशस्य पद्मासननामधेयम् ।
रहः[1] समाहूय सबाष्पनेत्रा सा रुक्मिणी वाचमवोचदेवम्[2] ॥ ४४ ॥

सन्देशवाचामधुना न कालो क्वाहं क्व बुद्धिः क्व पदं क्व चार्थः[3] ।
तद् द्वारकामेत्य दयार्णवाय तस्मै समावेदय वैशसं मे ॥ ४५ ॥

न मामुपेक्षेत महानुभावो स चेदुपेक्षेत मम त्वघेन ।
असन्मनोलक्षितया[4] सदोषां तनुं[5] विधास्यामि तनूनपाति ॥ ४६ ॥

इत्युक्तवत्यां नरपालपुत्र्यां पुराद् विनिर्गत्य विलङ्घिताध्वा ।
अयासिषं त्वां कथिता च वार्ता[6] त्वमेव कल्याण ! परं प्रमाणम् ॥ ४७ ॥

इत्यूचिषो[7] बाष्पमुखस्य तस्य दीनद्विजेन्द्रस्य वचो निशम्य ।
कृष्णः कृपार्द्रीकृतचित्तवृत्तिः पीयूषकल्पं वचनं बभाषे ॥ ४८ ॥

गच्छ त्वमग्रे सपदि द्विजन्मन् ! अन्वक्षमेष्यामि विदर्भभूमिम् ।
अपश्यतस्तन्मुखचन्द्रबिम्बं[8] निर्वापणं मे मनसो न किञ्चित् ॥ ४९ ॥

---

[1] M1 T2- मिथः
[2] M1- वाचमुवाच देवम्
[3] M1- चार्थौ
T4- चार्थाः
[4] T1 T2 T3 T4- ०लक्षतया
[5] T1 T2 T3 T4- सदोषान्तरं
[6] M1- वार्तां
[7] M1- इत्यूचुषो
[8] T2- त्वन्मुख०

गत्वा मदीयागमवार्तया तां सद्यः समाश्वासय राजपुत्रीम् ।
सहस्रभानूदयशंसनेन यथा विषण्णां[1] नलिनीमनूरुः ॥ ५० ॥

सोऽहं हरिष्यामि नरेन्द्रपुत्रीं तेषां समालोकयतां नृपाणाम् ।
आशीविषाणां मिषतां समन्तात् सुधां यथा [2]पत्ररथाधिराजः ॥ ५१ ॥

इति द्विजन्मानमुदीर्य हृष्टं तं प्रेषयामास पतिर्यदूनाम् ।
पत्रीव वेगेन विकृष्य मुक्तो पुरीं प्रपेदे स च रंहसा ताम्[3] ॥ ५२ ॥

आश्वासयामास च तां [4]विषण्णामाख्यातकृष्णागतिरग्रजन्मा ।
प्राप्यं[5] पयोदागमनं विशृण्वन् मरुन्मयूरीमिव घर्मतप्ताम् ॥ ५३ ॥

अलं शुचा कर्म न लङ्घनीयं मते युवां तिष्ठतमात्मजस्य ।
मा भूद् गृहच्छिद्रमिदं मदर्थमित्याह मातापितरौ मृगाक्षी ॥ ५४ ॥

[6]तावप्यनुल्लङ्घ्यतया[7] सुतस्य तस्याश्च[8] तेन प्रतिबोधितेन ।
प्रावर्तिषातां विनियम्य[9] खेदं[10] तत्कालयोग्ये विविधे विधेये[11] ॥ ५५ ॥

सा राजधानी सकला[12] विषादं निगूह्य यत्नेन मनोविलग्नम् ।
प्रपन्नभीतिः क्षितिपालपुत्राश्चक्रे[13] महान्युत्सवमङ्गलानि ॥ ५६ ॥

---

[1] M1 - विषण्डां
[2] T2 - पक्षरथाधिराजः
[3] T3 - रंसदातां
[4] M1 - विषण्डां
[5] M1 - प्राप्यः
[6] T2 - तस्यापि
[7] M1 - अनुल्लङ्घितया
[8] M1 - तयश्च
[9] M1 - प्रावर्तिषातापि नियम्य
[10] M1 - खेदा
[11] M1 - विधेया
T4 - विधेयैः
[12] M1 - सवला
[13] T1 T2 T3 T4 - ०पुत्राः

उत्प्रेक्ष्य दुःखं नलिनेक्षणायाः स जाग्रदेव क्षणदामपोह्य[1] ।
अन्येद्युरारुह्य[2] रथं रथाङ्गी विदर्भराजस्य पुरीं[3] प्रतस्थे[4] ॥ ५७ ॥

तत्रागतं वैरिमहीपतीनां[5] श्रुत्वा समाजं कलहं विशङ्क्य[6] ।
समावृतः स्वेन बलो बलेन द्रुतं प्रयान्तं[7] तमनुप्रतस्थे ॥ ५८ ॥

[8]निरर्गलं प्रेह्वदसङ्ख्ययोधैः[9] तुरङ्गमातङ्गरथाधिरूढैः ।
यदुप्रवीरैः सह याति तस्मिन् बभूव भूमिः पृतनामयीव ॥ ५९ ॥

हस्त्यश्वसङ्घेन सहोर्मिमाला सफेनपुञ्जा[10] धवलातपत्रैः ।
तरस्विनी[12] योगमवाप्य[13] रेजे सा[14] वाहिनी कृष्णमहार्णवेन ॥ ६० ॥

कृतार्हणो राजभिरादधानो नेत्रोत्सवं जानपदाङ्गनानाम् ।
विलङ्घ्य तांस्तान् विषयानयासीद्[15] विदर्भराजस्य पुरोपकण्ठम् ॥ ६१ ॥

निवेदयन्तः पृतनानिवेशं तत्रोदतिष्ठन् पटहप्रणादाः ।
भीतिं[16] समादाय नरेन्द्रपुत्र्याः[17] सपत्नभूपालमनो नयन्तः ॥ ६२ ॥

[18]परिश्रमच्छेदपटुप्रभावमुपायनानां शतमुद्वहद्भिः ।
स कुण्डिनेशः पुरुषैरसङ्ख्यैः सराममालोकयति स्म कृष्णम्[19] ॥ ६३ ॥

---

[1] M1 - उपोह्य
[2] M1 - अन्यैर्दुरारुह्य
[3] T4 - पुरं
[4] M1 - प्रपेदे
[5] T4 - वैरिचमूपतीनां
[6] M1 - विभ्रान्त्या
[7] T4 - प्रयातं
[8] T4 Omits a & b
[9] M1 - प्रेङ्खतसङ्ख्ययौधैः
[10] T3 - सहेनपुञ्जा
[11] M1 - पूजा
[12] M1 - तरस्विनीं
[13] T2 T3 T4 - उपेत्य
[14] M1 - स
[15] T3 - प्रपेदे
[16] M1 - भीतिः
[17] M1 - नरेन्द्रपुत्र्यो
T4 - नरेन्द्रपुत्रा
[18] T2 - परिश्रम॰
[19] M1 - शौरिं

विधाय तस्मै विधिवत् सपर्यां रामाय चाविष्कृतरोमहर्षः ।
पादप्रणामप्रभृतीनकार्षीद् भीष्मः स भक्त्या विविधोपचारान् ॥ ६४ ॥

स भक्तिनम्रं तमुवाच शौरिर्नृपातिसंभावनया तवालम्[1] ।
श्रुते कुले संपदि धाम्नि[2] शीले सत्वे च स त्वं हि समुन्नतोऽसि[3] ॥६५॥

किं चिन्तया संप्रति[4] गच्छ गेहं सर्वं त्विदं विद्धि[5] विधेः करस्थम् ।
दुःखी सुखं येन[6] सुखी च दुःखमानीयते पार्थिव ! जीवलोकः ॥ ६६ ॥

अस्माकमत्रागमनस्य राजन् ! हेतुर्भवद्दर्शनमेतदेव[7] ।
सन्दर्शनं दुष्कृतमाशु हत्वा[8] शर्मापि पुष्णाति शरीरभाजाम् ॥ ६७ ॥

इत्युच्यमानः परचित्तवेदी निश्चित्य सिद्धं निजमीप्सितं सः[9] ।
अकारयच्छिल्पिशतेन तस्य वासं[10] सहस्राक्षनिवेशरम्यम्[11] ॥ ६८ ॥

प्रविष्टतत्तत्परिबर्हजाते वितानवत्यर्पितहेमपीठे ।
तत्कल्पिते चारुणि[12] तत्र गेहे ससीरपाणिः सुखमास्त शौरिः ॥ ६९ ॥

संबाधशून्यं[13] सुनिवेश्य[14] सैन्यं संपाद्य[15] सर्वाणि समीहितानि[16] ।
स कृष्णनिर्बन्धवशेन[17] राजा[18] जगाम कृच्छ्रेण निजं निवासम् ॥ ७० ॥

---

[1] M1 - संभावनलातयालम्

[2] T1 T4 - नाम्नि

[3] M1 - समुसंतोऽसि
T3 T4 - समुन्नतोऽपि

[4] M1 - स्वं प्रति

[5] M1 - सचिन्तयं सिद्धि

[6] M1 - ये

[7] T4 - एवदेव

[8] T1 T2 T3 T4 - हित्वा

[9] M1 - यः

[10] M1 - पातं

[11] M1 T2 - निवास

[12] M1 वारुणि

[13] T2 - संबन्धशून्यं

[14] M1 - विनिवेश
T3 - विनिवेश्य

[15] M1 - ससाद्य

[16] T2 - समाहितानि

[17] M1 - घातेन
T3 T4 - नुबन्धवशेन

[18] M1 - राज्ञो

[1]विसृष्टपर्याणहयं [2]निरस्तकुथद्विपं [3]निष्कवचाश्ववारम्[4] ।
[5]अपेततूणीरधनुर्धरं तद् विश्वं विशश्राम बलं यदूनाम् ॥ ७१ ॥

अथ प्रचेतःपुरसुन्दरीणां विहारसौधस्य सहस्रभानुः ।
सुवर्णकुम्भप्रतिमः[6] प्रपेदे शृङ्गं[7] प्रतीचः पृथिवीधरस्य ॥ ७२ ॥

देवः प्रजानां[8] परमोपकारी कालेन संक्षीणवसुप्रकर्षः[9] ।
तिरोबभूव त्रपयेव भास्वान् वेलावने पश्चिमवारिराशेः ॥ ७३ ॥

नभोऽर्णवे भानुतुरङ्गमाणां खुरप्रहारप्रतिपन्नमूर्च्छा ।
अभ्युत्थिता मीनपरंपरेव श्रेणी समालक्ष्यत तारकाणाम् ॥ ७४ ॥

तस्मिन् परित्रातरि विष्टपानां लोकान्तरं भानुमति प्रपन्ने ।
तमःकिराता हरितामुपान्ते हर्तुं बलादम्बरमारभन्त[10] ॥ ७५ ॥

राजा द्विजानामथ सानुरागः[11] [12]पूर्वाद्रिसिंहासनमध्यवर्ती ।
[13]अर्कावसादादतिमात्रखिन्नामानन्दयामास गुणैस्त्रिलोकीम् ॥ ७६ ॥

प्रालेयभानुः प्रथमैर्मयूखैर्विदारयन्नग्रगतं[14] तमिस्रम् ।
चिरं चकाशे करिणं महान्तं [15]भुजैर्विभिन्दन्निव[16] शूलपाणिः ॥ ७७ ॥

---

[1] T1 and T4 omit verse 71
[2] T2 - निरस्तं कुथः
T3 - निरास्तं
[3] T3 - निष्कवचाश्व
[4] M1 - ०वासम्
T2 - पारं
[5] T2 व्यपेद्तो वीर
T3 - व्यपेत०
[6] M1 - ०प्रतिमं
[7] M1 शृङ्गाः
[8] M1 व्रजानां
[9] T1 T2 - ०प्रकर्षं
[10] M1 - आरभन्ते
[11] M1 - सानुरागं
[12] M1 - पूर्वाद्रि
[13] T2 - अर्कावसानात्
[14] T1 T2 - अग्रगतः
[15] T3 T4 - करैः
[16] T3 - विभिदन्निव

परिस्फुटत्कीटमणिस्फुलिङ्गं घोरं तमस्संचयकालकूटम्[1] ।
पपौ[2] जगत्पालनतत्परात्मा सोमः [3]समुद्दीपितपञ्चबाणः ॥ ७८ ॥

तत्सान्द्रमिन्दोर्घनसारगौरं धामाभिरामं प्रतिपद्य लोकः ।
पातुं कराभ्यां वसनेषु बन्धुमियेष[4] पात्रेषु च संग्रहीतुम् ॥ ७९ ॥

प्रसर्पति च्छेदनपाटनार्हे तस्मिन् घने चन्द्रमसः प्रकाशे ।
चराचरं विश्वमिदं निमग्नं मेने जनो दुग्धमये समुद्रे ॥ ८० ॥

सम्यङ्निपीतेन सह प्रियाभिर्नवेन तिर्यग्घनसौरभेण ।
कुलान्यलीनां कुमुदासवेन जघूर्णिरे जातमदोदयानि ॥ ८१ ॥

इति प्रवृत्तोज्ज्वलचन्द्रभासि[5] जाते जगत्खेदमुषि[6] प्रदोषे ।
सह प्रियैर्विभ्रमनाट्यशालां हालामसेवन्त विलासवत्यः ॥ ८२ ॥

[7]पपुर्युवानः सतृषोऽपि न द्राक्[8] मैरेयमग्र्यं[9] मणिभाजनस्थम् ।
प्रियामुखेन्दुप्रतिलाञ्छितं[10] तत् पश्यन्त एवासत कौतुकेन ॥ ८३ ॥

सा सस्वदे[11] कामिजनाय ताभिः समर्पिता सादरमाननेन ।
[12]स्वादुत्वमापादयति स्म तस्याः[13] भूयोऽपि तासामधरोपदंशः ॥ ८४ ॥

---

[1] M1 - तमस्स य
[2] M1 - ववौ
[3] T3 - समुद्दीरित
[4] T1 - कर्तुं
T3 - बद्धुं
[5] M1 - ०दासी
[6] M1 - जगत्पामुषि
T4 - जनद्वेपमुषि
[7] M1 - वपु
[8] M1 - सदृशो विनिद्रां
[9] M1 - मयिरेयं
[10] M1 - प्रियामुखेन्दुप्रतिलोकशीतं
[11] M1 - leaves gap for कामिजनाय ताभिः
[12] T4 - साधुत्वं
[13] T1 T2 T3 T4 - तस्य

अपोह्य लज्जामपहृत्य शोकं मानं समुन्मूल्य[1] विलुप्य चेर्ष्याम् ।
आपूरयामास मुदेव तासां मनांसि माध्वी मृगलोचनानाम् ॥ ८५ ॥

द्रुतं ययौ मन्थरमाजगाम[2] जगौ मनोज्ञं करुणं रुरोद ।
अनल्पमूचे[3] जगृहे च मौनं मदाकुलो मानवतीसमाजः ॥ ८६ ॥

मार्गश्रमं शौरिपुराङ्गनानां मैरेयसेवा शिथिलीचकार ।
रतेन मीनध्वजसंभवेन श्रमस्तु तासामुदभून्महीयान्[4] ॥ ८७ ॥

तासां तथा पीतनवासवानां मदेन [5]यत्किञ्चिदजानतीनाम् ।
संभोगकार्कश्यसहान्यभूवन्नङ्गानि मल्लीसुमनोमृदूनि ॥ ८८ ॥

कदापि नालं वचनं प्रयुक्तं हृतानि नाङ्गानि नखार्पणेषु ।
जातेषु दन्तच्छदपीडनेषु कृतानि ताभिर्न च सीत्कृतानि ॥ ८९ ॥

इत्थं [6]मदोन्मीलितवैभवेन वशीकृतं[7] पुष्पशरासनेन ।
स्वशक्तिसन्दर्शनतत्परेव जग्राह निद्रा शिबिरं मुरारेः ॥ ९० ॥

नरेन्द्रपुत्रीहरणं दिदृक्षुः करिष्यमाणं कमलेक्षणेन ।
[8]प्रातस्त्वरावानरविन्दबन्धुरम्भोनिधेर्व्योम्नि[9] समुत्पपात ॥ ९१ ॥

---

[1] M1 - समुन्मील्य
[2] M1 - मन्थरा
[3] M1 - अत्यल्प
[4] T4 - पटीयान्
[5] M1 - किं किञ्चित
[6] T1 T3 T4 - मदोन्मुकित
[7] T2 - वशीकृते
[8] M1 T3 T4 - प्रायः
[9] T1 - पयोनिधेः

धाम्नुद्गतस्य प्रतिमा खरांशोस्तरङ्गदीर्घा जलधौ चकाशे ।
पङ्क्तिः प्रभाणामिव वेगभिन्ना तदध्वना [1]तूर्णमनुद्रवन्ती ॥ ९२ ॥

उपास्य सन्ध्यामुदिते खरांशौ[2] तृणाय मत्वा रिपुराजलोकम् ।
संभाषमाणः[3] सह लब्धवर्णैर्देवः सभायां निषसाद शौरिः ॥ ९३ ॥

नृपाः सहायाद् दमघोषसूनोः सर्वे जरासन्धपुरोगमास्ते[4] ।
वृत्ते विवाहे बलभद्रकृष्णौ तस्थुर्ग्रहीतुं[5] विहितावधानाः[6] ॥ ९४ ॥

विदर्भराजेन नियुज्यमाने[7] [8]सुताप्रदाने कृतनिश्चयेन ।
पुरोहिते जुह्वति शान्तिकारे व्याजृम्भत व्योमनि धूमराजिः[9] ॥ ९५ ॥

स्नातां शरच्चन्द्रमरीचिकल्पं[10] क्षौमं[11] वसानामुपसृत्य[12] काचित् ।
[13]विभूषयन्तीं किल रूपकान्त्या[14] विभूषयामास नरेन्द्रपुत्रीम्[15] ॥ ९६ ॥

सा निर्ययौ राजसुता नगर्या गुप्ता भटैरुद्भटशस्त्रजालैः ।
कर्तुं नमस्यां जगदेकमात्रे बालेन्दुचूडामणिवल्लभायै ॥ ९७ ॥

भेर्यो वियच्छेदपटुप्रणादाः कोणैरताड्यन्त मुहुस्तदग्रे ।
आपादयन्त्यः श्रवणोपकण्ठं कृष्णस्य रोमाञ्चचयाभिरामम्[16] ॥ ९८ ॥

---

[1] T1 T2 T4 - तदध्वनारुणं
[2] M1 - अस्त्ररांशौ
[3] M1 - स भाषमाणः
[4] T3 - ०पुरस्सराः
[5] M1 - गृहीतुं
[6] T4 - विहिता विधानौ
[7] T4 - नियुज्य राज्ञी
[8] T4 Omits b, c & d of verse 95
[9] T3 - धूमराशिः
[10] M1 - ०कल्पां
[11] In T1 T2 T3 - वासो is added between क्षौमं and वसानां
[12] T4 - वसानं
[13] T4 omits only 'c' of verse 96
[14] M1 - राजपुत्रीं
[15] M1 T4 - विभूषणानि
[16] M1 - ०चयाभिरामः
T3 T4 - ०शताभिरामम्

सुवर्णकान्तिः सुभटायुधानां सा तत्र तेजःपटलान्तरस्था[1] ।
प्रकाशमाना[2] नवमेघमध्ये [3]तटिल्लतेवाधिकमाबभासे[4] ॥ ९९ ॥

नरेन्द्रकन्याहरणावकाशं प्रतीक्षमाणः स्वयमेव कृष्णः ।
तद्दर्शनौत्सुक्यरसाहृतानां[5] तस्थौ जनानामतिगूढमन्तः[6] ॥ १०० ॥

स [7]वीरलक्ष्मीमिव पुष्पकेतोर्यशःपताकामिव यौवनस्य[8] ।
अपश्यदाज्ञामिव[9] विभ्रमस्य तत्रागतां तामरसेक्षणस्ताम् ॥ १०१ ॥

मनोभिरामं मणिकुण्डलाभ्यां बिम्बोष्ठमम्भोजपलाशनेत्रम् ।
चारुस्मितं सुभ्रु मुखं तु तस्या जहार शौरेर्हृदयं जिहीर्षोः[10] ॥ १०२ ॥

तस्यां गतायां तरलेक्षणायां कात्यायनीवन्दनकौतुकेन ।
सेहे कथञ्चिद् विधिनोपनीतं कालातिपातं कमलासहायः ॥ १०३ ॥

निर्णिज्य पादौ शुचिनोदकेन हिरण्यभृङ्गारमुखच्युतेन[11] ।
आचम्य चाम्बु प्रयता सखीभिरगादगारोदरमम्बिकायाः[12] ॥ १०४ ॥

समाहितान्तःकरणा सपर्यां निवर्त्य तस्या निखिलेश्वरायाः ।
व्रतं च कृत्वा निखिलं तदग्रे तां प्रेमपारिप्लवधीर्ययाचे[13] ॥ १०५ ॥

---

[1] T2 T3 - राज्ञः
T4 - रेजे
[2] T1 - विराजमाना
[3] T3 T4 - विद्युल्लतेव
[4] T1 T2 T3 T4 - आबभास
[5] M1 - ०भृतानां
[6] M1 - अतिरूढं
[7] M1 - वीर्यं०
[8] M1 - यौवतस्य
[9] T4 - आप्तामिव
[10] M1 - जहीर्षोः
[11] T4 - ०भृङ्गामुखीविच्युतेन
[12] T1 T2 - अगारोदकं
[13] M1 - प्रेमपारितवधी
T2 - प्रेमराशिप्लवधी

यदि त्वदन्तःकरणं दयार्द्रं गृह्णातु पाणिं यदुपुङ्गवो मे ।
नो चेदभव्यामधुनैव[1] [2]मातरश्चातु[3] ते वाहनकेसरी माम् ॥ १०६ ॥

इत्युत्थिताया भवनाय[4] [5]तस्याश्चिन्ताशतव्याकुलचित्तवृत्तेः[6] ।
अदक्षिणं लोचनमुत्पलाक्ष्याः स्फुटं जहार[7] स्फुरणैर्विषादम् ॥ १०७ ॥

प्रीता[8] पुनस्तां प्रणिपत्य देवीं दत्ताक्षता वृद्धकुलाङ्गनाभिः ।
निर्गत्य सा निर्भरतूर्यघोषा प्रावर्तत[9] स्वं भवनं प्रयातुम् ॥ १०८ ॥

इह स्थितोऽहं परिचारकस्ते क्व गम्यते चन्द्रमुखीति गत्वा ।
पुरःस्थितां[10] [11]दोःपरिघद्वयेन क्षिप्त्वा[12] भटान्[13] शौरिरपाहरत् ताम्
॥ १०९ ॥

निजाङ्गसंस्पर्शनिमीलिताक्ष्या तया सहारुह्य[14] रथं स कृष्णः ।
प्रातिष्ठत[15] क्षोभवशाद् विशीर्णं[16] [17]तत्केशपाशं प्रतिसन्दधानः ॥ ११० ॥

तत् कर्म दृष्ट्वा रणशङ्किनीनां पलायनव्यग्रधियां भयेन ।
युगावसानार्णवघोषकल्पो घोषः पटीयानुदभूत् प्रजानाम्[18] ॥ १११ ॥

पलायमानेऽपि [19]शरीरिवर्गे तत्र स्थितं वीक्ष्य सखीसमाजम् ।
चारुस्मिता सा करसंज्ञयैव पुरप्रवेशाय समादिदेश ॥ ११२ ॥

---

[1] M1 - अभाव्यां
[2] M1 - मातुः
[3] M1 - आह्वनातु
[4] M1 - T1 T2 T3 - इत्युत्थितायानमनाय
[5] M1 - चिन्ताकुलव्याकुल
[6] T1 T2 T3 T4 - व्वृत्तैः
[7] M1 - जहास
[8] T1 T2 T4 - प्रीतां
[9] T1 T3 T4 - व्यावर्तत
T2 - व्याजृम्भत
[10] M1 - पुरःस्थिता
[11] M1 - नोः
[12] M1 - तप्त्वा
[13] T1 T2 T3 T4 - भटाः
[14] M1 T2 - समारुह्य
[15] M1 - अतिष्ठत
[16] M1 - विकीर्णं
[17] M1 - तं
[18] M1 - प्रजानामभूद् महीयान्
T2 - प्रजानामभूद् पटीयान्
[19] M1 - शरीरवर्गे

अहारि कृष्णेन नृपात्मजेति वादे[1] समुत्तिष्ठति कर्णशूले ।
आजघ्निरे राजनिवेशनेषु भेरीशतान्याहवसूचनानि ॥ ११३ ॥

उत्खाय खड्गान् प्रतिबध्य तूणीर्विधाय सज्यानि शरासनानि ।
पर्याणमाबद्ध्य[2] तुरङ्गमेषु चचाल[3] राज्ञां बलमाहवाय ॥११४॥

निपीडयन् वामकरेण चापमन्येन बाणं भ्रमयन् सलीलम् ।
तृणीकृताराातिबलः स तस्थौ रथे पताकागतवैनतेये ॥ ११५ ॥

कृष्णे तथा तस्थुषि भूपतीनां तेषां जरासन्धपुरोगमानाम् ।
पुरा परिज्ञाततदानुभावा तत्रैव तस्थौ पृतना भयेन ॥ ११६ ॥

[4]दूरे स्थितं तत्र[5] दुरासदस्य बलं[6] द्विषद्भूमिभृतां बभासे ।
दत्वावकाशं भृगुनन्दनाय स्थितः[7] पयोराशिरिव प्रतीच्यः[8] ॥ ११७ ॥

तामन्तिकस्थामवलोक्य शौरेर्व्रीडाविलोले नयने दधानः ।
स्वलोचनाय स्पृहयांचकार चैद्यस्तृतीयाय तिरोहिताय ॥ ११८ ॥

तत्पूजितं[10] दैववशेन सैन्यं महीपतीनां युधि संजिहीर्षुः ।
पराङ्मुखः सन्नभिनीय[11] भीतिं ययौ रथेनाशु[12] निवर्तितेन ॥ ११९ ॥

---

[1] M1 - पादे
[2] T1 T2 T4 - निपर्याणं
[3] T1 T2 T3 T4 - चचार
[4] T1 & T4 omit verses 117 to 120 incl.
[5] T2 - तस्य
[6] T2 - बलं
[7] T3 - स्थिरं
[8] T2 - प्रतीध्या
[9] T2 - शौरिः
[10] T2 T3 - तत्पुजितं
[11] T2 - अभिधीय
[12] M1 - रथेनापि

सा नर्मदेवार्जुनबाहुदण्डनिरोधमुक्ता पृतना नृपाणाम् ।
कृष्णे गते सत्वरमाजगाम घोषेण लोकत्रयभीषणेन ॥ १२० ॥

निषङ्गिभिः कङ्कटगूढकायैरधिज्यचापैर्यदुभिः परीतः ।
अतिष्ठदारूढरथः पुरस्ताद् गृहीतधन्वा युधि सीरपाणिः ॥ १२१ ॥

कोदण्डटङ्कारविदीर्णकर्णं[1] कृपाणसंघट्टनकीर्णवह्नि ।
तेषां यदूनां च बभूव जन्यमन्योन्यमत्युद्भटदर्पवादम् ॥ १२२ ॥

अनुस्मरन्तः सुकृतं प्रभूणामसिद्वितीयान्[2] द्विषदो निपात्य ।
मनस्विनः प्रापुरशस्त्रभेद्यं शस्त्रक्षताः कीर्तिमयं शरीरम् ॥ १२३ ॥

सलीलया तानि बलानि राज्ञां क्षणेन रामो युधि सञ्जहार ।
चराचराणीव जगन्ति देवो युगावसाने हरिणाङ्कमौलिः ॥ १२४ ॥

नीतेषु भङ्गं दिशि विद्रुतेषु[3] भूपेषु चेदीशपुरोगमेषु[4] ।
आदाय हस्त्यश्वरथादि तेषां कृष्णं बलः प्रारभतानुसर्तुम् ॥ १२५ ॥

मा त्वं कृथा मानुषमात्रबुद्धिं कृष्णे तवालं सुत ! साहसेन ।
पित्रेति रुद्धोऽपि ययौ[5] नगर्या रुक्मी[6] रथे मारुतशीघ्रवाहे[7] ॥ १२६ ॥

---

1 T4 - ०विकीर्णकर्ण
2 M1 - ०द्वितीया
3 M1 - युधि निर्जितेषु
4 M1 - चेदीवपुरोगवेपु
5 M1 - रुद्धो वियया
6 T1 T2 T3 T4 - रुग्मी
7 M1 - वाहेः

अनुद्रुतास्तेन मदोद्धतेन [1]सेनाभराक्रान्तमहीतलेन ।
यदुप्रवीराः समरं दिशन्तः शनैः शनैः शौरिसमीपमीयुः ॥ १२७ ॥

तस्मिन् गते रुक्मिणि सन्निकर्षं भग्नं यदूनां बलमाकलय्य ।
निवृत्य[2] कृष्णः स गृहीतधन्वा तस्थौ मुखेन स्मितभासुरेण ॥ १२८ ॥

स्वसारमालोक्य तदन्तिकस्थां दृष्ट्वा च तं सस्मितमात्तचापम् ।
मूढः प्रकृत्या नवयौवनान्धो रुक्मी सरोषः परुषं[3] बभाषे ॥ १२९ ॥

मुक्त्वानुजां[4] मच्चरणप्रणामैर्मदीयमुग्रं प्रशमय्य कोपम् ।
गां पालयन् जीव पुरेव शौरे[5]! वनेषु किं ते रणकौतुकेन ॥ १३० ॥

तज्जल्पितं तस्य दुराशयस्य श्रुत्वाप्यवज्ञाय विभुः स्मितेन ।
पर्याकुलां किन्नु भविष्यतीति विदर्भराजस्य सुतामवादीत् ॥ १३१ ॥

तवाग्रजन्मेति बले मदीये पराङ्मुखे[6] मन्दरणाभिलाषे ।
जवेन[7] यत्किञ्चन वादिनोऽस्य दर्पं हराम्यत्र न मेऽस्ति दोषः ॥ १३२ ॥

इति क्षितीशस्य सुतामुदीर्य शौरिः समास्फाल्य शरासनज्याम् ।
करेण भास्वत्कनकाङ्गदेन सलीलमादत्त शरं निषङ्गात् ॥ १३३ ॥

---

[1] T2 b - सेनाभरास्मितमात्तचापः ।
c - संसारमालोक्य तदन्तिकस्थं
d - शनैश्शनैस्सस्मितमात्तचापः
[2] M1 - निवृत्त
[3] M1 - पुरुष
[4] M1 - मुञ्च
[5] M1 - शौरी
[6] T2 - पराक्रमं
[7] M1 - स्मयेन

जातक्रुधा तत्र यदूद्वहानां बलेन चक्रीकृतकार्मुकेन[1] ।
क्षणेन नीता यमराजधानीं नरेन्द्रसूनोर्निखिलापि सेना ॥ १३४ ॥

एकेन सूतस्य शिरः शरेण परेण रथ्यानपरेण चापम् ।
चकर्त चान्येन सलीलमेव कृष्णः कृपाणं क्षितिपालसूनोः ॥ १३५ ॥

निरायुधं गाढनिबद्धबाहुं तेजोवधानम्रमुखं[2] सलज्जम् ।
अभ्यर्थ्यमानो बहुधा बलेन[3] मुमोच तं गामिव शार्ङ्गपाणिः ॥ १३६ ॥

आहृत्य [4]हस्तिहयमण्डलमस्तयोध[5] क्लृप्तार्हणः[6] पथि महीपतिमण्डलेन ।
द्वित्रैर्दिनैर्यदुपतिर्जलधेरयासीत् कूलं [7]मरुन्मुखरतालवनाभिरामम् ॥१३७॥

अथ पुरमभिवेदि[8]प्रज्ज्वलद्दीपमालं
निखिलसफलरम्भाराजिरम्यं स गत्वा[9] ।
[10]नृपदुहितृसहस्रोद्वाहपुण्याहकल्पं
व्यधित गुणिनि लग्ने[11] भीष्मकन्याविवाहम् ॥ १३८ ॥

दशमः सर्गः –

— ० —

---

[1] T2 - वक्रीकृत
[2] M1 - तेजोवधं
[3] T1 T2 - नृपेण
[4] T2 - तस्य मण्डलं
[5] M1 - अस्तयोधं
[6] T2 - क्लृप्तार्हणं
[7] M1 - चतुर्भुखल
[8] M1 - अथवेदी
[9] M1 b of 138
निखिलसफलरद्वाहपुण्याहकल्पम्
[10] M1 Omits c of 138
[11] T4 - गुणविलग्ने

एकादशः सर्गः

अथ कोसलराजस्य कन्यां कमललोचनाम् ।
[1]वीर्यशुल्कामुपश्रुत्य[2] शौरिः कौतुकवानभूत् ॥ १ ॥

समावृण्वन् महीं सर्वां सेनया वलमानया[3] ।
स रूपगुणलावण्यपेशलः प्राप कोसलान् ॥ २ ॥

नेत्रैर्जनपदस्त्रीणां[4] स निमेषपराङ्मुखैः ।
निपीयमानरूपश्रीर्नग्नजिन्नगरीं ययौ ॥ ३ ॥

आवेदयितुमात्मानमागतं पृथिवीभृते[5] ।
आदाय पूरयामास पाञ्चजन्यं परः पुमान् ॥ ४ ॥

तत्पाञ्चजन्यनादेन पूर्यमाणे पुरोदरे ।
हृदयं राजकन्यायाः कौतुकेनाप्यपूर्यत[6] ॥ ५ ॥

कृष्णमागतमाकर्ण्य प्रीतः कोसलभूपतिः ।
प्रत्युज्जगाम पुरुषैरुपायनधरैर्वृतः ॥ ६ ॥

स समालोक्य कृष्णस्य रूपं भुवनमोहनम् ।
विव्यथे[7] वसुधाधीशः स्मृत्वा च समयं निजम्[8] ॥ ७ ॥

---

[1] T2 - शौर्यशुल्कां
[2] M1 - अभिश्रुत्य
T1 T2 - उपसृत्य
[3] T1 T2 - वनमालया
[4] T4 - जनपुरन्ध्रीणां
[5] T4 - पृथिवीपते
[6] T1 T2 T3 T4 - कौतुकेनाभ्यपूर्यत
[7] T1 T2 T3 T4 - विव्यधे
[8] M1 - समयन्निमम्

तं दृष्ट्वा कोसलाधीशमुपदाभिरुपस्थितम् ।
प्राह गम्भीरया वाचा प्रीतः पङ्कजलोचनः ॥ ८ ॥

भूमौ भूमिपते! लभ्यैरलमेभिरुपायनैः ।
उपायनमलभ्यं हि प्रेमैतदनुपाधिकम्[1] ॥ ९ ॥

इत्युक्त्वा तेन तुष्टेन सह कोसलभूभुजा ।
राजीवलोचनः प्राप राजवीथीं मनोरमाम् ॥ १० ॥

गवाक्षपथविन्यस्तदृष्टयः पुरयोषितः ।
विस्मयस्तिमितैरङ्गैरन्वीयुः सालभञ्जिकाः[2] ॥ ११ ॥

पारवश्येन ताः कृष्णे नामुञ्चन् कुसुमाञ्जलीन् ।
तत्पुनर्विदधे कृत्यं तासां दृष्टिमयोत्पलैः[3] ॥ १२ ॥

तस्मै हेमासनस्थाय कृत्वा विधिवदर्हणाम्[4] ।
आसीनो विष्टरे राजा जगाद परया मुदा ॥ १३ ॥

विदुषामभिजातानां विनीतानां यशस्विनाम् ।
अद्याहं प्रथमो जातो यत् त्वं यातोऽसि मे गृहम् ॥ १४ ॥

---

[1] T1 T2 - प्रमेतदनुपाधिकः

T3 - प्रमैतदनुवर्धितम्

[2] M1 T3 T4 - सालभाभञ्जिकाम्

[3] T1 T3 T4 - दृष्टितलोत्पलैः

T3 - दृष्टिनवोत्पलैः

[4] T3 - विधिवदर्हणः

T4 - विधिवदर्हणम्

श्यामं पद्मपलाशाक्षं दीर्घबाहुं कृशोदरम् ।
पीताम्बरमपश्यन्तस्त्वामन्धसदृशा जनाः ।। १५ ।।

मुनीनां सनकादीनां ज्ञानलोचनगोचरम् ।
त्वामाभ्यामेव[1] नेत्राभ्यां पश्यन्तः कृतिनो वयम् ।। १६ ।।

आगते त्वयि भद्रेमां चरितार्थयितुं पुरीम् ।
मन्ये दुःखार्णवे मग्नाः[2] प्रजा[3] द्वारवतीजुषः ।। १७ ।।

रात्रिश्चन्द्रमसा शून्या कविता रसवर्जिता ।
त्वया च विप्रयुक्ता भूः शौरे! शोच्यमिदं त्रयम् ।। १८ ।।

तत्परिज्ञातुमिच्छामि निमित्तं मदनुग्रहे ।
अथवा निर्निमित्तस्ते सर्वभूतेष्वनुग्रहः ।। १९ ।।

इति प्रियशतालापपेशलं कोसलाधिपम् ।
मन्दस्मितमनोज्ञेन मुखेन हरिरब्रवीत् ।। २० ।।

याचनादपरं किञ्चिद् गर्हणीयं न विद्यते ।
तथापि तव[4] संबन्धलोभादभ्यर्थ्यते[5] मया ।। २१ ।।

---

[1] M1 - आद्यामेव
[2] M1 - मग्नां
[3] T1 T2 T3 T4 - व्रजा
[4] T1 T2 T3 T4 - उत्तम
[5] T1 T2 T3 T4 - अभ्यर्थ्यसे

न प्रीतिर्द्विरदे[1] नाश्वे न रत्ने न[2] च मे भुवि ।
मनो मदीयं राजर्षे ! श्वशुरं त्वामपेक्षते ॥ २२ ॥

इति त्रैलोक्यनाथस्य[3] वचः[4] श्रुत्वा मनोहरम् ।
सव्रीडं[5] प्रश्रयोपेतं राजा वचनमब्रवीत् ॥ २३ ॥

आकर्णय महाभाग ! सावधानं[6] कथामिमाम् ।
पुंसां बलवतामुच्चैर्हासकौतुककारिणीम् ॥ २४ ॥

रामणीयकसंपन्नामालोकय[7] ममात्मजाम् ।
इयं[8] शूराय देयेति मतिः कापि बभूव मे ॥ २५ ॥

शौर्यजिज्ञासया सप्त मया संवर्धिता वृषाः ।
सत्ववन्तो दुराधर्षाः कैलासशिखरोपमाः ॥ २६ ॥

ईर्ष्यतः पवनायापि छायाभ्योऽपि प्रकुप्यतः[9] ।
तान् समालोक्य समयः सभायां विदधे मया ॥ २७ ॥

सप्तापि प्रथमं मुक्त्वा बलाद् बध्नाति[10] यो वृषान् ।
पाणिपङ्कजमेतस्याः[11] स गृह्णातु[12] पुमानिति ॥ २८ ॥

---

1 M1- प्रीति वीर
2 M1- तत्तेन T2- रथेन
3 T1 T2- त्रिलोकनाथस्य
4 T1 T2- वचं
5 M1- सव्रीळः
6 M1- सावधानः
7 M1 T1 T2- आलोकयितुमात्मजाम्
T3- आलोकयितुरात्मजाम्
8 M1- इदं
9 M1- छायाभ्यो विप्रकुप्यतः
10 M1- गृह्णाति
11 T4- पाणिपल्लवमेतस्य
12 M1- गृह्णाति

श्रुतप्रतिज्ञाः[1] सोत्साहा व्यायामकठिनत्वचः ।
आजग्मुः पृथिवीपालाः पुरमेतद् दिने दिने ॥ २९ ॥

अथावभुग्नग्रीवाणां पादेन कृषतां महिम् ।
नाजग्मुः सविधं भीतास्तेषां तिर्यङ्निरीक्षणात् ॥ ३० ॥

[2]तेषां नासापुटोत्सृष्टैः शूत्कारमरुदूर्मिभिः ।
क्षिप्ता केचित् पलायन्त स्रस्ताभरणवाससः ॥ ३१ ॥

शिशुपालादयः केचिद् राजानः शूरमानिनः ।
गत्वा तत्सविधं भिन्नवक्षः[3]शीर्षा विनिर्ययुः ॥ ३२ ॥

अभाग्येति सुतां केचिदबुद्धिरिति[4] मां परे ।
निन्दन्तो[5] नगरादस्मान्निर्जग्मुस्त्रपयान्विताः ॥ ३३ ॥

तेषां विभिन्नगात्राणां वीक्षणेन[6] महीक्षिताम् ।
स्वप्नेऽपि नोपसर्पन्ति[7] राजानो नगरीमिमाम् ॥ ३४ ॥

दर्पमागच्छतां राज्ञां स्मृत्वा दैन्यं च गच्छताम् ।
हासः प्रवर्ततेऽद्यापि प्रजानां भिन्नपार्श्वकः ॥ ३५ ॥

---

1 M1- कृतप्रतिज्ञाः
2 M1 Omits verse 31
3 M1- भिन्नपक्षशीर्षा
4 M1- दुर्बुद्धिरिति
5 T2- निन्दन्ते
6 M1- वीक्षमाणे
7 M1- नो न सर्पन्ति
8 T2- दैत्यं

कथया किं तया कृष्ण! लब्ध्वापि त्वामिहागतम् ।
चलितुं क्षमते जिह्वा न मे समयसंयता[1] ॥ ३६ ॥

अथवा पुण्डरीकाक्ष! समयस्त्वयि नोचितः ।
यदि ते रोचते कन्या[2] ददामि प्रतिगृह्यताम् ॥ ३७ ॥

कामं निन्दतु[3] लोकोऽयं मां प्रतिज्ञातिलङ्घिनम्[4] ।
लोकानुवृत्तिः संसारात् किमुत्तारयितुं क्षमा ॥ ३८ ॥

इत्यूचिषि महीपाले परितुष्टे पुरोधसि ।
मुदितासु च पत्नीषु शौरिर्गम्भीरमब्रवीत् ॥ ३९ ॥

राजन्! कीर्तिमतामद्य त्वमुदाहरणं भुवि ।
मा भूदियमकीर्तिस्ते प्रतिज्ञाभङ्गसंभवा ॥ ४० ॥

इति ब्रुवन् समुत्थाय क्वणदालोलकुण्डलः[5] ।
बद्ध्वा परिकरं शौरिः स्मयमानमुखोऽब्रवीत् ॥ ४१ ॥

पश्य पर्वतकल्पानां वीरगर्वापहारिणाम्[6] ।
अहमद्य हरिष्यामि दर्पमेषां[7] ककुद्मताम् ॥ ४२ ॥

---

1 T1 T2 T3 T4- संयताम्

2 M1 - कन्यां

3 M1 T1 T2 T3 - निन्दन्तु

4 T1 T2 T3 T4- प्रतिज्ञातलङ्घिनम्

5 T2- क्षणमालोलकुण्डलः
T1 T2 T4- क्षणदालोकभूषणः

6 T4- वीरगुप्त्याप्रहारिणाम्

7 M1- दर्पमद्य

इत्युक्त्वा सप्तधा भूत्वा क्रुद्धानास्फोटनस्वनैः[1] ।
मेषानिव निमेषेण तान्मुमोच बबन्ध च ॥ ४३ ॥

अथ विस्मितचित्तानां साधुवादः सभासदाम्[2] ।
साध्वसं राजकन्यायाः शमयन्नुदजृम्भत ॥ ४४ ॥

निर्विकारमुखः शौरिः पुरेवासिष्ट[3] विष्टरे ।
पादयोरपतत्[4] तस्य प्रीतः कोसलभूपतिः[5] ॥ ४५ ॥

वृषानाख्याय[6] कृष्णेन लीलया मुक्तसंयतान् ।
जहार राजकन्याया[7] भूषणानि सखीजनः ॥ ४६ ॥

विप्रैरुत्क्षिप्तवासोभिः[8] सहागत्य प्रियं वदन्[9] ।
जहार भूपतेरङ्गादुत्तरीयं पुरोहितः ॥ ४७ ॥

[10]पाणिपङ्कजविक्षिप्तैः[11] कर्पूरकणराशिभिः ।
[12]प्रीत्या राजकलत्राणि विजह्रुर्भवनोदरे ॥ ४८ ॥

सिच्यमानेषु सर्वेषु दासीभिः कुङ्कुमोदकैः ।
क्षणं कलकलः कोऽपि राजसद्मन्यजृम्भत ॥ ४९ ॥

---

1 M1- आस्फोटनिस्वनैः
2 T4- सभासदाम्
3 T1 T2 T3 T4- पुरेवसिष्ट
4 M1- पादयोरवदत्
5 M1- कोवलभूपतिः
6 T1 T2 T3 T4- वृषनाख्याय
7 M1- यां
8 T4- विप्रैरागत्यवासो
9 T3 T4- वदः
10 T2- पाद०
11 M1- विक्षिप्त
12 T4 Omits verse 48 C—72.

शङ्खदुन्दुभिनिर्घोषै[1]र्मुखरीकृतदिङ्मुखम् ।
निखिलं तत्क्षणादासीत् प्रमोदतुमुलं पुरम् ॥ ५० ॥

प्रेषयामास देशेषु दूतान् मारुतरंहसः ।
आनेतुमात्मनो बन्धून् नृपान् बन्धुप्रियो नृपः ॥ ५१ ॥

विवाहः पञ्चमेऽह्नीति लग्नविद्भिरुदीरितः[2] ।
गृहीत्वा पाणिना पाणिं कृष्णमन्तर्निनाय[3] सः ॥ ५२ ॥

निवेश्य निखिलं सैन्यं तदीयं नगरे निजे ।
विदधे स[4] विधेयानि स्वयमेव नृपैर्वृतः ॥ ५३ ॥

शौरिस्तत्र दिवारात्रं गवाक्षन्यस्तदृष्टिभिः ।
उवास राजपत्नीभिर्वीक्ष्यमाणः कुतूहलात् ॥ ५४ ॥

सखीजनेन सत्यायाः[5] छेकालापविदा[6] सह ।
स तस्मिन् संलपन् कृष्णो नाजानाद् गच्छतः क्षणान् ॥ ५५ ॥

भ्रमद्ध्वजपटाकीर्णा ज्वलत्काञ्चनतोरणाः ।
भूषितप्रमदालोका चकाशे नगरी[7] चिरम् ॥ ५६ ॥

---

1 M1- ०निर्घोष०
2 M1- उदीरिते
3 T2- अन्तर्निधाय
4 T3- च
5 M1- सत्यायां
6 M1- कलिलापविदा
T2 T3- शोकालापविदा
7 T1 T2 T3- नगरीं

अर्जुनप्रमुखे राज्ञां बन्धूनामागते गणे ।
पञ्चमे च[1] दिने प्राप्ते नृपमूचे पुरोहितः ॥ ५७ ॥

अवेहि लग्नमासन्नं राजन्नुद्वाहकर्मणः ।
अद्यैव होमभवनमानीयेतां वधूवरौ ॥ ५८ ॥

इत्याकर्ण्य गुरोर्वाक्यं राजा [2]वलितकन्धरः ।
तयोरानय[3]नौत्सुक्यात् पुरुषानादिशद् दृशा[4] ॥ ५९ ॥

अथागच्छत् सभां कृष्णो मुखेन स्मितचारुणा ।
परिहासविदा साकं संलपन् सव्यसाचिना ॥ ६० ॥

न्यस्ते मणिमये पीठे पुरुषैस्तत्र सत्वरैः ।
आसीने पुण्डरीकाक्षे जिष्णुरास्त तदन्तिके ॥ ६१ ॥

[5]उत्सारितमहालोका याहि याहीति वेत्रिभिः[6] ।
राजपुत्री समागच्छदाक्रम्य मणिपादुके ॥ ६२ ॥

तदग्रे पूर्यमाणानां शङ्खानामुदरोद्गतः[7] ।
ध्वनिरुन्मनसं चक्रे गम्भीरो देवकीसुतम् ॥ ६३ ॥

---

1 M1- तत्
2 T1- चलित
3 T1 T3- आगमन
4 M1- दृशा
5 T1 omits 62nd verse.
6 M1- वादिभिः
T3- वेत्रिणा
7 M1- उदयोद्गतः

अवकाशं प्रयच्छेति नर्मविद्भिः सखीजनैः ।
क्षिप्तः सस्मितमासिष्ट स[1] दत्वा [2]शौरिरन्तरम् ।। ६४ ।।

सा सखीभिर्विदग्धाभिर्बलेनेव निवेशिता[3] ।
स्पृशन्ती[4] बाहुना बाहुमास्त पार्श्वे मधुद्विषः ।। ६५ ।।

दृष्ट्वा[5] तद्भुजसंस्पर्शप्रवृत्तां रोमविक्रियाम् ।
हसन्तं प्राहरत् पार्थं लिकुचेन हसन्[6] हरिः ।। ६६ ।।

सत्यामर्हति गोविन्दः सत्या[7] गोविन्दमर्हति ।
इत्यालपन् जनः सेर्ष्यमैक्षि[8] वक्षःस्थया[9] श्रिया ।। ६७ ।।

आसीनयोस्तयोरग्रे सुखासीनः पुरोहितः ।
जातवेदसमानीय कर्म कर्तुं प्रचक्रमे ।। ६८ ।।

ज्वलत्पुरोधसा[10] तेन हूयमानो हुताशनः ।
निरवापय[11]दुत्सिक्तं[12] सत्यायाः शोकपावकम् ।। ६९ ।।

हुताशनशिखा वध्वाः कपोलप्रतिबिम्बिताः ।
कर्णाभरणतां नीतानन्वीयुश्चू[13]तपल्लवान् ।। ७० ।।

---

1 T3- तत्
2 T1- किञ्चित्
3 M1- निवेशितौ
4 M1- स्पृशन्ति
T1 T3- स्पृशती
5 M1- दृष्टया
6 M1- हसं
7 M1- सत्यं
8 M1- ऐक्षी
9 M1- वक्षस्थल
10 M1- ०पुरोधसं
11 T2- निनिरवासयत्
12 T1 T3- उत्सिक्ताः
T2- उत्सिक्ता
13 M1- नेसियुः

प्रयोगकुशलो यद्यदादिदेश पुरोहितः ।
तत्तद् कर्माकरोत् कृष्णः स्मयमानेन चेतसा ॥ ७१ ॥

स पावकं परीयाय सहितस्तत्र सत्यया ।
छायया सहितो देव्या हेमाचलमिवार्यमा ॥ ७२ ॥

स कथञ्चिन्न चस्खाल भ्रमन् कृष्णः प्रदक्षिणम् ।
तत्पाणिपङ्कजस्पर्शसुखेनामीलितेक्षणः ॥ ७३ ॥

राजा[1] राजीवनेत्राय हृष्टः शिष्टभयच्छिदे ।
दिदेश दर्शनीयाय[2] मधुपर्कं मधुद्रुहे[3] ॥ ७४ ॥

वैधे कर्मणि निर्वृत्ते[4] तत्र कृष्णवलाहकः ।
प्राणिनः[5] प्रीणयामास हृद्याभिर्हेमवृष्टिभिः ॥ ७५ ॥

दीयमानाक्षतौ विप्रैः पुरोहितपुरोगमैः ।
दम्पती सह पार्थेन निनाय[6] नृपतिर्गृहम् ॥ ७६ ॥

नावजानात्[7] स दम्पत्योः प्रेमकातरमानसः ।
तयोर्द्वारवतीयात्रां[8] मासमेकं महीपतिः ॥ ७७ ॥

---

1 M1- राजी
2 M1- दर्शनीयं
3 T1 T3- मधुद्विषे
4 M1- वृत्तेन
5 M1- प्राणिनं
6 M1- नियाय
7 M1- न स जानात्
8 M1- द्वारवतीं यात्रा

सा विवाहकथा शौरेः सतामानन्दमावहत् ।
राज्ञां तु वृषभग्नानां क्षते क्षार इवाभवत् ॥ ७८ ॥

गजाश्वारोहणौत्सुक्याद् विनिर्गत्य[1] दिने दिने ।
प्रजानां चरितार्थानि लोचनानि चकार सः ॥ ७९ ॥

सव्रीडहसितं[2] मौनि[3] [4]भङ्गुरापाङ्गवीक्षणम्[5] ।
प्रियायाः[6] स मुखं पश्यन् मासं दिनमिवानयत्[7] ॥ ८० ॥

रथाश्वकरिकोशानि दत्वा कात्स्न्येन[8] भूपतिः ।
कथञ्चित् प्रेषयामास दम्पती[9] प्रेमविह्वलः ॥ ८१ ॥

सराजलोकः सामात्यः सपौरः सपुरोहितः ।
स्वयं चानुचरन्नेकं दिनं ताभ्यां सहावसत्[10] ॥ ८२ ॥

अन्येद्युरुदिते सूर्ये सह यातुं समुद्यतम् ।
शौरिर्निवर्तयामास श्वशुरं[11] साश्रुलोचनम् ॥ ८३ ॥

मनसा कृष्णमादाय कोसलः स च कोसलम् ।
जग्मतुर्वलितग्रीवौ पश्यन्तावितरेतरम्[12] ॥ ८४ ॥

---

1 M1 - विनिर्हृत्य
2 T4 - व्रीकहसितं वल्गु
3 T2, T3 - मौन
4 M1 - भङ्गुरावोङ्ग
5 T1 T2 T3 T4 - वीक्षितम्
6 M1 - प्रिया सा
7 T2 - दिनमिवाभवत्
8 T1 T2 T3 T4 - कात्सनेन
9 M1 - दम्पति
10 T1 T2 T3 T4 - समावसत्
11 M1 - चतुरं
12 T1 T2 T3 T4 - पश्यन्तापितरेतरन्

प्रविष्टे नगरीं तस्मिन् नभोमध्यगते रवौ ।
विसृष्टकटके[1] तत्र जज्ञे कलकलो महान् ॥ ८५ ॥

चित्रकेतुसमाकीर्णं[2] दुर्दर्शं शस्त्रतेजसा ।
अदृश्यत महासैन्यं[3] तुमुलं तूर्यकाहलैः ॥ ८६ ॥

सामीप्येन कृतव्यक्ति[4] वधूहरणसस्पृहम्[5] ।
अपूरितप्रतिज्ञानां[6] बलं राज्ञां बभूव तत् ॥ ८७ ॥

सुकपोलतलं सुभ्रु रक्तोष्ठं[7] दीर्घलोचनम् ।
रुचिरालकमासिष्ट शौरिः पश्यन्[8] प्रियामुखम् ॥ ८८ ॥

अथ गत्वा रथेनोच्चैः प्रचलत्कपिकेतुना ।
फल्गुनः पृथिवीपालान् सोपालम्भमभाषत ॥ ८९ ॥

राज्ञः सकाशादानीता[9] शौरिणा शूरकर्मणा[10] ।
वृषास्तिष्ठन्ति ते तत्र[11] भवद्भिः किमिहागतम् ॥ ९० ॥

[12]तद्दृष्टिपथमावृत्य ससैन्ये मयि तिष्ठति ।
पलाय्य पुत्रदाराणां मुखान्यद्यैव पश्यत[13] ॥ ९१ ॥

---

[1] M1 - विसृष्टे
[2] T1 T2 T3 T4 - छत्रकेतु
[3] M1 - महत् सैन्यं
[4] M1 - कृतव्यक्तं
T3 - कृतोव्यक्ति
T4 - कृतद्व्यक्ति
[5] M1 - ०संस्पृहम्
[6] T1 T2 T3 T4 - आपूरित
[7] T1 T2 T3 T4 - रक्तोष्ठदीर्घलोचनम्
[8] M1 - पश्यन् शौरिः
[9] T1 T2 - सकाशात्समानीताः
[10] M1 T2 - घोरकर्मणा
[11] M1 - सप्त
[12] M1 - तं
[13] T1 T2 - अपश्यत

सोपालम्भमिति श्रुत्वा वचनं सव्यसाचिनः ।
समाजः स नरेन्द्राणां क्रुद्धो युद्धं प्रचक्रमे ॥ ९२ ॥

संहर्तुकामः सर्वेषां बलं तत्पृथिवीभृताम् ।
कृतान्तभ्रूलताकल्पं[1] जिष्णुर्गाण्डीवमाददे ॥ ९३ ॥

निर्जग्मुस्तरसा तस्य कोदण्डात् कोटिशः शराः ।
युगान्ततोयदात् तोयधारा इव महास्वनाः ॥ ९४ ॥

राजानो जिष्णुजीमूते सायकासारवर्षिणि[2] ।
तूणीराद् [3]बाणमुद्धर्तुमवकाशं न लेभिरे ॥ ९५ ॥

अनश्नुवानो विच्छेदं नवाभ्रस्तनितोपमः[4] ।
कृष्णमानन्दयामास चापघोषः[5] किरीटिनः ॥ ९६ ॥

छिन्नाश्वरथमातङ्गं कृत्तकार्मुकमण्डलम् ।
सञ्जहार[6] बलं सर्वं लीलया तद् धनञ्जयः ॥ ९७ ॥

स धरित्रीं लघूकृत्य स्वस्मिन्नारोप्य गौरवम् ।
आजगामान्तिकं शौरेः फल्गुनो मन्थरैः पदैः ॥ ९८ ॥

---

[1] M1 - कृतान्तद्रुलताकल्पं
[2] T1 T2 T3 T4 - वर्षिणी
[3] M1 - बाहुं
[4] M1 - ०उपमम्
[5] T2 - सा च घोषः
[6] M1- स जहार

शौरिस्तस्योपविष्टस्य सस्मितं[1] कृतकर्मणः ।
पाणिना पद्मताम्रेण स्पृशन्नङ्गान्यभाषत ॥ ९९ ॥

पुरारातिरपि स्थातुं पुरस्ते न क्षमो रणे ।
श्लाघा[2] राजकुरङ्गाणां[3] जये विजय ! कीदृशी ॥ १०० ॥

जन्म मानुषमास्थाय देवतांशा भवादृशाः ।
दुष्टानुन्मूल्य रक्षन्ति शिष्टानित्यत्र नाद्भुतम् ॥ १०१ ॥

इति प्रशस्य तं पार्थं व्रीडानतमुखं हरिः ।
तत्र तेन सहानैषीन्मुहूर्तमिव तद् दिनम् ॥ १०२ ॥

सौधशृङ्गं समासाद्य[4] देवक्या वीक्षितागतिः[5] ।
पर्युत्सुकजनं[6] प्राप पुरं कतिपयैर्दिनैः ॥ १०३ ॥

दिनानि कतिचित् तस्मिन् पुरे नीत्वा धनञ्जयः ।
कथञ्चिदग्रजादेशादयासीदात्मनः पुरीम् ॥ १०४ ॥

अथ स्यमन्तकस्तेयवादभिन्नं तमच्युतम् ।
सत्राजित् तोषयामास सुतारत्नोपदाच्छलात् ॥ १०५ ॥

---

1 T1 T2 T3 T4 - सस्मितः

2 M1 - श्लोका

3 M1 - राजतुरङ्गाणां

4 M1 - समारुह्य

5 M1 - वीक्षितागतिम्

6 T1 T2 T3 T4 - पर्युत्सुकं

इति द्वाभ्यां[1] स देवीभ्यां सहितो यदुपुङ्गवः ।
पार्वतीजह्नुकन्याभ्यामिन्दुमौलिरिवाबभौ ॥ १०६ ॥

स तया तत्र सत्राजित्सुतया सह माधवः ।
पदेषु[2] रमणीयेषु रेमे रक्तेन चेतसा ॥ १०७ ॥

दृष्टयस्त्रपया[3]लोलाःस्तस्या वाचः श्रुताश्रुताः ।
रतान्यनुपचाराणि रतिमादधिरे हरेः ॥ १०८ ॥

सखीजने विनिर्याते[4] प्रदीपेऽप्युपसंहृते ।
तत्रसे[5] पञ्जरासीनाच्छुकादुक्तानुवादिनः ॥ १०९ ॥

हृतवत्यच्युते रागात् क्षौमं जघनमण्डलात् ।
निमिमील निजे नेत्रे व्रीडापर्याकुला वधूः ॥ ११० ॥

गते सखीजने दीपं शमयन्ती मुखानिलैः ।
हृदि सन्धुक्षयामास पत्युः सा रागपावकम्[6] ॥ १११ ॥

विहरत्यरविन्दाक्षे निर्मन्दाक्षे दिवानिशम् ।
लज्जा सञ्जातलज्जेव क्वापि तस्यास्तिरोदधे[7] ॥ ११२ ॥

---

1 T2 - अथ ताभ्यां
2 T4 - वर्षेषु
3 M1 - दृष्टयस्तूपयाय
4 M1 - सखीजनेऽपि निर्याते
5 T1 T2 T3 T4 - तत्रवे
6 M1 - सागरपावकम्
7 M1 - C & D.
लज्जा सञ्जातयस्तस्यास्सखी-
नामपि सन्निधौ

[1]अधरे मधुरेशस्य[2] पक्वबिम्बफलत्विषि ।
निपेतुर्दृष्टयस्तस्याः सखीनामपि सन्निधौ ॥ ११३ ॥

निशानिधुवनच्छिन्नां[3] मधुजिन्मणिमेखलाम् ।
प्रियासहायः शय्यायां प्रातः प्रतिसमादधे ॥ ११४ ॥

सा तिरोहितपद्माभा श्यामा रुचिरतारका ।
स्मितचन्द्रिकयानैषीत् कृष्णार्णवमधीरताम् ॥ ११५ ॥

गमनं नगरादास्तामास्तां निर्गमनं गृहात् ।
न तल्पादुद्गतिं[4] सेहे पत्युः सा पद्मलोचना ॥ ११६ ॥

आसीनोऽपि शयानोऽपि तिष्ठन्नपि चरन्नपि ।
तां छायामिव ताम्रोष्ठीं[5] स च तत्याज[6] न क्षणम् ॥ ११७ ॥

एवं सार्धं तया तन्व्या[7] [8]क्षणानिव नयन् दिनान्[9] ।
आतङ्कमथ शुश्राव नरकान्नाकवासिनाम्[10] ॥ ११८ ॥

तस्य कालोरगस्येव[11] प्रजाजीवितहारिणः ।
दमे[12] दामोदरः[13] कुर्वन् धियं [14]दध्यौ खगेश्वरम्[15] ॥ ११९ ॥

---

[1] M1 Omits verse No. 113
[2] T3 T4 - मधुरेतस्य
[3] T2 - ०निधुवनोच्छिन्नां
[4] M1 - तत्पादस्थितिं
[5] M1 - बिम्बोष्ठीं
[6] M1 - सत्याज
[7] M1 - स कान्तया तस्व
T2 - स कान्तया तस्या
T3 - स कान्तया तन्व्या
[8] T3 Omits क्षणानिव
[9] T1 T2 - निशाः
[10] M1 - नाकवासिनः
[11] M1 - कालोरगस्यैव
[12] M1 - दम
T2 - मदे
[13] T2 - मदोतरः
[14] M1 - कुर्वन्धिया
[15] M1 - खगेश्वरः
T4 - खगेश्वरे

भासयन् भुवनाभोगं हेमपक्षभरत्विषा ।
आजगाम स वेगेन पक्षवानिव पर्वतः ॥ १२० ॥

तमारुह्य गरुत्मन्तं सहितः सत्यभामया ।
अविज्ञातगतिः शौरिः प्राग्ज्योतिषपुरं ययौ ॥ १२१ ॥

दुर्गाणि [1]गिरिशस्त्राग्निजलपाशमयानि सः ।
ज्वलद्भिरायुधैर्दिव्यैर्निमेषेण निराकरोत् ॥ १२२ ॥

उपसृत्य पुरद्वारं प्रियया सह लीलया ।
युयुत्सुः पूरयामास पाञ्चजन्यं जनार्दनः ॥ १२३ ॥

निशम्य तस्य गम्भीरं घोषं दिङ्मुखसर्पिणम् ।
भित्वा सागरमुत्तस्थौ मुरो मुखरितोदकः ॥ १२४ ॥

नभःस्पृशा शरीरेण पञ्चभिर्वदनैश्च सः ।
विरेजे बहुभिः शृङ्गैर्महीयानिव सानुमान् ॥ १२५ ॥

स त्रिलोकीमनःशूलं[2] शूलं कालकरोपमम् ।
तरसा[3] वयसां[4] पत्यौ प्रजिघाय जिघांसया ॥ १२६ ॥

---

[1] T2 - गिरिशस्त्राणि
T3 T4 - गरिशस्त्राणि

[2] T2 - मनःशूल्यं

[3] T3 - सरसा

[4] M1 T1 T2 T3 T4 - पयसां

तस्मिन् शौरिशरच्छिन्ने प्रायुङ्क्त महतीं गदाम् ।
तस्यामपि च कृत्तायां क्रोधेनाभ्यद्रवन्मुरः ॥ १२७ ॥

तस्याभिधावतो[1] बाहूनुद्यम्य परिघोपमान् ।
शौरिः शिरांसि चिच्छेद चक्रेणोद्गीर्णवह्निना[2] ॥ १२८ ॥

नरकस्य शिरश्छेत्तुं चक्रस्य कृतचेतसः ।
स शिरःपञ्चकच्छेदः प्राणाहुतिरिवाभवत् ॥ १२९ ॥

[3]पतद्भिस्तरसा तस्य शीर्षैराहतपुष्करः ।
नदन्नम्बुनिधिः[5] शौरेर्बभूव जयदुन्दुभिः ॥ १३० ॥

मुरं[6] हतमुपश्रुत्य नरकः क्रोधमूर्च्छितः ।
करिणः कल्पयामास सिन्धुजान् विन्ध्यसन्निभान्[7] ॥ १३१ ॥

बन्दीकृताभिः स्वगृहे पाणिग्रहणवाञ्छया ।
मनसा[8] राजपुत्रीभिः शप्यमानः[9] स निर्ययौ ॥ १३२ ॥

घटाभिर्घनकल्पानां[10] गजानां मदवर्षिणाम् ।
[11]रोद्धुमारब्धसंक्रुद्धो[12] भौमो भीमपराक्रमः ॥ १३३ ॥

---

[1] T4 - तस्यानुधावतो
[2] M1 - उत्कीर्ण
[3] M1 - परद्भिः
[4] M1 - शीर्षैः
[5] M1 - निनदन्नम्बुधि
[6] M1 - मुरा
[7] T1 T3 T4 - विन्ध्यसंभवा
[8] M1 - मनुया
[9] T3 T4 - शप्यमानः
[10] M1 - घन
[11] M1 रोयुं
[12] M1 - संरम्भो

तत्प्रयुक्तानि शस्त्राणि शरैः शार्ङ्गविनिःसृतैः[1] ।
शतशः खण्डयामास शतपत्रेक्षणः क्षणात् ॥ १३४ ॥

अमोघां शक्तिमादातुं तस्मिन्निच्छति माधवः ।
सुदर्शनेन चिच्छेद मूर्धानं तस्य लीलया ॥ १३५ ॥

तस्य विक्रमसन्तुष्टाः सिद्धविद्याधरादयः ।
मधुगन्धीनि[2] माल्यानि मुमुचुर्मधुवैरिणि ॥ १३६ ॥

तदीयं प्रेषयामास स्वपुरे [3]कोशवाहनम् ।
ताः षोडश सहस्राणि कन्याश्च पृथिवीभृताम्[4] ॥ १३७ ॥

सुतनिधनभवं नियम्य[5] शोकं[6] क्षितिरभिपत्य[7] पदद्वयं[8] मुरारेः ।
उपहृतमणिकुण्डला ययाचे सुतमभिपालय तस्य केशवेति ॥ १३८ ॥

निशम्य तस्या वचनं प्रसेदिवान् सुताय[9] दत्वा नरकस्य तत्पदम् ।
पुमानदित्यै परमः पुरा हृते स कुण्डले दातुमगात् त्रिविष्टपम् ॥ १३९ ॥

सपदि श्रुतपाञ्चजन्यनादः सह देवैर्मुनिभिः सनातनैश्च ।
शतमन्युरुपेत्य[10] दैत्यशत्रुं विनयेन स्वगृहोदरं निनाय ॥ १४० ॥

---

[1] M1 - ०विनिर्गमे
[2] M1 - मधुगन्धिनी
[3] M1 - केशवाहनम्
[4] T4 - पृथिवीसुता
[5] M1 - निशम्य
[6] M1 - शोक
[7] M1 - अभिवाद्य
[8] M1 - पदद्वये
[9] M1 - सुतस्य
[10] M1 उपेत्य

विधिवत्कृतसत्कृतिर्मघोना मधुजित् प्रीतिविकस्वरेक्षणेन ।
श्रवणाभरणं ददावदित्यै मधुरं सा च तमाह सुप्रसन्ना ॥ १४१ ॥

परिपालयति त्वयि त्रिलोकीमधुना निःसमरस्य वृत्रशत्रोः ।
भवति ज्वलदुग्रशस्त्रजाला[1] पृतना केवलमाधिपत्यचिह्नम् ॥ १४२ ॥

[2]मणिकुण्डलमेतदम्बुजाक्ष! प्रतिपक्षान्महतस्त्वयोपनीतम् ।
पुनरुक्तमभून्मम त्वदीयैश्चरितैः कल्पितकर्णभूषणायाः[3] ॥ १४३ ॥

इत्यादिभिः स्तुतिशतैः श्रवणाभिरामैः
सन्तोष्य दानवरिपुं जननी सुराणाम् ।
आघ्राय मूर्धनि मुहुः परिरभ्य गाढ-
मानन्दमग्नहृदया[4] न किमप्यजानात्[5] ॥ १४४ ॥

अथ स यदुकुलेन्दुर्हृद्यया रूपलक्ष्म्या
सुरपुरवनितानां प्रीणयन्नीक्षणानि ।
अदितिशतमखाभ्यामादरादर्थ्यमानः[6]
सह सरसिरुहाक्ष्या तद् दिनं तत्र निन्ये ॥ १४५ ॥

इति एकादशः सर्गः

---

[1] T3 T4 - शस्त्रमाला

[2] M1 - omits verse 143 but before verse 142 and after verse 141, M1 reads thus: मणिकुण्डलमेतत्कर्णभूषणायाः

[3] T2 - कल्पितकण्ठः

[4] M1 - ०हृदयेन

[5] T4 - आजानात्

[6] - M1 - अर्च्यमानः

द्वादशः सर्गः

निशीथिनीं तत्र सुखेन नीत्वा विभातशङ्खध्वनिवीतनिद्रः ।
मन्दाकिनीमेत्य मधोर्निहन्ता सन्ध्यामुपासिष्ट सतामुपास्यः ॥ १ ॥

आपृच्छ्य शक्रं[1] प्रणिपातपूर्वं देवीमनुज्ञाप्य च तत्सवित्रीम् ।
निवारितानुद्रुतयोगिलोको देवः प्रतस्थे दयितासहायः ॥ २ ॥

आघ्राय सौरभ्यमभूतपूर्वमानीतमारामसमीरणेन ।
सुविस्मिता वल्लभमाचचक्षे कस्यैष[2] गन्धः कथयेति देवी ॥ ३ ॥

निशम्य तस्या[3] गिरमुत्सुकिन्या[4] जगाद वाचं जगदेकनाथः ।
आकर्ण्यतामागतिरस्य सम्यग् गन्धस्य लोकत्रयमोहनस्य ॥ ४ ॥

पुरा ममन्थुः पुरुहूतमुख्या नदीपतिं नाकसदो बलेन ।
तस्मादुदस्थादुपकारशीलो महीरुहो मानिनि पारिजातः ॥ ५ ॥

मनोभिरामं परिगृह्य वृक्षं शक्रस्तमुद्यानमहीमनैषीत् ।
तत्पुष्पजन्मा तरलद्विरेफो[5] गन्धोऽयमाशाः[6] सुरभीकरोति ॥ ६ ॥

इत्युक्तवन्तं पुनराह देवी पतिं परेणैव[7] कुतूहलेन ।
सत्यं मयि[8] स्निह्यति चेन्मनस्ते मदीयमुद्यानममुं नयेति ॥ ७ ॥

---

[1] M1 - शक्रः
[2] M1 - कस्येति
[3] M1 - तस्यां
[4] M1 - गिरमुत्सुकिन्यां
[5] M1 - तरलभृद्विरेफो
[6] T1 T2 T3 T4 - आश
[7] T1 T2 - परेणेव
[8] M1 - मनः

तरुं हरिष्यामि कथं मघोनः कथं करिष्यामि[1] न काममस्याः ।
इति क्षणं तत्र सरोजनेत्रः प्रकामपर्याकुलधीर्बभूव ॥ ८ ॥

भूयोऽपि भूयोऽपि तयार्थ्यमानः स[2]विक्लबस्तत्प्रणयातिवृत्तौ ।
गन्धानुसारेण जगाम मूलं द्रुमस्य तस्य द्विपसन्निकाशः ॥ ९ ॥

उत्सार्य[3] मामेति [4]निरुन्धतस्तानारामपालानखिलान् बलेन ।
दिव्यं समुद्धृत्य तरुं स दोर्भ्यामारोपयामास [5]सुपर्णपृष्ठम् ॥ १० ॥

स्वयं च तस्मिन्नधिरुह्य देव्या[6] सह स्वकर्मानुचितं विचिन्त्य ।
चित्तेन लज्जामृदुना स गन्तुं प्रचक्रमे स्वां प्रति राजधानीम् ॥ ११ ॥

श्रुत्वा हृतं कल्पतरुं प्रकोपान्नश्यद्विवेकः सहसा सुरेन्द्रः ।
आदिक्षदस्यानयनाय देवान् संग्रामभूमिष्वनुभूतशौर्यान् ॥ १२ ।

क्व यासि नः कल्पतरुं गृहीत्वा मा कृष्ण गच्छेति[7] वदन्त[8] एव ।
शस्त्रप्रभाश्यामलितान्तरिक्षा[9] स्वर्गौकसः[10] सत्वरमाययुस्ते ॥ १३ ॥

भीतं तमालक्ष्य[11] सुरेन्द्रसैन्ये गत्वान्तिकं वर्षति शस्त्रजालम् ।
ऊरुद्वयस्पन्दनसंज्ञयैव[12] निवर्तयामास स वैनतेयम्[13] ॥ १४ ॥

---

[1] T1 T2 - हरिष्यामि
[2] M1 - विक्रमः
[3] T2 - उत्साय
[4] M1 - निरुद्धतः
[5] M1 - सुवर्णपृष्ठम्
[6] T4 - तस्या
[7] M1 - मा गच्छ कृष्णेति
[8] M1 - पदंत एव
[9] T1 T2 T3 T4 - ०अन्तरीक्षा
[10] T1 T3 T4 - सगौकसः
[11] M1 - भीतः तमालोक्य
[12] M1 - ०स्पर्शन०
[13] M1 - वैनतेयः

यावत् स्वयं वाञ्छति योद्धुमीशो[1] सुरावलेपं व्यपनेतुकामः ।
प्रारब्धचण्डानिलभीषणाभ्यां तावद् गरुत्मान् युयुधे गरुद्भ्याम् ॥ १५ ॥

[2]सुपर्णपक्षाग्रपराहतानि पेतुर्न शस्त्राणि हरौ सुराणाम्[3] ।
व्योम्न्येव चेरुः पवनाकुलानि[4] [5]पलालतूलप्रतिमानि तानि[6] ॥ १६ ॥

तार्क्ष्यानिलक्षोभवशैरमर्त्यैर्द्रुतं पतद्भिर्द्रुतमुत्पतद्भिः[7] ।
क्षणं चकारेव हरेर्जयश्रीः रणाङ्गणे[8] कन्दुककेलिमुच्चैः ॥ १७ ॥

कृष्णस्तु कल्पद्रुममञ्जरीभिः प्रसाधयन्[9] केशभरं[10] प्रियायाः ।
तस्या मुखे विभ्रमदत्तदृष्टिः किमप्यजानन्निव तत्र तस्थौ ॥ १८ ॥

भग्नध्वजा भग्नसितातपत्रा भग्नायुधा भग्नमनोरथा च ।
तार्क्ष्यस्य पक्षानिलताडिता सा सेना पलायिष्ट कथञ्चिदैन्द्री ॥ १९ ॥

व्यायामशीर्णौ विहगेश्वरस्य पक्षौ करेण प्रतिसन्दधानः ।
तस्थौ तदीयाममृतापहारकथां प्रियायै कथयन् मुरारिः ॥ २० ॥

द्वारेषु संबाधनिरास्पदेषु महौजसः[11] केचिदपास्तशस्त्राः ।
सालं[12] समारुह्य कथञ्चिदुच्चैः सुराः पुराभ्यन्तरमाशु जग्मुः ॥ २१ ॥

---

[1] T1 T2 T3 T4 - योद्धुमीश
[2] M1 - सुवर्ण
[3] T1 T3 T4 - सुरोत्तमानाम्
[4] T4 - पवनाहतानि
[5] T4 - पलालपूल
[6] T2 - तापि
[7] Vilāsinī reads पुनः
[8] T1 T2 T3 T4 - यदाङ्कणे
[9] T3 - प्रारयन्
[10] M1 - केशभरः
[11] T1 T2 T3 T4 - महोजसः
[12] T4 - सायं

व्रीडानतैर्मौनिभिरेव[1] [2]वक्त्रैर्व्यर्थाकुर्वतो विक्रमभङ्गभाजौ ।
शक्रः समास्फाल्य करं करेण सुरान् सरोषस्मितमब्रवीत् तान् ॥ २२ ॥

रक्ष्यं कलत्रं पृतना न पार्श्वे वाहो विहङ्गः स्वपदं[3] दवीयः ।
तथापि तस्मात् त्रिदिवौकसो वः पराजयो धिक् कथमेष कृष्णात् ॥२३॥

अहं[4] समारुह्य गजाधिराजं[5] गत्वा[6] भवद्भिः सह युद्धभूमिम् ।
तं दुर्विनीतं[7] कुलिशोरगस्य ग्रासीकरिष्यामि बुभुक्षितस्य ॥ २४ ॥

प्रोत्साहितास्ते[8] नमुचिद्विषैव[9] जग्मुः सुरा जातरणाभिलाषाः[10] ।
स्ववारणस्कन्धगतः स्वयं च निर्गत्य तस्थौ कुलिशोग्रपाणिः[11] ॥ २५ ॥

[12]यावद् गरुत्मानुदयुङ्क्त[13] योद्धुं विकारभीमेन[14] मुखेन भूयः ।
तावत् स्वहस्तच्यवमानशस्त्रा[15] पुरं जगाहे पुरुहूतसेना ॥ २६ ॥

भूयोऽपि भग्नामुपलभ्य[16] सेनां[17] ज्वलन्नमर्षेण [18]भृशं बिडौजाः ।
[19]स्फुरत्स्फुलिङ्गच्छुरितान्तरिक्षं[20] वज्रं जवेनैव मुमोच कृष्णे ॥ २७ ॥

स्फुरत्प्रभामण्डलदुर्निरीक्ष्यं तत् प्रेक्ष्य वज्रं तरसाभिपत्य ।
सविभ्रमं पाणिसरोरुहेण जग्राह मध्ये जगदन्तरात्मा ॥ २८ ॥

---

1 M1 - मौलिभिरेव
2 M1 - वक्त्रैः
3 M1 - वाहो पि हा गन्धपदं
4 M1 - अथ
5 M1 - गजाधिनाथं
T1 T2 - गजाधिराजन्
6 T1 T2 - नत्वा
7 M1 - तद्दृष्टिनीतं
8 M1 T2 T1 प्रोत्सरितास्ते
9 T1 T2 T3 T4 - ०द्विषैव
10 M1 - स रा जातरुणाभिलाषाः
11 T4 - कुलिशोरुपाणिः
12 T1 and T4 omit verse 26
13 M1 - उपयुङ्क्त
14 T2 - विकारमानेन
15 M1 - स्वहस्तव्ययमानशस्त्रा
16 M1 - भूयोविभग्नां
17 T4 - भग्ना
18 M1 - ज्वलन्निमेषेण
19 M1 - स्फुरित
20 T1 T2 T3 T4 - अन्तरीक्षं

निवृत्य संग्राममुवः[1] प्रयाते भयेन[2] सैन्ये वितथे[3] च वज्रे ।
शक्रस्त्वमोघैरपराजितं[4] तं प्रारब्ध तैस्तैश्चटुभिर्विजेतुम् ॥ २९ ॥

मदाभिधानां प्रतिपद्य निद्रां विमर्शशून्यः सकलेऽपि कृत्ये ।
प्रबोधितः संप्रति साधु सोऽहं तवामुना कृष्ण ! पराक्रमेण ॥ ३० ॥

स्पृहा न शस्त्रग्रहणे तवासीन्नाभूत् क्रुधा कोऽपि मुखे विकारः ।
त्वद्वाहनध्वस्त[5]पराक्रमाणां दशेयमस्माकमशेषहास्या[6] ॥ ३१ ॥

ममापराधं हृदि मैव कार्षीः क्षमा विभूषा हि बलोत्तराणाम् ।
दोषस्त्वयास्मासु विमृश्यते चेन्मन्ये विहन्येत गुणीति वादः ॥ ३२ ॥

इति स्तुतिप्रीतमनाः प्रकामं प्रत्यर्प्य[7] तस्मै कुलिशं मघोने ।
तदीयसेवा[8]युवतिप्रयुक्तं[9] प्रत्यग्रहीत् पुष्पमयं[10] स वर्षम्[11] ॥ ३३ ॥

यत्नेन देवाननुयायिनस्तान्निवर्त्य शौरिर्गरुडेन[12] गच्छन् ।
प्रदर्शयन्नङ्गुलिपल्लवेन [13]तत्तत् प्रियायै कथयांबभूव ॥ ३४ ॥

दूरेण तुच्छा इव लक्ष्यमाणा[14] शारश्रियं[15] बिभ्रति भूभृतोऽमी ।
इयं च रेखाभिरिवापगाभिर्धत्ते धरा तत्फलकस्य लक्ष्मीम् ॥ ३५ ॥

---

1 T4 - संग्राममुवं
2 M1 - दयेन
3 T1 T2 T3 T4 - सैन्येऽपितथे
4 T4 - शक्रस्त्वमेघैरपराजित
5 T2 - तद्वाहपर्यस्त
6 T1 T2 T3 T4 - ०हासाः
7 T1 T2 - प्रत्यार्पि
8 Vilāsinī reads सेना
9 M1 - प्रयुक्तः
10 M1 - पुष्पमयाः
11 M1 - सर्वा
12 M1 - गतसेन
13 T4 omits from 34 d to 42nd verse incl.
14 M1 - तुच्छादुपलक्ष्यमाणाः
15 T1 T2 T3 - शारश्रीयं

जम्बूमिमां पश्य गजप्रमाणैः फलैः समावर्जिततुङ्गशाखाम् ।
अमुं किल द्वीपमखण्डमस्या[1] नाम्नैव सर्वो विशिनष्टि लोकः ॥ ३६ ॥

नेतुः[2] क्षणादौषधमेष मार्गो गत्यागती[3] शंसति वायुसूनोः ।
[4]तद्वेगभग्नैर्विषमोऽद्रिशृङ्गैरुदङ्मुखैरेभिरवाङ्मुखैश्च[5] ॥ ३७ ॥

महानयं मन्दरनामधेयो महीधरो मानिनि[6] वीक्षणीयः ।
विधाय[7] मन्थानममुं[8] पयोधेः सुधामहार्षीत्[9] पुरुषः पुराणः ॥ ३८ ॥

तटीरुदन्वन्मथनोत्थितेन सिक्ताः सुधाशीकरमण्डलेन ।
उदीर्णशीत्कारमनोज्ञमस्य[10] जिह्वाभिरेते गवया लिहन्ति ॥ ३९ ॥

आलोक्यतामिन्दुमुखि[11] त्वयासौ कैलासनामा कलधौतशैलः ।
जगत्कुटुम्बी भगवानिहास्ते तयैव[12] देव्या सह[13] चन्द्रमौलिः ॥ ४० ॥

पुरा दशग्रीवभुजार्गलाभिर[14]स्मिन्नुदस्ते चलिता भवानी[15] ।
मानेऽतिमात्रेऽपि[16] चकार धन्यं पतिं पशूनां परिरम्भणेन ॥ ४१ ॥

कुतूहलेन त्वयि मत्सकाशात् तत्तद्विशेषश्रुतितत्परायाः[17] ।
आलम्ब्य मन्दां गतिमायताक्षि यात्येष[18] चित्तज्ञतया गरुत्मान् ॥ ४२॥

---

[1] M1 - अखण्डं
[2] M1 - नेतु
[3] M1 - गत्यं गती
[4] M1 - तद्वेगगङ्गैः
[5] M1 - जगन्मुखैः
T2 - उदङ्मयैः
[6] M1 - मानिनी
[7] M1 - विधान
T1 T2 T3 - विहाय
[8] M1 - मन्थान
[9] T1 T2 T3 - अकार्षीत्
[10] T1 मनोज्ञमद्रि
[11] T1 T2 T3 - इन्दुमुखी
[12] T1 T2 T3 - सहैव
[13] T1 T2 T3 - स हि
[14] M1 - भुजार्गाभिः
[15] T1 T2 T3 - भवानि
[16] T1 T2 T3 - अतिमात्रोऽपि
[17] M1 - तत्परायाम्
[18] T3 - यान्येव

आलोकनेनाद्रियतां त्वयासौ हिमालयो नाम महीधरेन्द्रः ।
क्षिणोति यस्त्वन्मुखसाम्यदर्पं प्रालेयवर्षेण[1] पयोरुहाणाम् ॥ ४३ ॥

अत्राविरासीदचलाधिराजे[2] भवौषधं भव्यमुमाभिधानम् ।
विषोपयोगेऽपि यदानुभावादभूदपीडः[3] शशिखण्डचूडः[4] ॥ ४४ ॥

अस्मिन्[5] वहन्ती[6]ममरस्रवन्तीं सवर्णता[7]निह्नुतरूपभेदाम् ।
दृषत्प्रहा[8]रप्रभवः[9] पटीयान् प्रवाहघोषः प्रकटीकरोति ॥ ४५ ॥

पुरा किलैषा[10] कपिलोद्भवेन भस्मीकृतान् कोपहुताशनेन ।
सिक्त्वा पयोभिः सगरस्य पुत्रान् षष्टिं सहस्राण्यमलीचकार[11] ॥ ४६ ॥

अधीशितुः सानुमतामसुष्य कस्तोतुमीष्टे[12] कमलाक्षि कन्ये ।
ययोः[13] स देवः स्मरशत्रुरेकां धत्ते जटायामपरां शरीरे ॥ ४७ ॥

तपोधनानामघमर्षणेन पुण्योदकं काञ्चनपुष्कराढ्यम् ।
इतः सरो मानसनामधेयं वीक्षस्व कल्पान्तसमुद्रकल्पम् ॥ ४८ ॥

पुरास्य पुण्ये कुशिकस्य सूनुः[14] कूले[15] वसन्[16] कोपमलेन शून्यः ।
सुराङ्गनाविभ्रमदुर्जयेन[17] ब्रह्मर्षिरासीत् तपसो बलेन ॥ ४९ ॥

---

1 M1 omits वर्षे

2 M1 - ०राजः

3 T1 - अभूदविद्धः

4 T2 - शशिखण्डपीडः

5 M1 अस्मि

6 M1 सहन्तीं

7 M1 सवर्णतां

8 T3 - हृपत्प्रपात

9 M1 - प्रभवं

10 T1 T2 T3 T4 - किलेषा

11 T1 T2 T3 T4 - अमरीचकार

12 T1 T2 T3 T4 - कस्तौतुं

13 T1 T2 T3 T4 - ययौ

14 T1 T2 T3 T3 - सूरः

15 M1 - कुले

16 M1 - वहन्

17 T1 T2 T3 T4 - ०निर्जयेन

अस्मिन् वसन्तो वनितासहायाः वलाहकानां समयेषु हंसाः ।
गुणा इवास्य स्पृहणीयमालाः पुनः प्रसर्पन्ति दिशां[1] मुखेषु ॥ ५० ॥

महेन्द्रसेनामथनोद्भवस्य[2] शन्तिं[3] शकुन्ताधिपतेः श्रमस्य ।
इदं सरो धूतसरोरुहेण करोति कल्लोलसमीरणेन ॥ ५१ ॥

सिद्धाश्रमोऽयं करभोरु यस्मिन् कृतं तपः कैतववामनेन ।
लोकत्रयोलङ्घनकेलितृष्णां[4] निरुन्धता स्वे[5] हृदये बलेन* ॥ ५२ ॥

[6]एषा त्वया पञ्चवटी नमस्या गोदावरीमारुतधूतवृक्षा ।
उवास यस्यां परिहृत्य[7] राज्यं सलक्ष्मणो दाशरथिः सभार्यः ॥ ५३ ॥

रम्भोरु लङ्काधिपतेर्भगिन्याः कोपेन सीताक्रमणोद्यतायाः ।
रामेण नासाहृतिरत्र चक्रे नान्दीव रक्षोवधनाटकस्य ॥ ५४ ॥

[8]स्वनामचिह्नेषु निपातपूतान् ख्याताभिधानान् युधि[9] यातुधानान् ।
एकः सहस्राणि चतुर्दशास्यामारोपयामास दिवं स वीरः ॥ ५५ ॥

[10]पयोधरैः पाण्ड्यविलासिनीनामाहन्यमानापि तरङ्गिणी या ।
तेनैव मुक्ताभिरलङ्करोति शुद्धा विरुद्धेष्वपि सोपकारा[11] ॥ ५६ ॥

---

[1] T1 T2 T3 T4 - दिशामुखेषु
[2] M1 - मथनोत्थितेन
[3] T1 - श्रान्तिं
[4] M1 - ०कृष्णान्
[5] T1 T2 - निरुन्धतासौ
[6] T4 omits verses 53 to 55 incl.
[7] T1 T2 T3 - परित्यज्य
[8] T2 omits verse 55
[9] M1 - यधि
[10] M1 - omits verses 56&57.
[11] T3 T4 - सोपचारा

* In M1 between verse 52 & 53, there are 18 interpolated verses (see Appendix I)
In T1 T3 verses 53, 54 & 55 are omitted here but come after verse 66.
In T2 verses 53 & 54 are omitted here but come after verse 66.

परिभ्रमच्छङ्खनखार्पितानि रेखासहस्राणि तटोपकण्ठे ।
अस्या जगद्विश्रुतवैभवाया प्रशस्तिवर्णश्रियमुद्वहन्ति ॥ ५७ ॥

स्फीतश्रियः शालिवसुन्धराभिः फलातिभारानतनालिकेरान् ।
इतः प्रिये साधु विलोकयेथाश्चोलान् नभःश्यामलपूगमालान् ॥ ५८ ॥

कल्हारगन्धः कविता मनोज्ञा कवेरकन्याप्रभवं च वारि ।
इदं त्रयं मोहनमिन्द्रियाणामेष्वेव शतोदरि नापरेषु ॥ ५९ ॥

अस्मिन् वसन्तो विषये मनुष्या न स्वर्गमिच्छन्ति न चापवर्गम् ।
अत्रैव निःसीमसुखाधिवासे जन्माभिवाच्छन्ति पुनःपुनस्ते ॥ ६० ॥

कल्याणि वीक्षस्व कवेरकन्यां चोलीकुचास्फालनजर्झरोर्मीम्[1] ।
फेनांशुकच्छन्नपयोधरेयं पत्युर्नदीनां प्रथमं कलत्रम् ॥ ६१ ॥

विलोल[2]पाठीनविलोचनाया मुखामृतं देवि ! पिबन्नमुष्याः ।
यत्नेन निर्मथ्य हृताम[3]मर्त्यैर्न चिन्तयत्येव सुधां पयोधिः । ६२ ॥

सवल्कलाश्चारुजटाकलापाः शीतातपक्ले[4]शसहा महान्तः ।
अविक्रियाः साधु[5] चरन्त्यमुष्यां तपांसि तीरद्रुमनिर्विशेषाः ॥ ६३ ॥

---

[1] M1 - ०जर्झरोऽमी
[2] M1 - विलून०
[3] M1 - सुतां०
[4] M1 - ०क्कान्तिसहा
[5] M1 अविक्रियाश्चरु
T4 ends with verse 62.

परिच्युता यस्य पदारविन्दान्मन्दाकिनी विश्वमिदं पुनीते ।
सेव्यस्त्रयाणामपि विष्टपानां स सेवते विश्वपतिः किलैनाम् ॥ ६४ ॥

महः प्रवाहैर्मणिगोपुराणामपि क्षपायामतमःप्रवेशम् ।
प्रिये ! समालोकय सैकतेऽस्या निवेशनं पावनमच्युतस्य ॥ ६५ ॥

श्यामः शरत्पङ्कजचारुनेत्रो कौशेयवासाः सकिरीटहारः ।
भुजोपधाने भुजगेन्द्रतल्पे शेते किलास्मिन् पुरुषः पुराणः ॥ ६६ ॥

[1]प्रान्तेन पूगद्रुमवाटिकानां निवार्यमाणार्कमहःप्रवेशान् ।
पारं श्रितः पश्चिमवारिराशेः पश्य प्रिये कोङ्कणभूमिभागान्* ॥ ६७ ॥

---

[1] M1 ends with verse 67
T2 ends with verse 66
T1 & T3 end with verse 67

* In T1 after the 67th verse, there are about 5 interpolated verses (see appendix I)

APPENDIX—I

INTERPOLATIONS

A

In the manuscripts M_5, T_2 T_3 and V (a manuscript from Sri Venkatesvara University, Tirupati) there are forty-one additional verses found in Canto III between verses fifty-nine and sixty. The Vilāsinī and Bālapāṭhyā do not comment upon these verses. The style of the verses is also different from the normal style of Sukumāra. These verses are difficult and artificial[1] and exhibit lack of aesthetic beauty. Even the narration is very slow. There is a preponderence of alliteration to the deterioration of Rasa. Dvitīyākṣaraprāsa, very rarely employed by Sukumāra, is found quite often in these verses. The two final verses of this portion (40-& 41) refer to the end of the episode of Kṛṣṇa's childhood. As a matter of fact, the actual narration of Kṛṣṇa's childhood exploits commences from verse 61 of the origina text.

[1] See the use of Śleṣa in the interpolated verse 37.

These additional interpolated verses are edited below on the basis of the four manuscripts—M5, T2, T3 and V.

कोकिलादिरुतजातकौतुको गोकुलादपि[1] बहिः स सञ्चरन् ।
लोकलोचनमरीचिजालके व्याकुलोऽलभत नाकुलीं[2] गतिम् ॥ १ ॥

[3]चुलुकितवियदाभं[4] चूर्णिताशेषतापं[5] पुलकितवपुषस्ते पूर्यमाणप्रमोदाः[6] ।
जलगतिमभितस्तं कृष्णमेवं चरन्तं[7] गलितनिखिलवार्ताः[8] पालयन्ति[9] स्म गोपाः ॥२॥

तमानयन्ती गृहमच्युतं सती [10]गुरूभवन्तं भुवि भारपीडिता ।
निधाय निध्याय किमेतदित्यसौ सखेदमासिष्ट[11] सखीजनैः समम् ॥ ३ ॥

छायामवेक्ष्यात्मसमानयाना जित्वा[12] जवेन स्वयमेव गन्तुम् ।
घोषाङ्कणे[13] कङ्कणकिङ्किणीनां घोषाकुलोऽथ प्रससर्प[14] शौरिः ॥ ४ ॥

उदकर्षदथाम्बरे सुदूरं धृतवात्यावपुरेत्य कोऽपि दैत्यः ।
परिघूर्णितपांसुपूरमिश्रं[05] तृणमावृत्य[16] तिरोदधन्मुरारिम् ॥ ५ ॥

तदुदीरितपांसुपूरमुच्चैः [17]सदयोदञ्चितमेदिनीभुजाभम् ।
उपलक्षणमात्रमीक्षमाणा ददृशुः केवलमच्युतं न गोपाः ॥ ६ ॥

---

1 V - गोकुलामपि
2 T2 T3 - नांकुलीं
3 V - चुन्दुकित
4 T3 - वियदाभवं
V - विदधाभं
5 T3 - चूर्णितापं
6 T2 T3 ०प्रमोदः
7 M5 - पतन्तं
8 M5 - ०पाताः
T3 - ०निखिलवत्तं
9 T3 - वायन्ति
10 M5 V - गुरु
11 M5 - आसीषु
T3 - सखेददासिष्ट
12 T2 - जिता
13 V - येषाङ्कणे
14 V - प्रससप्त
15 V - ०मिश्रां
16 T2 T3 - आवर्त्य
17 M5 - ०मर्तित

[1]अनिशाम्य शिशुं निशम्य वामे[2] रुदितं तस्य रुरोद रुग्णकण्ठः[3] ।
वृजिनानि[4] चिरार्जितानि तावत्[5] फलितानीति विलप्य नन्दगोपः ॥ ७ ॥

विनिहत्य शिरो विरक्तदेहा [6]सहसानुद्रुतगोपिकासमूहा ।
पतिता पतिपादयोर्यशोदा रुदती बाष्पनिरुध्यमानकण्ठा[7] ॥ ८ ॥

परिहर्तुमशक्यमीदृशं यै[8] र्व्यसनं तद्विधजीवितं मुधेति ।
पतगा इव पावके परेतुं पशुपाः पापमरुत्पथे[9] निपेतुः [10] ॥ ९ ॥

[11]मरणाय मरुत्पथे पतन्तो[12] मधुविद्वेषि[13] शरीरयोगशुद्धे[14] ।
अवियोजितजीविता बभूवुर्व्रजिनस्ते[15] वृजिनात्परं व्यपेताः ॥ १० ॥

करुणानिलयो हरिः कराभ्यां कठिनग्राहनिपीडितं गृहीत्वा ।
[16]अरिकण्ठमकुण्ठधीस्तदानीं सहसालम्बत दुर्भरो भियेव[17] ॥ ११ ॥

गललम्बितकृष्णगण्डकाश्मा[18] [19]गतिमिष्टामुपगन्तुमीहमानः[20] ।
मरुपातदशां मरुत् प्रपन्नो मरुतामालयमारुरोह सोऽपि[21] ॥ १२ ॥

---

1 T3 omits verses 7 & 8

2 T2 - पापे
V - बाध्वे

3 V - रुग्णकर्णम्

4 V - व्रजिनानि

5 T2 - कालात्

6 V - सहसानुक्त

7 M5 - निरुद्धकण्ठः
T2 - निरुध्यमानकण्ठाः

8 M5 - वै

9 M5 - मरुत्परेत

10 M5 - पतन्ते

11 M5 - omits first line of verse 10.

12 T2 - निपतन्तो

13 M5 - मधुविद्विषि

14 M5 - °शून्ये
T2 T3 - °शुद्धे

15 M5 T2 T3 V - वृजिनस्ते

16 M5 - अतिकर्ण

17 V - भिये च

18 M5 - °बकात्मा

19 °M5 - गतिरिष्टां

20 M5 - ईहमानाः

21 T3
आरुरोह मरुवातदशासे सा

परिरभ्य दृढं परं पुमांसं पतितं वीक्ष्य भुवं[1] पुनानमङ्गम् ।
दितिजो दिवि [2]दिव्यदेहभागव्ययमात्मानममंस्त[3] दैवहीनम् ॥ १३ ॥

[4]पिशिताशशरीरपातनादाचलितात्मद्रुमसाध्यपुष्पवृष्ट्या[5] ।
स्वयमभ्युपगम्य राजमानं[6] हरिमस्तारिमथास्तुवन्नमर्त्याः[7] ॥ १४ ॥

कृष्णं करालपिशिताशगले शयानं दृष्ट्वा कथञ्चिदधिरुह्य हठाद् गृहीत्वा ।
उद्धावतामुरुभियां[8] तरवोऽपि तेषां नोपादिशन् स्थितिकथां स जवाधिरोपाः[9] ॥१५॥

मायाविना तेन महीरुहोऽमी सर्वादिनाकृष्ट तथाभियान्ति[10] ।
दैवादकृष्ट्वा वयमित्यगुस्ते तिष्ठत्पदार्थावधि[11] धावनेच्छाम्[12] (?) ॥ १६ ॥

